अस्यायमर्थः—प्रविश गृहमिति वक्तव्ये 'प्रविश' इत्येवोच्यते। पिण्डीं भक्षयेति वक्तव्ये 'पिण्डीम्' इत्येवोच्यते। प्रविश गङ्गायामिति वक्तव्ये 'प्रविश' इत्येवोच्यते। तर्पणं कुरु इति वक्तव्ये 'तर्पणम्' इत्येवोच्यते। देवदत्त इति वक्तव्ये 'दत्तः' इत्येवोच्यते। सत्यभामेति वक्तव्ये 'भामा' इत्येवोच्यते

तथैवात्र वत्सर इति वक्तव्ये 'सर' इत्येवोक्तं महर्षिणा।

ननु—

सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते।

(महाभाष्य २।१।१॥ पृष्ठ ३६१)

इत्यनुशासनात् कथं वेदत्र्यङ्के इति विशिष्टस्य सरशब्दस्य विधुयुतशब्देन कर्मधारयः। वृत्तस्य वा तस्य कथं विशेषणयोगः। 'विधुयुति सरे' इति पाठः साधीयान् स्यात्। युत् इति क्विबन्तो निर्देशः। उच्यते—सापेक्षत्वेऽपि गमकत्वात्

समासः। यथा देवदत्तस्य गुरुकुलम्, देवदत्तस्य दासभार्या। समुदायापेक्षया विशेषणम्।

समाहारद्वन्द्वो वा। वेदानां त्रयाणाम् अङ्गानां समाहारो वेदत्र्यङ्कं तस्मिन् वेदत्र्यङ्के सति विधुयुतसरे इति योज्यम्।

यत्तु ऋग्वेदादिभाष्यभूमिकायां महर्षिलिखितं संवत्सरमाक्षिपन् भूमिका-भासकार आह—

"कालरामाङ्कचन्द्रमितेऽब्दे इति वक्तव्ये कालादिभिरेव केवलैः समुद्युङ्क्ते विबोधयितुं संवत्सरमानम् विचित्रेयं मस्करिणोऽस्य वचोभङ्गिः" इति।

तदसाम्प्रतम्। ज्यौतिषशास्त्रे छन्दःशास्त्रे च विनापि मितशब्दं समुद्रादि-शब्दैरेव केवलैः संख्यायाः परिभाषितत्वात् तथाहि—

शालिनी म्तौ त्गौ ग् समुद्र ऋषयः

(पिङ्गल ६। २५)

अस्यायमर्थः—यस्य वृत्तस्य पादे मगण तगणौ तगणः द्वौ च गुरू तद् वृत्तं शालिनी नाम यत्र च चतुर्भिः सप्तभिश्च यतिः।

युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः।
कुजार्कि गुरु शीघ्राणां भगणाः पूर्वयायिनाम्॥

(सूर्यसिद्धान्त १। २९॥)

अस्यायमर्थः—(युगे) एकस्मिन् महायुगे (सूर्य+ज्ञ+शुक्राणाम्) सूर्यबुधभृगूणां (ख चतुष्क रदार्णवाः) अङ्कानां वामतो गतिरिति न्यायेन ४,३२,००००० भगणा भवन्ति। तावन्त एव भगणाः (पूर्वयायिनां) पूर्वगामिनां कुज+अर्कि+गुरु-शीघ्राणाम्) मंगल+शनि+बृहस्पतीना शीघ्रोच्चानां भगणाः द्वादशराशिभोगात्मका भवन्ति।द्वादशराशिभोगात्मकस्य कालस्य भगणसंज्ञा।

उभयत्र केवलैरेव समुद्र ऋषि ख रद अर्णव शब्दैः संख्या परिभाषिता। न तु खचतुष्करदार्णवमिता भगणा भवन्तीत्युक्तम्[1]।

(मार्गशुक्ले) मार्गो मार्गशीर्षः। पूर्ववत् नामैकदेशग्रहणे नाममात्रग्रहणम्। मृगशीर्षेण नक्षत्रेण युक्ता पौर्णमासी मार्गशीर्षी साऽस्मिन् मासे भवति स मार्गशीर्षो मासः। तत्सम्बद्धः शुक्लः शुक्लपक्षस्तस्मिन् मार्गशुक्ले अग्रहायणमासस्य शुक्लपक्ष इति। (अङ्गभौमे) अङ्गानि षट्, भूमेरपत्यं भौमो मङ्गलः। शिवादित्वादण्।

१—उभयथापि प्रयोगा दृश्यन्ते तथाहि—

"तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः। वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्॥"
९०६ शकाब्द इत्यर्थः। इत्युदयनः।
न्यायसूचीनिबन्धोऽसावकारि सुधियां मुदे। श्रीवाचस्पतिमिश्रेण वस्वङ्कवसुवत्सरे॥
८९८ विक्रमाब्द इत्यर्थः। इति वाचस्पतिमिश्रः।

अङ्गोपलक्षिते भौमे षष्ठतिथौ मङ्गलवासर इति । वेदाङ्गानि षड् भवन्तीति अङ्गशब्दः षट् पर्यायः । (अखिलगुणगुणिज्ञानदातुः) न खिलं प्रतिहतं विद्यते यस्मिन् सोऽखिल[1]ः सर्वपर्यायः । अखिलानां सर्वेषां पदार्थस्थानां गुणानां धर्माणाम् गुणिनां पदार्थानां च ज्ञानदातुः जगति कियन्तः पदार्थाः के के च तेषां विशिष्टगुणा इति ज्ञानप्रदस्य (हि) हि शब्दोऽत्रावधारणार्थः । अयमृग्वेदो गुणगुणिज्ञानं निश्चिततया ददातीति नात्र विचारणा कार्या । "**हि हेत्वपदेश-अनुपृष्ट-असूया-अवधारण-पादपूरण-विस्मयेषु-द्रष्टव्यः**" ।

(ऋग्वेदस्य) (भाष्यम्) भाष्यते विवृततया वर्ण्यते इति भाष्यं व्याख्यानम् (कुर्वे) अहं दयानन्दसरस्वती आरभे । "**वर्तमानसामीप्ये वर्तमानवद् वा**" शब्दानु० ३ । ३ । १३१ ॥ इति वर्तमानसमीपे भविष्यति लट् । भाष्यं प्रारप्स्य इत्यर्थः ।

मन्दाक्रान्ता वृत्तम् । तल्लक्षणम्—

"**मन्दाक्रान्ता म्भौ न्तौ तगौ ग् समुद्रर्तुस्वराः**"

(पिङ्गल ७ । १६ ॥)

अस्यायमर्थः—यस्मिन् छन्दसि प्रतिपादं मगण भगण नगण तगण तगणाः द्वौ चान्ते गुरू यतिश्च समुद्र ऋतु स्वर लक्षितेषु चतुर्षु षट्सु सप्तसु यत्र विद्यते तद् वृत्तं मन्दाक्रान्ता नाम ।

महर्षेर्मङ्गलश्लोकौ । व्याख्यातः ।

साङ्गोपाङ्गवेदाध्ययनं प्रतिजानीत ऋषिः—

(महर्षिभाष्यम्)

"**ऋग्भिः स्तुवन्ति" इत्युक्तत्वाद् विद्वांस उक्तपूर्वं वेदार्थज्ञान-साहित्यपठनपुरःसरम् ऋग्वेदमधीत्य तत्रस्थैर्मन्त्रैरीश्वरमारभ्य भूमिपर्यन्तानां पदार्थानां गुणान् यथावद् विदित्वा, एते कार्येषूपकृतये मतिं जनयन्ति**"

(ऋ० भा० १ । १ । १ ॥)

(ऋग्भिः) ऋग्वेदमन्त्रैः (स्तुवन्ति) पदार्थानां गुणान् वर्णयन्ति (इत्युक्तत्वात्) इति प्रमाणात् (वेदार्थज्ञानसाहित्यपठनपुरःसरम्) वेदार्थज्ञानस्य सहायभूतं यदङ्गोपाङ्गादि रूपं साहित्यं तस्य पठनम्—अध्ययनं पुरःसरम्—

१—न खिलमवशिष्टं यस्य सोऽखिलः शेषशून्यः ।

२—ताण्ड्यब्रा० ४ । ६ । ४ ॥ तैत्तिरीयब्रा० २ । २ । ६ । २ ॥

पूर्ववर्ति यस्मिन् कर्मणि तद् यथा स्यात् तथा। अनेन 'बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति" इत्यादि मन्त्रककण्टकरूपो वारितः। साङ्गोपाङ्गवेदाध्ययनपूर्वकम्। (उक्तपूर्वम्) अखिलगुणगुणिज्ञानदातारम् (ऋग्वेदम्) (अधीत्य) पठित्वा (तत्रस्थैः मन्त्रैः भूमिमारभ्येश्वरपर्यन्तानां पदार्थानां गुणान् यथावद् विदित्वा) (एते) ईदृशा विद्वांसः (कार्येषु) संसारस्थजनकृत्येषु (मतिं जनयन्ति) स्वज्ञानं प्रयुञ्जते।

अत्र केचिदाहुः 'ऋग्भिः शंसन्ति' इति युक्तः पाठः स्यात्। ऋग्भिः शंसनं क्रियते सामभिः स्तुवन्तीति। 'ऋग्भिः स्तुवन्ति' इति पाठस्याभावाच्च। एवं महर्षिमाक्षिपन्तो मीमांसकास्ताण्ड्यब्राह्मणादिषु 'ऋग्भिः स्तुवन्ति' इति पाठं दृष्ट्वा श्रद्दधतु पारोवर्यविदि भूयोविद्ये महर्षिवर्ये परित्यजन्तु च ऋषिद्रोहबुद्धिमिति।

ऋग्वेदलक्षणमाह ऋषिः—

(महर्षिभाष्यम्)

"ऋचन्ति स्तुवन्ति पदार्थानां गुणकर्मस्वभावाननया सा ऋक् ऋक् चासौ वेदश्च ऋग्वेदः।"

(ऋ० भा० १।१।१॥)

"ऋच स्तुतौ" तुदादिः। तस्मात् (संपदादिभ्यः क्विप्) महाभाष्य ३।३।१०८॥ इति भाष्यवार्तिकात् क्विप्। अयं क्विप् भावेऽकर्तरि च कारक इष्यते।

वेदः—वेदशब्दस्य व्युत्पत्तय ऋग्वेदादिभाष्यभूमिकातो ज्ञेयाः। तथाहि—

विदज्ञाने, विद सत्तायाम्, विदॢ लाभे विद विचारणे, एतेभ्यो हलश्चेति सूत्रेण करणाधिकरणयोर्घञ्प्रत्यये कृते वेदशब्दः साध्यते ········ विदन्ति-जानन्ति, विद्यन्ते-भवन्ति, विन्दन्ति विन्दन्ते-लभन्ते, विन्दन्ते-विचारयन्ति सर्वे मनुष्याः सर्वाः सत्यविद्या यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः।

(ऋग्वेदादिभाष्यभूमिका, वेदोत्पत्तिविषयः पृ० २८२)

अस्यायमर्थः—(विदन्ति-जानन्ति) येषु ग्रन्थेषु यथार्थविज्ञानं वर्तते येषामध्ययनेन वा यथार्थविज्ञानं भवति ते वेदाः। (विद्यन्ते-भवन्ति) येषामध्ययनेन विद्वांसो भवन्ति ते वेदाः। (विन्दन्ति विन्दन्ते-लभन्ते) येषु ग्रन्थेषु सर्वसुखसाधनं प्राप्तं भवति येषामध्ययनेन वा सर्वसुखानां प्राप्तिर्भवति ते वेदाः। (विन्दन्ते-विचारयन्ति) येषु ग्रन्थेषु सत्यासत्यविचारो वर्तते येषामध्ययनेन वा मनुष्याणां सत्यासत्यविचारो भवति ते वेदाः।

(महर्षिभाष्यम्)

एतस्मिन्नग्निमीड इत्यारभ्य यथा वः सुसहासतिपर्यन्त ऽष्टावष्टकाः सन्ति । तत्रैकैकस्मिन्नष्टावष्टावध्यायाः सन्ति । तेषा-मेकैकस्य प्रत्यध्यायं वर्गाः संख्यायन्ते ।

प्रथमाष्टके		द्वितीयाष्टके		तृतीयाष्टके		चतुर्थाष्टके		पञ्चमाष्टके		षष्ठाष्टके		सप्तमाष्टके		अष्टमाष्टके	
अ.	व.	अ.	व.	अ.	व.	अ.	व.	अ.	व.	अ.	व.	अ.	व.	अ.	व.
१	३७	१	२६	१	३४	१	३३	१	२७	१	४०	१	४१	१	३०
२	३८	२	२७	२	२६	२	२८	२	३०	२	४०	२	३३	२	२४
३	३५	३	२६	३	३१	३	३१	३	३०	३	४९	३	२६	३	२८
४	२९	४	२९	४	२५	४	३६	४	३०	४	५४	४	२८	४	३१
५	३१	५	२९	५	२६	५	३०	५	२७	५	३८	५	३३	५	२७
६	३२	६	३२	६	३०	६	२५	६	२५	६	३८	६	२८	६	२७
७	३७	७	२५	७	२७	७	३५	७	३३	७	३९	७	३०	७	३०
८	२६	८	२७	८	२६	८	३२	८	३६	८	३३	८	२९	८	४९
	२६५		२२१		२२५		२५०		२३८		३३१		२४८		२४६

इयं संख्या प्रत्यष्टकं वेदितव्या । सर्वेष्टकेषु सर्वे वर्गाः संयुक्ताः २०२४ चतुर्विंशत्याधिके द्वे सहस्रे सन्ति । (ऋ० भा० १ । १ । १ ॥)

ऋग्वेदमहाभाष्यम्
अष्टकाध्यायवर्गमन्त्रसंख्याचित्रम्
(चित्रम् २)

१ अष्टकम्			२ अष्टकम्			३ अष्टकम्			४ अष्टकम्			५ अष्टकम्			६ अष्टकम्			७ अष्टकम्			८ अष्टकम्			
अध्यायः	वर्गाः	मन्त्राः	अध्यायः	वर्गाः	मन्त्राः	अध्यायः	वर्गाः	मन्त्राः	अध्यायः	वर्गाः	मन्त्राः	अध्यायः	वर्गाः	मन्त्राः	अध्यायः	वर्गाः	मन्त्राः	अध्यायः	वर्गाः	मन्त्राः	अध्यायः	वर्गाः	मन्त्राः	पूर्णसंख्या
१	३७	१९४	१	२६	१३७	१	३४	१७६	१	३३	१६८	१	२७	१४३	१	४०	२०६	१	४१	२००	१	३०	१६१	
२	३८	१८९	२	२७	१४३	२	२६	१३७	२	२८	१४६	२	३०	१५६	२	४०	२०४	२	३३	१६३	२	२४	१३३	
३	३५	१७३	३	२६	१३२	३	३१	१५८	३	३१	१६४	३	३०	१६५	३	४६	२५८	३	२६	१३५	३	२८	१४८	
४	२९	१५२	४	२९	१४२	४	२५	१३५	४	३६	१७७	४	३०	१५६	४	५४	२६८	४	२८	१३८	४	३१	१६०	
५	३१	१५५	५	२९	१५९	५	२६	१४८	५	३०	१६०	५	२७	१५०	५	३८	१६५	५	३३	१८९	५	२७	१४९	
६	३२	१६३	६	३२	१५७	६	३०	१५९	६	२५	१३२	६	२५	१३२	६	३८	१६७	६	२८	१४१	६	२७	१४०	
७	३७	१७९	७	२५	१३७	७	२७	१४४	७	३५	१७६	७	३३	१६५	७	३९	१९८	७	३०	१५३	७	३०	१७२	
८	२६	१३५	८	२७	१४०	८	२६	१५५	८	३२	१६६	८	३६	१८३	८	३३	२०४	८	२९	१४४	८	४९	२१८	
वर्गाः	२६५			२२१			२२५			२५०			२३८			३३१			२४८			२४६		२०२४
मन्त्राः		१३४०			११४७			१२०६			१२८९			१२६३			१७३०			१२६३			१२८१	१०५२२

(चित्रम् ३)

मण्डलानुवाकसूक्तमन्त्रसंख्याचित्रम्

मण्डलानि		अनुवाकाः	सूक्तानि	मन्त्राः
१		२४	१९१	१९७६
२		४	४३	४२९
३		५	६२	६१७
४		५	५८	५८९
५		६	८७	७२७
६		६	७५	७६५
७		६	१०४	८४१
८		१०	१०३	१७१६
९		७	११४	११०८
१०		१२	१९१	१७५४
पूर्णसंख्या	१०	८५	१०२८	१०५२२

(महर्षिभाष्यम्)

"तथाऽस्मिन्नृग्वेदे दश मण्डलानि सन्ति"

ऋ० भा० १ । १ । १ ॥

अस्मिन्निति पदं शाखान्यत्वच्छेदाय । तत्र भेदं ब्रूते शौनकः—

(सूक्तसंख्या)

एतत् सहस्रं दश सप्त चैव, अष्टावतो बाष्कलकेऽधिकानि ।
सहस्रमेतत् सूक्तानां निश्चितं खैलिकैर्विना ।
दश सप्त च पठ्यन्ते संख्यातं वै पदक्रमम् ॥

(शौनकानुक्रमणी ३६, ३९)

अस्यायमर्थः—खिलवर्जम् ऋग्वेदे एकसहस्रं सप्तदश १०१७ सूक्तानि सन्ति । (खिलेषु एकादश ११ सूक्तानि भवन्ति तत्संकलनेन १०१७+११=१०२८ सूक्तसंख्या सम्पद्यते) । बाष्कलशाखायामतः १०१७ सूक्तेभ्योऽष्टौ सूक्तान्यधिकानि (१०२५) सन्ति । पदक्रमादीनामपि संख्या प्रदर्शिताऽस्ति ।

(अनुवाकसंख्या)

तान् पारणे शाकले शैशिरीये वदन्ति शिष्टा न खिलेषु विप्राः ॥
पञ्चाशीतिर्द्वाशतयेऽनुवाका दृष्टाः पुराणैर्ऋषिभिर्महात्मभिः ।

(शौनकानुक्रमणी ३६, ३७)

अस्यायमर्थः—ऋग्वेदे पञ्चाशीतिः अनुवाकाः सन्ति । खिलेष्वनुवाकविभागो नास्तीति । इयमेव संख्या शाकलचरणान्तर्गतशैशिरीयशाखायाः पारायणस्य ॥

अस्मिन् ऋग्वेदे दशमण्डलानि सन्तीत्युक्त्वा ऋषिभाष्येऽग्रे प्रतिमण्डल-मनुवाकसूक्तमन्त्रसंख्या निरूपिता । तत्र ऋषिप्रदर्शितप्रकारमनुसृत्य प्रतिमण्डलम-नुवाकमन्त्रसूक्तसंख्या निरूप्यते तत्र चाष्टकाध्यायवर्गसंकेतश्च क्रियते ।

(चित्रम् ४)

तत्र प्रथमे मण्डले २४ अनुवाकाः, १९१ सूक्तानि, १९७६ मन्त्राः सन्ति। तद्विभागस्त्वित्थम्—

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१	१ अ	९		११	८		२१	६	७	३१	१८		४१	९
	२	९	४	१२	१२		२२	२१		३२	१५		४२	१०
	३	१२		१३	१२		२३	२४		३३ अ३	१५		४३	९
२	४	१०		१४	१२	६	२४	१५		३४	१२	९	४४	१४
	५	१०		१५	१२		२५	२१		३५	११		४५	१०
	६	१०		१६	९		२६	१०	८	३६	२०		४६	१५
	७	१०		१७	९		२७	१३		३७	१५		४७ इ	१०
३	८	१०	५	१८	९		२८	९		३८	१५		४८	१६
	९	१०		१९	९		२९	७		३९	१०		४९	४
	१०	१२		२० आ	८		३०	२२		४०	८		५०	१३

अ प्रथमाष्टके प्रथमाध्यायारम्भः अत्र ३७ वर्गाः । आ प्रथमाष्टके द्वितीयाध्यायारम्भः अत्र ३८ वर्गाः।
अ३ " तृतीयाध्यायारम्भः अत्र ३५ वर्गाः । इ " चतुर्थाध्यायारम्भः अत्र २९ वर्गाः ।

२

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१०	५१	१५		७२	१०		९३	१२		११४	११		१३५	९
	५२	१५		७३	१०	१५	९४	१६		११५	६		१३६	७
	५३	११	१३	७४	९		९५ उ	११	१७	११६	२५		१३७ ऋ	३
	५४	११		७५	५		९६	९		११७	२५		१३८	४
	५५	८		७६	५		९७	८		११८	११		१३९	११
	५६	६		७७	५		९८	३		११९	१०	२१	१४०	१३
	५७	६		७८	५		९९	१		१२०	१२		१४१	१३
११	५८	९		७९	१२		१००	१९	१८	१२१	१५		१४२	१३
	५९	७		८०	१६		१०१	११		१२२ उ३	१५		१४३	८
	६०	५		८१ इ३	९		१०२	११		१२३	१३		१४४	७
	६१	१६		८२	६		१०३	८		१२४	१३		१४५	५
	६२ ई	१३		८३	६		१०४	९		१२५	७		१४६	५
	६३	९		८४	२०		१०५	१९		१२६	७		१४७	५
	६४	१५	१४	८५	१२	१६	१०६	७	१९	१२७	११		१४८	५
१२	६५	५		८६	१०		१०७	३		१२८	८		१४९	५
	६६	५		८७	६		१०८	१३		१२९	११		१५०	३
	६७	५		८८	६		१०९	८		१३०	१०		१५१	९
	६८	५		८९	१०		११०	९		१३१	७		१५२	७
	६९	५		९०	९		१११	५		१३२	६		१५३	४
	७०	६		९१	२३		११२	२५		१३३	७		१५४	६
	७१	१०		९२	१८		११३ ऊ	२०	२०	१३४	६		१५५	६

ई प्रथमाष्टके पञ्चमाध्यायारम्भः अत्र ३१ वर्गाः। इ३ प्रथमाष्टके षष्ठाध्यायारम्भः अत्र ३२ वर्गाः।
उ " सप्तमाध्यायारम्भः अत्र ३७ वर्गाः। ऊ " अष्टमाध्यायारम्भः अत्र २६ वर्गाः।
उ३ द्वितीयाष्टके प्रथमाध्यायारम्भः अत्र २६ वर्गाः। ऋ द्वितीयाष्टके द्वितीयाध्यायारम्भः अत्र २७ वर्गाः।

३

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
	१५६	५		१६४	५२		१७२	३	२४	१८०	१०		१८८	११
२२	१५७	६	२३	१६५	१५		१७३	१३		१८१	९		१८९	८
	१५८ ऋ	६		१६६ ऋ३	१५		१७४	१०		१८२	८		१९०	८
	१५९	५		१६७	११		१७५	६		१८३	६		१९१	१६
	१६०	५		१६८	१०		१७६	६		१८४ लृ	६			
	१६१	१४		१६९	८		१७७	५		१८५	११			
	१६२	२२		१७०	५		१७८	५		१८६	११			
	१६३	१३		१७१	६		१७९	६		१८७	११			

(चित्रम् ५)

द्वितीये मण्डले ४ अनुवाकाः, ४३ सूक्तानि, ४२९ मन्त्राः सन्ति । तद्विभागस्त्वित्थम्-

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१	१	१६		१०	६		१९	९		२८	११		३७ ए३	६
	२	१३		११	२१		२०	९		२९	७		३८	११
	३	११	२	१२	१५		२१	६		३०	११		३९	८
	४	९		१३	१३		२२	४		३१	७		४०	६
	५	८		१४	१२	३	२३	१९		३२	८		४१	२१
	६	८		१५	१०		२४ ए	१६	४	३३	१५		४२	३
	७	६		१६	९		२५	५		३४	१५		४३	३
	८	६		१७	९		२६	४		३५	१५			
	९ लृ३	६		१८	९		२७	१७		३६	६			

ऋ द्वितीयाष्टके तृतीयाध्यायारम्भः अत्र २६ वर्गाः ।   ऋ३ द्वितीयाष्टके चतुर्थाध्यायारम्भः अत्र २४ वर्गाः ।
लृ " पञ्चमाध्यायारम्भः अत्र २६ वर्गाः ।   लृ३ द्वितीयाष्टके षष्ठाध्यायारम्भः अत्र ३२ वर्गाः ।
ए " सप्तमाध्यायारम्भः अत्र २७ वर्गाः ।   ए३ " अष्टमाध्यायारम्भः अत्र २७ वर्गाः ।

(चित्रम् ६)

तृतीये मण्डले ५ अनुवाकाः, ६२ सूक्तानि, ६१७ मन्त्राः सन्ति। तद्विभागस्त्वित्थम्—

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१	१	२३		१४	७		२७	१५		४० ओ	९		५३	२४
	२	१५		१५	७		२८	६		४१	९	५	५४	२२
	३	११		१६	६		२९	१६		४२	९		५५	२२
	४	११		१७	५	३	३० ऐ२	२२		४३	८		५६ ओ२	८
	५	११		१८	५		३१	२२		४४	५		५७	६
	६	११		१९	५		३२	१७		४५	५		५८	९
	७ ऐ	११		२०	५		३३	१३		४६	५		५९	९
	८	११		२१	५		३४	११		४७	५		६०	७
	९	९		२२	५		३५	११		४८	५		६१	७
	१०	९		२३	५		३६	११		४९	५		६२	१८
	११	९		२४	५		३७	११		५०	५			
	१२	९		२५	५		३८	१०		५१	१२			
२	१३	७		२६	९	४	३९	९		५२	८			

ऐ तृतीयाष्टके प्रथमाध्यायारम्भः। अत्र ३४ वर्गाः।
ऐ२ ,, द्वितीयाध्यायारम्भः। अत्र २६ वर्गाः।
ओ ,, तृतीयाध्यायारम्भः। अत्र ३१ वर्गाः।
ओ२ ,, चतुर्थाध्यायारम्भः। अत्र २५ वर्गाः।

(चित्रम् ७)

चतुर्थे मण्डले ५ अनुवाकाः, ५८ सूक्तानि, ५८९ मन्त्राः सन्ति। तद्विभागस्त्वित्थम्—

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१	१	२०		१३	५		२५	८		३७	८		४९	[illegible]
	२	२०		१४	५		२६	७		३८	१०		५०	११
	३	१६		१५	१०		२७	५		३९	६		५१ ख	११
	४	१५		१६	२१		२८	५		४०	५		५२	[illegible]
	५ औ	१५		१७	२१		२९	५		४१	११		५३	[illegible]
	६	११		१८	१३		३०	२४		४२	१०		५४	[illegible]
	७	११		१९ औ३	११		३१	१५		४३	७		५५	[illegible]
	८	८		२०	११		३२	२४		४४	७		५६	७
	९	८		२१	११	४	३३ क	११		४५	७		५७	८
	१०	८	३	२२	११		३४	११	५	४६	७		५८	११
२	११	६		२३	११		३५	९		४७	४			
	१२	६		२४	११		३६	९		४८	५			

औ तृतीयाष्टके पञ्चमाध्यायारम्भः। अत्र २६ वर्गाः।
औ३ ,, षष्ठाध्यायारम्भः। अत्र ३० वर्गाः।
क ,, सप्तमाध्यायारम्भः। अत्र २७ वर्गाः।
ख ,, अष्टमाध्यायारम्भः। अत्र २६ वर्गाः।

(चित्रम् ८)

पञ्चमे मण्डले ६ अनुवाकाः, ८७ सूक्तानि, ७२७ मन्त्राः सन्ति । तद्विभागस्त्वित्थम्—

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१	१	१२		१९	५		३७	५		५५	१०	६	७३	१०
	२	१२		२०	४		३८	५		५६	९		७४	१०
	३	१२		२१	४		३९	५	५	५७	८		७५	९
	४	११		२२	४		४०	९		५८	८		७६	५
	५	११		२३	४		४१	२०		५९	८		७७	५
	६	१०		२४	४		४२	१८		६०	८		७८	९
	७	१०		२५	९		४३	१७		६१	१९		७९	१०
	८	७		२६	९		४४	१५		६२	९		८०	६
	९ ग	७		२७	६	४	४५	११		६३ च	७		८१	५
	१०	७		२८	६		४६	८		६४	७		८२	९
	११	६		२९	१५		४७ ङ	७		६५	६		८३	१०
	१२	६		३०	१५		४८	५		६६	६		८४	३
	१३	६		३१	१३		४९	५		६७	५		८५	८
	१४	६		३२	१२		५०	५		६८	५		८६	६
२	१५	५	३	३३ घ	१०		५१	१५		६९	४		८७	९
	१६	५		३४	९		५२	१७		७०	४			
	१७	५		३५	८		५३	१६		७१	३			
	१८	५		३६	६		५४	१५		७२	३			

ग चतुर्थाष्टके प्रथमाध्यायारम्भः । अत्र ३३ वर्गाः ।
घ ,, द्वितीयाध्यायारम्भः । अत्र २८ वर्गाः ।
ङ ,, तृतीयाध्यायारम्भः । अत्र ३१ वर्गाः ।
च ,, चतुर्थाध्यायारम्भः । अत्र ३६ वर्गाः ।

(चित्रम् ६)

षष्ठे मण्डले ६ अनुवाकाः ७५ सूक्तानि, ७६५ मन्त्राः सन्ति। तद्विभागस्त्वित्थम्—

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्
१	१	१३		१८	१५		३५	५		५२	१७		६९	[illegible]
	२ छ	११		१९	१३		३६	५		५३	१०		७०	[illegible]
	३	८		२०	१३		३७	५		५४	१०		७१	[illegible]
	४	८		२१	१२		३८	५		५५	६		७२	[illegible]
	५	७	३	२२	११		३९	५		५६	६		७३	[illegible]
	६	७		२३	१०		४०	५		५७	६		७४	[illegible]
	७	७		२४	१०		४१	५		५८	४		७५	[illegible]
	८	७		२५	९		४२	४		५९	१०			
	९	७		२६	८		४३	४		६०	१५			
	१०	७		२७	८	४	४४	२४		६१	१४			
	११	६		२८	८		४५	३३	६	६२ ट	११			
	१२	६		२९ झ	६		४६	१४		६३	११			
	१३	६		३०	५		४७	३१		६४	६			
	१४	६		३१	५		४८ ञ	२२		६५	६			
	१५	१९		३२	५		४९	१५		६६	११			
२	१६	४८		३३	५	५	५०	१५		६७	११			
	१७ ज	१५		३४	५		५१	१६		६८	११			

छ चतुर्थाष्टके पञ्चमाध्यायारम्भः। अत्र ३० वर्गाः।
ज ,, षष्ठाध्यायारम्भः। अत्र २९ वर्गाः।
झ ,, सप्तमाध्यायारम्भः। अत्र ३९ वर्गाः।
ञ ,, अष्टमाध्यायारम्भः। अत्र ३२ वर्गाः।
ट पञ्चमाष्टके प्रथमाध्यायारम्भः। अत्र २७ वर्गाः।

(चित्रम् १०)

सप्तमे मण्डले ६ अनुवाकाः, १०४ सूक्तानि, ८४१ मन्त्राः सन्ति । तद्विभागस्त्वित्थम्—

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१	१	२५		२२ ड	९		४३	५		६४	५		८५	५
	२ ठ	११		२३	६		४४	५		६५	५		८६	८
	३	१०		२४	६		४५	४		६६	१९		८७	७
	४	१०		२५	६		४६	४		६७	१०		८८	७
	५	९		२६	५		४७	४		६८	९		८९	५
	६	७		२७	५		४८	४		६९	८	६	९०	७
	७	७		२८	५		४९	४		७०	७		९१	७
	८	७		२९	५		५०	४	५	७१	६		९२	५
	९	६		३०	५		५१	३		७२	५		९३	८
	१०	५		३१	१२		५२	३		७३	५		९४	१२
	११	५		३२	२७		५३	३		७४	६		९५	६
	१२	३		३३	१४		५४	३		७५	८		९६	६
	१३	३	३	३४	२५		५५	८		७६	७		९७	१०
	१४	३		३५	१५	४	५६	२५		७७	६		९८	७
	१५	१५		३६ ढ	९		५७	७		७८	५		९९	७
	१६	१२		३७	८		५८	६		७९	५		१००	७
	१७	७		३८	८		५९	१२		८०	३		१०१ थ	६
२	१८	२५		३९	७		६० ण	१२		८१ त	६		१०२	३
	१९	११		४०	७		६१	७		८२	१०		१०३	१०
	२०	१०		४१	७		६२	६		८३	१०		१०४	२५
	२१	१०		४२	६		६३	६		८४	५			

ठ पञ्चमाष्टके द्वितीयाध्यायारम्भः अत्र ३० वर्गाः ।
ढ ,, चतुर्थाध्यायारम्भः अत्र ३० वर्गाः ।
त ,, षष्ठाध्यायारम्भः अत्र २४ वर्गाः ।
ड पञ्चमाष्टके तृतीयाध्यायारम्भः अत्र ३० वर्गाः ।
ण ,, पञ्चमाध्यायारम्भः अत्र २७ वर्गाः ।
थ ,, सप्तमाध्यायारम्भः अत्र ३३ वर्गाः ।

(चित्रम् ११)

अष्टमे मण्डले १० अनुवाकाः, १०३ सूक्तानि, १७१६ मन्त्राः सन्ति। तद्विभागस्त्वित्थम्-

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१	१	३४		२२	१८		४३	३३		६४	१२		८५	[illegible]
	२	४२		२३	३०		४४	३०		६५	१२		८६	[illegible]
	३	२४		२४	३०		४५	४२		६६	१५		८७	[illegible]
	४	२१		२५	२४		४६ फ	३३	८	६७	२१		८८	[illegible]
	५ द	३९		२६	२५		४७	१८		६८ ब	१९		८९	७
२	६	४८		२७	२२		४८	१५		६९	१८	१०	९०	६
	७	३६		२८	५	वालखिल्येष्वनुवाकविभागो नास्ति (४९—५९)	४९	१०		७०	१५		९१	७
	८	२३		२९	१०		५०	१०		७१	१५		९२	३३
	९	२१		३०	४		५१	१०		७२	१८		९३	३४
	१०	६		३१	१८		५२	१०		७३	१८		९४	१२
	११ ध	१०		३२ प	३०		५३	८		७४	१५		९५	९
	१२	३३		३३	१९		५४	८		७५	१६		९६	२१
३	१३	३३		३४	१८		५५	५		७६	१२		९७	१५
	१४	१५		३५	२४		५६	५		७७	११		९८ म	१२
	१५	१३	५	३६	७		५७	४	९	७८	१०		९९	८
	१६	१२		३७	७		५८	३		७९	९		१००	१२
	१७	१५		३८	१०		५९	७		८०	१०		१०१	१६
	१८	२२		३९	१०	७	६०	२०		८१	९		१०२	२२
	१९	३७		४०	१२		६१	१८		८२ भ	९		१०३	१४
	२०	२६		४१	१०		६२	१२		८३	९			
४	२१ न	१८	६	४२	६		६३	१२		८४	९			

द पञ्चमाष्टके अष्टमाध्यायारम्भः अत्र ३१ वर्गाः।
न षष्ठाष्टके द्वितीयाध्यायारम्भः अत्र ४० वर्गाः।
फ ,, चतुर्थाध्यायारम्भः अत्र २४ वर्गाः।
भ ,, षष्ठाध्यायारम्भः अत्र ३८ वर्गाः।

ध षष्ठाष्टके प्रथमाध्यायारम्भः अत्र ४० वर्गाः।
प ,, तृतीयाध्यायारम्भः अत्र ४१ वर्गाः।
ब पञ्चमाध्यायारम्भः अत्र ३८ वर्गाः।
म ,, सप्तमाध्यायारम्भः अत्र ३१ वर्गाः।

(चित्रम् १२)

नवमे मण्डले ७ अनुवाकाः, ११४ सूक्तानि, ११०८ मन्त्राः सन्ति। तद्विभागस्त्वित्थम्—

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१	१	१०		१९	७		३७	६		५५	४		७३	९
	२	१०		२०	७		३८	६		५६	४		७४	९
	३	१०		२१	७		३९	६		५७	४		७५	५
	४	१०		२२	७		४०	६		५८	४		७६ व	५
	५	११		२३	७		४१	६		५९	४		७७	५
	६	९		२४	७		४२	६		६०	४		७८	५
	७	९	२	२५	६		४३ र	६	३	६१	३०		७९	५
	८	९		२६	६		४४	६		६२	३०		८०	५
	९	९		२७	६		४५	६		६३	३०		८१	५
	१०	९		२८	६		४६	६		६४	३०		८२	५
	११	९		२९	६		४७	५		६५ ल	३०		८३	५
	१२	९		३०	६		४८	५		६६	३०		८४	५
	१३ य	९		३१	६		४९	५		६७	३२		८५	१२
	१४	८		३२	६		५०	५	४	६८	१०	५	८६	४८
	१५	८		३३	६		५१	५		६९	१०		८७	९
	१६	८		३४	६		५२	५		७०	१०		८८	८
	१७	८		३५	६		५३	४		७१	९		८९	७
	१८	७		३६	६		५४	४		७२	९		९०	६

य षष्ठाष्टके अष्टमाध्यायारम्भः। अत्र ३३ वर्गाः।
र सप्तमाष्टके प्रथमाध्यायारम्भः। अत्र ४१ वर्गाः।
ल ,, द्वितीयाध्यायारम्भः। अत्र ३३ वर्गाः।
व ,, तृतीयाध्यायारम्भः। अत्र २६ वर्गाः।

२

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
	९१ श	६		९६	२४		१०१ ष	१६		१०६	१४		१११	[illegible]
	९२	६	६	९७	५८		१०२	८		१०७	२६		११२	[illegible]
	९३	५		९८	१२		१०३	६		१०८	१६		११३	[illegible]
	९४	५		९९	८	७	१०४	६		१०९	२२		११४	[illegible]
	९५	५		१००	९		१०५	६		११०	१२			

(चित्रम् १३)

दशमे मण्डले १२ अनुवाकाः, १९१ सूक्तानि, १७५४ मन्त्राः सन्ति। तद्विभागस्त्वित्थम्—

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
१	१	७		१२	९		२३	७		३४	१४		४५	[illegible]
	२	७		१३	५		२४	६		३५	१४		४६ ॐ	१०
	३	७		१४	१६		२५	११		३६	१४		४७	[illegible]
	४	७		१५	१४		२६	९		३७	१२		४८	११
	५	७		१६	१४		२७	२४		३८	५		४९	११
	६ स	७	२	१७	१४		२८	१२		३९	१४		५०	[illegible]
	७	७		१८	१४		२९	८		४०	१४		५१	[illegible]
	८	९		१९ ह	८	३	३०	१५		४१	३		५२	[illegible]
	९	९		२०	१०		३१	११		४२	११		५३	[illegible]
	१०	१४		२१	८		३२	९	४	४३	११		५४	[illegible]
	११	९		२२	१५		३३ •	९		४४	११		५५	[illegible]

श सप्तमाष्टके चतुर्थाध्यायारम्भः अत्र २८ वर्गाः। ष सप्तमाष्टके पञ्चमाध्यायारम्भः अत्र ३३ वर्गाः।

स „ षष्ठाध्यायारम्भः अत्र २८ वर्गाः। ह „ सप्तमाध्यायारम्भः अत्र ३० वर्गाः।

• „ अष्टमाध्यायारम्भः अत्र २४ वर्गाः। ॐ अष्टमाष्टके प्रथमाध्यायारम्भः अत्र ३० वर्गाः।

२

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
	५६	७		७६	८		९६	१३		११६	९		१३६	७
	५७	६		७७	८		९७	२३		११७	९		१३७	७
	५८	१२		७८	८		९८	१२		११८	९		१३८	६
	५९	१०		७९	७		९९	१२		११९	१३		१३९	६
	६०	१२		८०	७	९	१००	१२		१२० ळ	९		१४०	६
५	६१	२७		८१	७		१०१	१२		१२१	१०		१४१	६
	६२ ५	११		८२	७		१०२	१२		१२२	८		१४२	८
	६३	१७		८३	७		१०३	१३		१२३	८		१४३ लृ	६
	६४	१७		८४	७		१०४	११		१२४	९		१४४	६
	६५	१५	७	८५	४७		१०५	११		१२५	८		१४५	६
	६६	१५		८६ ५क	२३		१०६ ५	११		१२६	८		१४६	६
	६७	१२		८७	२५		१०७	११		१२७	८		१४७	५
	६८	१२		८८	१९		१०८	११		१२८	९		१४८	५
६	६९	१२		८९	१८		१०९	७	११	१२९	७		१४९	५
	७०	११		९०	१६		११०	११		१३०	७		१५०	५
	७१	११	८	९१	१५		१११	१०		१३१	७		१५१	५
	७२	९		९२	१५		११२	१०		१३२	७	१२	१५२	५
	७३ अः	११		९३	१५	१०	११३	१०		१३३	७		१५३	५
	७४	६		९४	१४		११४	१०		१३४	७		१५४	५
	७५	९		९५ ५प	१८		११५	९		१३५	७		१५५	५

५ अष्टमाष्टके द्वितीयाध्यायारम्भः अत्र २४ वर्गाः। अः अष्टमाष्टके तृतीयाध्यायारम्भः अत्र २८ वर्गाः।
५क " चतुर्थाध्यायारम्भः अत्र ३१ वर्गाः। ५प " पञ्चमाध्यायारम्भः अत्र २७ वर्गाः।
५ " षष्ठाध्यायारम्भः अत्र २७ वर्गाः। ळ " सप्तमाध्यायारम्भः अत्र ३० वर्गाः।
लृ " अष्टमाध्यायारम्भः अत्र ४१ वर्गाः।

३

अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः	अनुवाकः	सूक्तम्	मन्त्राः
	१५६	५		१६४	५		१७२	४		१८०	३		१८८	३
	१५७	५		१६५	५		१७३	६		१८१	३		१८९	३
	१५८	५		१६६	५		१७४	५		१८२	३		१९०	३
	१५९	६		१६७	४		१७५	४		१८३	३		१९१	४
	१६०	५		१६८	४		१७६	४		१८४	३			
	१६१	५		१६९	४		१७७	३		१८५	३			
	१६२	६		१७०	४		१७८	३		१८६	३			
	१६३	६		१७१	४		१७९	३		१८७	५			

अस्मिन् ऋग्वेदे दश (१०) मण्डलानि, पञ्चाशीतिः (८५) अनुवाकाः, एकसहस्रमष्टाविंशतिश्च (१०२८) सूक्तानि, अथ च अष्टौ (८) अष्टकाः, चतुःषष्टिः (६४) अध्यायाः, चतुर्विंशत्यधिके द्वे सहस्रे (२०२४) वर्गाः । मन्त्राश्च दश सहस्रं पञ्चशतं द्वाविंशतिश्च (१०५२२) सन्तीति बोध्यम् ।

(महर्षिभाष्यम्)

स एतैः पूर्वोक्ताष्टकाध्यायवर्गमण्डलानुवाकसूक्तमन्त्रै-र्भूषितोऽयमृग्वेदोऽस्तीति वेदितव्यम् ।

ऋ० भा० १ । १ । १ ॥

अपौरुषेयोऽयमष्टकाध्यायवर्गमण्डलानुवाकसूक्तमन्त्रविभागः, नत्वार्षः । इत्यनेन–

अष्टकाध्यायविच्छेदः पुराणैर्ऋषिभिः कृतः ।
उद्ग्राहार्थं प्रदेशानामिति मन्यामहे वयम् ॥
वर्गाणामपि निर्देश आर्ष एवेति निश्चयः ।
ब्राह्मणेष्वपि दृश्यन्ते वर्गसंशब्दनादि च ॥

(वेङ्कट माधव ऋ० भा० ५ । ५ ।)

१–प्रदेशानाम् उद्ग्राहार्थम् = उदाहरणनिर्देशार्थमित्यर्थः ।

इत्यादि वेङ्कटमाधवोक्तमपास्तम् ।

अत्राह महर्षिः—

अत्राष्टकादीनां विधानमेतदर्थमस्ति यथा सुगमतया पठनपाठन-मन्त्रपरिगणनं विद्याप्रकरणबोधश्च भवेदेतदर्थमेतद् विधानं कृतमस्तीति।

(ऋग्वेदादिभाष्यभूमिका प्रश्नोत्तरविषयः पृ० ६८६)

इदमत्रानुसन्धेयम्—मन्त्राणामर्थवैविध्यात् कश्चिदर्थोऽनुवाके समाप्यते किंचित् प्रकरणं सूक्ते समाप्तिं निगच्छति तथा ऽपरश्च विषयो मण्डले समाप्तो भवति । एवमादिरर्थविषयविभागतः परिच्छेदः । सचायमपौरुषेयो विभागो न तु ऋषिभिः कर्तुं शक्यते मन्त्राणां विविधार्थस्य ब्रह्मणा निर्धारितत्वात् । तथाहि—

अष्टावध्याया यस्मिन् सो ऽष्टकः । प्रत्यष्टकमष्टावध्याया भवन्ति । अधीयते पठ्यते कश्चिद् विशिष्टविषयो यस्मिन् सो ऽध्यायः । वर्जनं वर्गः समानविभागेन पृथक्करणम् । वर्गैर्मन्त्राणां प्रायः समानविभागः क्रियते । मण्डयति भूषयति विशिष्टं प्रकरणमिति मण्डलम् । अनूच्यते अनुक्रमेण कथ्यते कश्चिद् विषयो यस्मिन् सोऽनुवाकः । सुष्ठूच्यते सम्यक्तया वर्ण्यते किंचित् प्रकरणं यत्र तत् सूक्तम् । मन्त्रा मननात् कश्चिद् गम्भीरप्रज्ञ एव मन्त्रानवबोद्धुं समर्थ इति ।

(मण्डलेष्वनुवाकसंख्यामाह शौनकः—)

आद्ये चतुर्विंशाति (२४) ह्यनुवाकाः ।
अत परं मण्डलं यच्चतुष्कम् (४) ।
द्वे पञ्चके (५–५) त्रीणि षट्कानि (६–६–६) चैव ।
दशा (१०) ष्टकं, सप्त (७) नवमं, द्वादशान्त्यम् (१२) ॥

(शौनकानुक्रमणी ३२)

अस्यायमर्थः–आद्ये प्रथमे मण्डले चतुर्विंशतिः अनुवाकाः । अतः परं यत् मण्डलं द्वितीयमित्यर्थस्तत्र चतुष्कं चत्वारोऽनुवाकाः । द्वे पञ्चके=अतःपरं द्वयोर्मण्डलयोस्तृतीयचतुर्थयोरित्यर्थः पञ्च पञ्चानुवाकाः । त्रीणी षट्कानि=अतः परं त्रिषु मण्डलेषु पञ्चमषष्ठसप्तममण्डलेष्वित्यर्थः षट् षट् अनुवाकाः । दशाष्टकम्=अष्टमे मण्डले दशानुवाकाः । सप्त नवमं=नवमे मण्डले सप्तानुवाकाः । द्वादशान्त्यम्=अन्तिमे मण्डले दशमे मण्डल इत्यर्थः द्वादश अनुवाकाः सन्ति ।

(मण्डलेषु सूक्तसंख्यामाह शौनकः—)

१—एकाधिका स्यात् नवतिः शतं (१९१) च ।
वदन्ति वै मण्डलमादितो यत् ।
२—चत्वारिंशत् त्रीणि (४३) चाहुर्द्वितीयम् ।
३—सूक्ते च षाष्टिं च (६२) तृतीयमाहुः ॥ ३३ ॥
४—अष्टापञ्चाशदपि (५८) यच्चतुर्थम् ।
५—सप्ताधिकाशीति (८७) रतः परं स्यात् ॥
६—पञ्चाधिका सप्तति (७५) रुत्तरं तु ।
७—चत्वारि वाशिष्ठमथो शतं (१०४) च ॥ ३४ ॥
८—द्वे चैव सूक्ते नवतिं (९२) च विद्यादथाष्टमम् ।
९—नवमं वै शतं स्यात् चतुर्दश प्याहुराधिकान्यप्य् (११४) ।
१०—आद्ये यदुक्तं दशमे तथैव (१९१) ॥ ३५ ॥
एतत् सहस्रं दश सप्त (१०१७) चैव ।
अष्टावतो वाष्कलके ऽधिकानि (१०२५) ।
तान् पारणे शाकले शैशिरीये ।
वदन्ति शिष्टा न खिलेषु विप्राः ॥ ३६ ॥
पञ्चाशीति द्वांशतये ऽनुवाका
दृष्टाः पुराणे ऋषिभिर्महात्माभिः ।
यस्तान् ऋग्विद् वेद चैवाप्यधीते
नाकपृष्ठं भजते ह शश्वत् ॥ ३७ ॥
अध्यायनां चतुः षाष्टि (६४) मंण्डलानि दशैव (१०) तु
वर्गाणां तु सहस्रे द्वे संख्याते च षडुत्तरे (२००६) ॥ ३८ ॥
सहस्रमेतत् सूक्तानां निश्चितं खैलिकैर्विना ।
दश सप्त (१०१७) च पठ्यन्ते संख्यातं वै पदक्रमम् ॥ ३९ ॥
ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ।
ऋचामशीतिः पादश्च पारणं संप्रकीर्तितम् ॥ ४३ ॥
(शौनकानुक्रमणी ३३–३९, ४३)

अस्यायमर्थः—आदितो यन्मण्डलं प्रथमं तत्र १९१ सूक्तानि वदन्ति। द्वितीयं यन् मण्डलं तत्र ४३ सूक्तानि वदन्ति। तृतीयं यन् मण्डलं तत्र सूक्ते=सूक्तद्वयं षष्टिं च (६२) आहुः। यच्चतुर्थं मण्डलं तत्र ५८ सूक्तान्याहुः। अतः परं यत् पञ्चमं मण्डलं तत्र ८७ सूक्तान्याहुः। उत्तरं तु=अतः परं यत् षष्ठं मण्डलं तत्र ७५ सूक्तान्याहुः। अथो=अतः परं यत् सप्तमं मण्डलं यस्य वशिष्ठ ऋषिस्तत्र मण्डले १०४ सूक्तान्याहुः। अथाष्टमं यन् मण्डलं तत्र ९२ सूक्तानि विद्यात्। (अष्टमे मण्डले एकादश (११) खिलसूक्तानि तत्संकलनेन ९२+११=१०३ सूक्तानि भवन्ति)। यन् नवमं मण्डलं तत्र शतं चतुर्दश च (११४) अप्याहुः सूक्तानि। 'प्याहुः' इत्यत्र "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इत्यपिशब्दस्याकारलोपः। चतुर्दश त्वाहुरित्यन्ये पठन्ति। आद्ये=प्रथमे मण्डले यदुक्तम्=१९१ सूक्तानि तावन्ति वदन्तीति दशमे तथैव १९१ सूक्तानि। दाशतये[1]=ऋग्वेदे पञ्चाशीतिः (८५) अनुवाकाः पुराणैर्महात्मभिर्दृष्टाः।ताननुवाकान् शाकल्यशिष्यशैशिरिप्रोक्तशाखा-[2]पारायणे शिष्टा विप्रा वदन्ति, परं न खिलेषु-खिलेष्वनुवाकविभागो नास्ति। य ऋग्वेदवेत्ता तान् अनुवाकादीन् वेद, अपि चैवाधीते स ह शश्वत् सदा नाकपृष्ठं मोक्षपदं भजत इत्यर्थवादः। अस्मिन् ऋग्वेदे चतुःषष्टिः (६४) अध्यायाः। दश (१०) मण्डलानि। २००६ वर्गाः (खिलेषु १८ वर्गास्तत्संकलनेन २०२४ वर्गा भवन्ति)। ऋग्वेदस्य सर्वासु शाखासु १०५८० मन्त्रा एकः पादश्च भवन्ति इति शौनकमते पारायणसंख्या। शिष्टं २५ पृष्ठे व्याख्यातम्—महर्षिभाष्ये १०५८९ संख्या।

अस्मिन् व्याख्यास्यमान ऋग्वेदे १०५२२ मन्त्राः सन्तीति महर्षेरभिमतं तत्र विविधमतविवेचनं क्रियते।

१—दश अवयवा मण्डलाख्या यस्य तस्मिन् दाशतये=ऋग्वेदे। दशन् शब्दात् 'संख्याया अवयवे तयप्' शब्दानु० ५।२।४२॥ इति तयप्। स्वार्थेऽण् प्रत्यये दाशतय शब्दो निष्पद्यते। 'टिड्ढाणञ्०' शब्दानु० ४।१।१५॥ इति दशतयशब्दाद् ङीपि दशतयी शब्दः सिध्यति। दशतयी शब्दः निरुक्त ७।८। इत्यादिस्थलेषु द्रष्टव्यः। 'दाशतयी' इति च।

२—शाकल्यस्य पञ्च शिष्याः। मुद्गलो गालवः शालीयो वात्स्यः शैशिरिश्च। सर्वे शिष्यास्तैः प्रोक्ताः शाखाश्च शाकलनाम्ना प्रसिद्धा इत्यनुसन्धेयम्।

ऋग्वेदभाष्य को नीचे लिखे प्रकार से महर्षि प्रारम्भ करते हैं—

ऋग्वेदः

("अथर्ग्वेदभाष्यारम्भः)

भाष्य भाषा—(अथ) चारों वेदों और वेदों की शाखा आदि में विद्यमान विषयों पर चतुर्वेदविषयसूचीरूप ग्रन्थ लिख कर और ऋग्वेद के अति विस्तृत भाष्य का प्रकार भी दिखा कर तथा ऋग्वेदादिभाष्यभूमिका का निर्माण करने के अनन्तर (ऋग्वेदभाष्यारम्भः) ऋग्वेद के इस भाष्य का आरम्भ [किया जाता है]।

प्रदीप भाषा—संवत् १९३३ अगहन मास की पूर्णिमा के दिन ऋग्वेदादिभाष्यभूमिका महर्षि ने पूर्ण की उन दिनों ऋषिवर बरेली नगर में विराजमान थे।

अथ शब्द यहाँ मङ्गलवाचक भी है। अथ शब्द को मङ्गलवाची बताने के लिये अर्थवाद के रूप में इस प्रकार कहा गया है कि—

'ओ३म्' और 'अथ' शब्द ऐसे हैं मानो ब्रह्म का कोई मुख हो और उसमें से ये दोनों शब्द निकले हों। ये दोनों शब्द 'ओ३म्' और 'अथ' माङ्गलिक हैं। अथवा (ब्रह्म) ब्रह्माण्ड की प्रथम ध्वनि ओ३म् और अथ शब्द हैं।

ओङ्कारं वेदेषु । अथकारं भाष्येषु ॥ य० प्रा० १ । १८, १९ ॥

इस कथन के अनुसार अथ शब्द का प्रयोग भाष्य के प्रारम्भ में महर्षि ने किया है।

भाष्य को आरम्भ करते हुए सर्वप्रथम ऋषिवर अपनी अति प्रिय ऋचा 'विश्वानि देव०' को स्मरण करते हैं। उसका प्रकरणसंगत अर्थ ऋग्वेदादिभाष्यभूमिका में व्याख्यात का आश्रय लेकर अर्थ किया जाता है—

भा० भा०—हे (देव) सूर्य आदि सकल जगत् के और विद्या के प्रकाशक, हे (सवितः) सकल जगत् के निर्माण कर्ता प्रभो! आप (नः) हमारे (विश्वानि) सब (दुरितानि) इस वेदभाष्य करने के अनुष्ठान में जो दुष्ट विघ्न हैं उनको (परासुव) प्राप्त होने से पूर्व ही दूर कर दीजिये। और (यत्) जो इस अनुष्ठान में हमारे शरीर में आरोग्य, बुद्धि, सज्जनों का सहाय, चतुरता और सत्यविद्या के प्रकाश आदि (भद्रम्) कल्याण हैं (तत्) उस सब को (नः) हमारे लिये (आ सुव) प्राप्त कराइए।

(भाष्य के आरम्भ में महर्षिकृत मङ्गलश्लोक)

(या चतुर्वेदसंस्तावना) जो चारों वेदों की संस्तावना ऋग्वेदादिभाष्यभूमिका (विद्यानन्दम्) ज्ञानविज्ञानात्मक विद्या के ब्रह्मानन्दसहोदर आनन्द को (सम्+अवति) निरन्तर देती है [उस को] (संपूर्य) विषय निर्देश की उत्कृष्टता और भाषा आदि के औचित्य के साथ पूर्ण करके (निगमनिलयम्) वेदों के आधार (ईशम्) प्रभु को (संप्रणम्य) सर्वात्मना और सादर प्रणाम करके (अथ) उपर्युक्त का निर्माण करके अथवा विस्तृत वेदभाष्य को छोड़ कर समाप्त करने की इच्छा से अब (वेदत्र्यङ्क विधुयुतसरे) १९३४ विक्रमसंवत्सर (मार्गशुक्ले) अगहनमास के शुक्ल पक्ष में (अङ्गभौमे)

६ तिथि मङ्गलवार के दिन (हि) निश्चित रूप से (अखिलगुणगुणिज्ञानदातुः) संसार के समस्त पदार्थों और उन पदार्थों के गुणों का ज्ञान देने वाले (ऋग्वेदस्य) ऋग्वेद के (भाष्यम्) भाष्य को मैं स्वामी दयानन्द सरस्वती (कुर्वे) प्रारम्भ कर रहा हूं।

प्र० भा०—'चतुर्वेदसंस्तावना' इस से महर्षि ने यह सिद्धान्त प्रकट किया है कि अपौरुषेय वेद चार हैं तीन नहीं। 'विद्यानन्द' इस से ऋषिवर वेदाध्ययन की आवश्यकता क्यों है यह बताते हैं। 'निगमनिलयम्' इस से वेदों का अपौरुषेयत्व दर्शाया है। 'ईशम्' शब्द यह दर्शाता है कि क्योंकि प्रभु हमारा स्वामी है अतः हमारे कल्याण के लिये उसने हमें वेद दिये। 'संपूर्य' में सम् उपसर्ग यह भाव प्रकट करता है कि ऋग्वेदादिभाष्यभूमिका एक उत्कृष्ट ग्रन्थ है और उसमें विषयों का निर्देश उचित ढंग से किया गया है। 'संप्रणम्य' में सम् उपसर्ग इस भाव का दर्शक है कि महर्षि के सर्वस्व प्रभु हैं उस प्रभु को सर्वात्मना प्रणाम कर रहे हैं और प्र उपसर्ग आदर वाचक कहा है। उपसर्गों के अनेक अर्थ संस्कृतभाष्य में देखो।

संवत्सर आदि लिखने में अङ्कों को विशेष शब्दों से निर्देश किया जाता है जैसे १ संख्या को चन्द्र कहेंगे क्योंकि चन्द्रमा एक है इत्यादि। और ये अङ्क जिस क्रम से कहे जाते हैं उस से उलटे क्रम से रखे जाते हैं। जैसे यहाँ वेद ४, त्रि ३, अङ्क ६, विधु=चन्द्र १, १६३४ विक्रम संवत्सर। अङ्ग शब्द ६ का वाचक है क्योंकि वेदाङ्ग ६ हैं।

ऋग्वेदादिभाष्यभूमिका के खण्डन पर भूमिकाभास नाम का ग्रन्थ छपा था उसमें लिखा है कि स्वामी दयानन्दसरस्वती संवत्सर लिखते समय 'मित' शब्द को विना लगाये संवत्सर का निर्देश करते हैं। जैसे ऋग्वेदादिभाष्यभूमिका में स्वामी दयानन्द सरस्वती ने लिखा है "कालरामाङ्कचन्द्रेऽब्दे" और यहाँ ऋग्वेदभाष्य में लिखा है "वेदत्र्यङ्के"। ठीक यह होता कि कालरामाङ्कचन्द्रमिते और "वेदत्र्यङ्कमिते" लिखते। भूमिकाभासकार का यह कहना नितान्त अज्ञानतापूर्ण है क्योंकि मित शब्द विना लगाये भी विद्वान् संवत्सर को लिखते हैं जैसे वाचस्पतिमिश्र ने बिना मित शब्द लगाये संवत्सर का निर्देश किया है। यथा—"वस्वङ्कवसुवत्सरे"। विशेष प्रमाण संस्कृतभाष्य में देखो पृ० २०। इस श्लोक में मन्दाक्रान्ता छन्द है।

भा० भा०—(ऋग्भिः स्तुवन्ति) ताण्ड्यमहाब्राह्मण आदि में यह वर्णन है कि ऋग्वेद के मन्त्रों के सहाय से विद्वान् लोग पदार्थों के गुणों का वर्णन करते हैं [जैसे सार्पराज्ञी ब्रह्मवादिनी ऋषिका ने जिन मन्त्रों के अर्थों का साक्षात्कार किया है ऋग्वेद के उन मन्त्रों (आयं गौः पृश्निरक्रमीत्० ऋ० १०। १८९। १ इत्यादि) से पृथिवी का वर्णन किया जाता कि यह भूगोल जल के सहित सूर्य के चारों ओर घूमता जाता है]। (इत्युक्तत्वात्) ताण्ड्यब्राह्मणकार आदि ऋषियों के ऐसे वचनों से यह सिद्ध है कि ऋग्वेद के मन्त्र सब वस्तुओं के गुणों का वर्णन करते हैं अतः (एते) ये (विद्वांसः) विद्वान् लोग (उक्तपूर्वम्) जैसा पूर्व वर्णन किया है कि ऋग्वेद संसार के समस्त पदार्थों और पदार्थों के गुणों का ज्ञान देने वाला है ऐसे (ऋग्वेदम्) ऋग्वेद को (वेदार्थज्ञानसाहित्यपठनपुरःसरम्) वेदार्थ ज्ञान

में सहायक अङ्ग उपाङ्ग आदि जितना साहित्य है उस सब के पठन पूर्वक (अधीत्य) पढ़कर (तत्रस्थैः मन्त्रैः) ऋग्वेद में वर्तमान १०५२२ मन्त्रों से (ईश्वरम् आरभ्य भूमि पर्यन्तानां पदार्थानाम्) ईश्वर से लेकर पृथिवी पर्यन्त सब पदार्थों के (गुणान्) गुणों को (यथावत्) ठीक तरह से (विदित्वा) समझ कर (कार्येषु) संसार के मनुष्यों के उपकारकार्य में (मतिं जनयन्ति) अपने उस ज्ञान का प्रयोग करते हैं अथवा (कार्येषु) क्रिया में (मतिं जनयन्ति) अपनी बुद्धि या उस ज्ञान का प्रयोग करते हैं अर्थात् क्रियात्मकरूप से करके देखते हैं।

(अनया) इस ऋचा से (पदार्थानाम्) पदार्थों के (गुणकर्मस्वभावान्) गुण क्रिया और स्वभावों का (ऋचन्ति=स्तुवन्ति) वर्णन करते हैं अतः (सा ऋक्) वह ऋचा कहाती है ऋक् और वेद (जो यह सत्य सत्य ज्ञान का हेतु है) मिलकर ऋग्वेद शब्द बनता है। वेदशब्द की अनेक व्युत्पत्तियां ऋग्वेदादिभाष्यभूमिका के वेदोत्पत्ति विषय में देखो (ऋग्वेदादि० पृष्ठ २८२, २८३)

(एतस्मिन्) इस ऋग्वेद में ("अग्निमीळे" इत्यारभ्य 'यथा वः सुसहासति' पर्यन्ते) प्रथम मन्त्र' अग्निमीळे पुरोहितम्०' इत्यादि से लेकर 'यथा वः सुसहासति०' इस अन्तिम मन्त्र तक (अष्टौ अष्टकाः सन्ति) आठ अष्टक हैं (तत्र एकैकस्मिन्) उन आठ अष्टकों में एक एक में (अष्टौ अष्टौ अध्यायाः सन्ति) आठ आठ अध्याय हैं। (तेषाम्) उन अध्यायों के मध्य में (एकैकस्य) एक एक अध्याय की (प्रत्यध्यायम्) अध्यायक्रम से (वर्गाः संख्यायन्ते) वर्गों की संख्या भी लिखी जाती है [देखो पृष्ठ २३

(इयं संख्या) यह पृष्ठ २३ में लिखी संख्या (प्रत्यष्टकम् वेदितव्या) अष्टक क्रम से प्रत्येक अष्टक की जानो। (सर्वेषु अष्टकेषु) सब आठों अष्टकों में (सर्वे वर्गाः संयुक्ताः) सब वर्ग मिल कर (चतुर्विंशत्यधिके द्वे सहस्रे) चौबीस अधिक दो सहस्र अर्थात् २०२४ (सन्ति) हैं।

(तथा) और (अस्मिन् ऋग्वेदे) इस ऋग्वेद में (दश मण्डलानि सन्ति) दश मण्डल हैं।

प्र० भा०—ऋग्वेद का विभाग दो प्रकार से है—

१—अष्टक, अध्याय, वर्ग, मन्त्र। २—मण्डल, सूक्त, मन्त्र। जहाँ मन्त्र के आगे चार अङ्क लिखें हों वहाँ अष्टक अध्याय वर्ग मन्त्र विभाग जानो। और जहाँ मन्त्र के आगे तीन अङ्क हों वहाँ मण्डल सूक्त मन्त्र विभाग समझो। ऋग्वेद में आठ अष्टक हैं और प्रत्येक अष्टक में आठ आठ अध्याय हैं इस प्रकार ६४ अध्याय हैं। प्रत्येक अध्याय में कितने वर्ग और मन्त्र हैं यह बात चित्र सं० २ में पृष्ठ २४ पर देखो। वर्ग प्रायः पाँच पाँच मन्त्रों पर नियत किया गया है। यदि सूक्त में पाँच से विभाग होने पर पाँच से कुछ कम या कहीं अधिक मन्त्र होते हैं तो ४, ३, या ६ आदि पर भी वर्ग की समाप्ति देखी जाती है। प्रत्येक अध्याय से वर्गसंख्या प्रारम्भ होती है और उस अध्याय की समाप्ति होने पर दूसरे अध्याय से फिर नई वर्ग संख्या

प्रारम्भ हो जाती है। पर वर्ग का पाँच पाँच का विभाग प्रत्येक सूक्त पर अलग किया जाता है अध्याय भी सूक्त के प्रारम्भ से ही आरम्भ होता है। और अष्टक भी किसी सूक्त की समाप्ति पर ही समाप्त होता है। अतः ये दोनों विभाग सर्वथा एक दूसरे से पृथक नहीं हैं।

ऋग्वेद का दूसरा विभाग मण्डल सूक्त और मन्त्रों के क्रम से है। इसके अन्तर्गत अनुवाक विभाग भी है। उसको चित्र सं० ३ में पृष्ठ २५ पर देखो। ये सब विभाग मन्त्रों में प्रतिपादित विषयों के दृष्टिकोण से हैं। ऋग्वेद में दश मण्डल हैं और प्रत्येक मण्डल में सूक्त और मन्त्र आदि का विभाग ऋषि प्रदर्शित शैली से दिखाते हैं—

प्रथम मण्डल में २४ अनुवाक हैं और १९१ सूक्त तथा १९७६ मन्त्र हैं। उनका विभाग चित्र संख्या ४ में पृष्ठ २६–२८ पर देखो।

द्वितीय मण्डल में ४ अनुवाक हैं और ४३ सूक्त तथा ४२९ मन्त्र हैं। उनका विभाग चित्र सं० ५ में पृष्ठ २८ पर देखो।

तृतीय मण्डल में ५ अनुवाक हैं और ६२ सूक्त तथा ६१७ मन्त्र हैं। उनका विभाग चित्र सं० ६ में पृष्ठ २९ पर देखो।

चतुर्थ मण्डल में ५ अनुवाक हैं और ५८ सूक्त तथा ५८९ मन्त्र हैं। उनका विभाग चित्र सं० ७ में पृष्ठ ३० पर देखो।

पञ्चम मण्डल में ६ अनुवाक हैं और ८७ सूक्त हैं तथा ७२७ मन्त्र हैं। उनका विभाग चित्र सं० ८ में पृष्ठ ३१ पर देखो।

षष्ठ मण्डल में ६ अनुवाक हैं और ७५ सूक्त हैं तथा ७६५ मन्त्र हैं। उनका विभाग चित्र सं० ९ में पृष्ठ ३२ पर देखो।

सप्तम मण्डल में ६ अनुवाक हैं और १०४ सूक्त हैं तथा ८४१ मन्त्र हैं। उनका विभाग चित्र सं० १० में पृष्ठ ३३ पर देखो।

अष्टम मण्डल में १० अनुवाक हैं और १०३ सूक्त हैं तथा १७१६ मन्त्र हैं। उनका विभाग चित्र सं० ११ में पृष्ठ ३४ पर देखो।

नवम मण्डल में ७ अनुवाक हैं और ११४ सूक्त तथा ११०८ मन्त्र हैं। उनका विभाग चित्र सं० १२ में पृष्ठ ३५-३६ पर देखो।

दशम मण्डल में १२ अनुवाक हैं और १९१ सूक्त हैं तथा १७५४ मन्त्र हैं। उनका विभाग चित्र सं० १३ में पृष्ठ ३६-३८ पर देखो।

मण्डल सूक्त और मन्त्रों के विभाग बताने वाले उपर्युक्त चित्रों में हमने वर्णमाला के ६४ अक्षरों से ६४ अध्यायों पर जो टिप्पण दिये हैं उसमें यह भी साथ साथ दिखाया गया है कि मण्डल और सूक्त के अन्दर कहाँ पर अष्टक प्रारम्भ होते हैं और कहाँ प्रत्येक अष्टक का अध्याय प्रारम्भ होता है और उस अध्याय में कितने वर्ग हैं।

इस प्रकार संपूर्ण ऋग्वेद में १० मण्डल, ८५ अनुवाक, १०२८ सूक्त हैं और ८ अष्टक, ६४ अध्याय, २०२४ वर्ग और १०५२२ मन्त्र हैं।

भा० भा०—(सः अयम् ऋग्वेदः) वह यह ऋग्वेद (पूर्वोक्ताष्टकाध्यायवर्गमण्डलानुवाकसूक्तमन्त्रैः) जैसा ऊपर वर्णन किया है उसके अनुसार अष्टक अध्याय वर्ग तथा मण्डल अनुवाक सूक्त मन्त्रों के विभागों से (भूषितः) सार्थक विभागीकृत है।

प्र० भा०—यह अष्टक अध्याय आदि का विभाग अपौरुषेय है अर्थात् मनुष्यकृत नहीं है। ऋग्वेद के भाष्यकार वेङ्कट माधव ने जो यह कहा है कि अष्टक अध्याय का विभाग ऋषियों ने किया है (देखो पृष्ठ ३८)। यह बात असत्य है। महर्षि स्वामी दयानन्दसरस्वतीजी महाराज ने ऋग्वेदादिभाष्यभूमिका में प्रश्नोत्तर विषय में अष्टक आदि के विभाग के नीचे लिखे कारण बताये हैं।

क. पठन पाठन की सुविधा

ख. मन्त्रों की गणना की सुविधा

ग. और पृथक् पृथक् विद्याओं के अनुसार पृथक् पृथक् प्रकरणों का ज्ञान।

इन विभागों को इस प्रकार समझो—

अष्टक—जिसमें आठ अध्याय हों उसे अष्टक कहते हैं।

अध्याय—जितने में किसी विशेष विषय का प्रतिपादन हो उसको अध्याय कहते हैं।

वर्ग—समान विभाग द्वारा जिसका विभाग सुगमता के लिये किया जाय उसको वर्ग कहते हैं। वर्ग प्रायः पाँच पाँच मन्त्रों पर समाप्त होता है।

मण्डल—प्रकरणविशेष को जो अलंकृत करे उसको मण्डल कहते हैं।

अनुवाक—कोई विषय जिसमें अनुक्रम से कहा जावे उसको अनुवाक कहते हैं।

सूक्त—जिसमें पूर्ण किसी विषय का वर्णन हो उसको सूक्त कहते हैं।

मन्त्र—अत्यन्त मनन करने से जो गूढ़ अर्थों को प्रकाशित करे वह मन्त्र कहाता है। कोई गम्भीर बुद्धिवाला ही मन्त्रार्थ समझने में समर्थ होता है।

यह प्रकरण आदि का विभाग मनुष्य की शक्ति से परे है वह तो ब्रह्म की कृति है।

शौनक ऋषि ने अपनी अनुक्रमणी में मण्डल आदि की संख्या के विषय में लिखा है कि—

प्रथम मण्डल में २४ अनुवाक हैं। उसके आगे जो दूसरा मण्डल है उसमें ४ अनुवाक हैं। उसके आगे के तीसरे और चौथे मण्डल में पाँच पाँच अनुवाक हैं। अगले तीन मण्डलों में अर्थात् पाँचवें, छठे और सातवें मण्डल में छै छै अनुवाक हैं।

अष्टम मण्डल में १० अनुवाक हैं। नवम मण्डल में ७ अनुवाक हैं, और अन्तिम दशम मण्डल में १२ अनुवाक हैं। (संस्कृत प्रमाण पृष्ठ ३९ पर देखो)।

प्रत्येक मण्डल में सूक्तसंख्या के विषय में शौनक ने अपनी अनुक्रमणी में इस प्रकार लिखा है कि—

ऋग्वेद के आदि प्रथम मण्डल को एक अधिक ६० और सौ सूक्तवाला कहते हैं अर्थात् १६१ सूक्त प्रथम मण्डल में हैं। द्वितीय मण्डल ४० और तीन सूक्तवाला है अर्थात् ४३ सूक्त द्वितीय मण्डल में हैं। तृतीय मण्डल में साठ और दो सूक्त अर्थात् ६२ सूक्त हैं। चतुर्थ मण्डल ५८ सूक्तवाला है। उस से अगला पञ्चम मण्डल ८७ सूक्तवाला है। उस से अगला छठा मण्डल ७५ सूक्तवाला है। जिस सम्पूर्ण मण्डल का वशिष्ठ अर्थद्रष्टा ऋषि है उस सप्तम मण्डल में १०४ सूक्त हैं। अष्टम मण्डल में ९२ सूक्त हैं (यह सूक्तसंख्या खिल सूक्तों को छोड़ कर है। अष्टम मण्डल में ११ खिलसूक्त हैं अतः ९२+११=१०३ सूक्त अष्टम मण्डल में हैं। खिलों के सम्बन्ध में आगे विस्तार से लिखेंगे) नवम मण्डल में १४ अधिक सौ अर्थात् ११४ सूक्त हैं, और जितने सूक्त प्रथम मण्डल में बताये हैं उतने ही दशम मण्डल में सूक्त हैं अर्थात् १९१ सूक्त दशम मण्डल में हैं। (खिलों की ११ सूक्तसंख्या छोड़कर) १०१७ सूक्त ऋग्वेद में है। बाष्कलशाखा में इस १०१७ से आठ सूक्त अधिक है अर्थात् १०२५ सूक्त है प्राचीन महात्मा ऋषियों ने दश मण्डलयुक्त ऋग्वेद में ८५ अनुवाक देखे हैं। उन ८५ अनुवाकों का शाकल्यशिष्य शैशिरि प्रोक्त शाखा पारायण में वर्णन करते हैं। परन्तु यह अनुवाक विभाग खिलसूक्तों में नहीं है। जो व्यक्ति इन अनुवाकादि विभागों के अनुसार मन्त्रों को समझता है वह ऋग्वेद को ठीक ठीक समझ कर गुण गुणि ज्ञान प्राप्त कर मोक्ष को प्राप्त करता है। अर्थात् मोक्ष प्राप्ति के अनेक साधनों में यह भी एक साधन विशेष है।

शौनक कहता है कि मन्त्रों के पदक्रम आदि सब की गणना करदी गई है। उसके अनुसार ऋग्वेद की पारायणसंख्या सब शाखामन्त्रों को मिला कर १०५८० और एक पाद है। यह शौनक के मत से लिखा गया है। (संस्कृत प्रमाण के लिये देखो पृष्ठ ४०)

महर्षि के मन्तव्य के अनुसार ऋग्वेद में १०५२२ मन्त्र हैं। मन्त्र संख्या के सम्बन्ध में विशेष कर द्विपदा आदि के विषय में सविस्तर वर्णन आगे करके महर्षि के मत का प्रतिपादन सप्रमाण किया जावेगा। संभवतः महर्षि ऋग्वेद की पारायणसंख्या १०५८९ मानते हों।

ऋक्संख्या

अस्मिन् व्याख्यातव्य ऋग्वेदे द्वाविंशत्यधिकपञ्चशतदशसहस्रम् (१०५२२) अपौरुषेया ऋचः सन्तीति महर्षेरभिमतम् । ऋक्संख्यायां हि नाना मतयो दृश्यन्ते। तत्र काचित् बालखिल्यसूक्तकृता, त्रीणि त्रीणि अर्द्धर्चहेतुका परा, अन्या द्विपदामूला, अपरा शाखाभेदाद्याश्रिता ।

(१)

ऋग्वेदस्याष्टमे मण्डल एकादश सूक्तानि (४९–५९ सूक्तानि) बालखिल्यसूक्तान्युच्यन्ते । तथाहि—

बालखिल्यचित्रम्

(चित्रम् १४)

ऋ० मण्डलम् ८, सूक्तानि ४९–५९ ॥ अष्टकं ६, अध्यायः ४, वर्गाः १४–३१

वर्ग क्रम संख्या	वर्ग संख्या	सूक्त क्रमसंख्या	सूक्त संख्या	ऋचः	ऋचः
१	१४	१	४९	५	१०
२	१५			५	
३	१६	२	५०	५	१०
४	१७			५	
५	१८	३	५१	५	१०
६	१९			५	
७	२०	४	५२	५	१०
८	२१			५	
९	२२	५	५३	४	८
१०	२३			४	
११	२४	६	५४	४	८
१२	२५			४	
१३	२६	७	५५	५	५
१४	२७	८	५६	५	५
१५	२८	९	५७	४	४
१६	२९	१०	५८	३	३
१७	३०	११	५९	४	७
१८	३१			३	
				८० ऋचः	८० ऋचः

बालखिल्यसूक्तानां प्रतिवर्गम् ऋक्संख्याचित्रम्

(चित्रम् १५)

प्रतिवर्गम् ऋक्संख्या	वर्गसंख्या	समस्त ऋक्संख्या	विवरणम्
३	२	६	द्वयोवर्गयोस्तिस्रस्तिस्र ऋचः
४	६	२४	षट्सु वर्गेषु चतस्रश्चतस्र ऋचः
५	१०	५०	दशसु वर्गेषु पञ्च पञ्च ऋचः
	१८ वर्गाः	८० ऋचः	

एवमशीतिः (८०) बालखिल्यऋचः सन्ति तासामेकादश (११) सूक्तानि अष्टादश (१८) वर्गाश्च भवन्ति। केचिदेता बालखिल्यऋच ऋक्संख्यागणना-प्रसङ्गे परित्यजन्ति तेषामशीतिः संख्या न्यूना भवति। नव्यमते[1] १०५५२ ऋक्संख्या तत्र ८० संख्याव्यवकलनेन १०५५२÷८०=१०४७२ ऋक्संख्या संपद्यते। इयं १०४७२ ऋक्संख्या महीदासस्य बालखिल्यवर्जम्। महर्षिस्तु संहितान्तर्गता एवैता बालखिल्यऋचो मन्यते तासां बालखिल्यऋचामपि पदपाठश्रवणात्, ऋष्याद्यनुक्रमणात्, ब्राह्मणे विनियोगदर्शनात्, ऋषिपारम्पर्यात्, साक्षाद्दर्शनाच्च। तथाहि—

१—बालखिल्यऋचां पदपाठः—

संहितापाठ

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति॥

ऋ० ८।४६।१॥

१—नव्यमतमग्रे द्विपदाप्रकरणे विवेचितम्।

पदपाठः

अभि । प्र । वः । सुऽराधसम् । इन्द्रम् । अर्च । यथा । विदे । यः । जरितृऽभ्यः । मघऽवा । पुरुऽवसुः । सहस्रेणऽइव । शिक्षति ।

एवं सर्वासां बालखिल्यऋचां शाकल्यकृतः पदपाठो दृश्यते । ततो नैताः खिलऋचः परिशिष्टा इत्यर्थः । यासां पदपाठाभावस्ताः खिलऋचो मन्यन्ते । तथा चोक्तम्—

यस्य पदाभावस्तस्य खैलिकत्वं सिद्धम् ।

(चरणव्यूह० पृष्ठम् १६)

२—बालखिल्यानामृष्यादयो ऽप्यनुक्रम्यन्ते । तथाहि—

अभि प्र० (ऋ० ८।४६) दश प्रस्कण्वः प्रागाथं तत् । प्र सु श्रुतं० (ऋ० ८।५०) पुष्टिगुः । यथा मनौ० (ऋ० ८।५१) श्रुष्टिगुः यथा मनौ० (ऋ० ८।५२) आयुः । उपमं त्वा० (ऋ० ८।५३) अष्टौ मेध्यः । एतत् ते० (ऋ० ८।५४) मातरिश्वा । आ नो विश्वे० (ऋ० ८।५४।३) इति वैश्वदेवः । प्रगाथः । भूरीत्० (ऋ० ८।५५) पञ्च कृशः, प्रस्कण्वस्य दानस्तुतिः, गायत्रं तृतीयापञ्चम्यावनुष्टुभौ । प्रति ते० (ऋ० ८।५६) पृषध्रोऽन्त्याग्निसौरी पाङ्क्तः । युवं देवाः० (ऋ० ८।५७) चतुष्कं मेध्य आश्विनं त्रैष्टुभम् । यमृत्विजं० (ऋ० ८।५८) तृचं वैश्वदेवम्, आद्य ऋत्विक्स्तुतिर्वा । इमानि वां० (ऋ० ८।५६) सप्त सुपर्ण ऐन्द्रावरुणं जागतम् ।

(कात्यायनसर्वानुक्रमणी

अस्यायमर्थः—ऋग्वेदेऽष्टममण्डले ४६ सूक्तात् ५६ सूक्तपर्यन्तमेकादश बालखिल्यसूक्तान्युच्यन्ते तेषामृषिदेवताच्छन्दांसि कात्यायनो ऽनुक्रमते—

अभि प्र वः सुराधसम्० (ऋ० ८।४६) सूक्तस्य दश ऋचस्तासां प्रस्कण्व ऋषिः । छन्दः प्रगाथाः । देवता तु इन्द्र इति सर्वत्र वर्तते । तत्रानुक्त इन्द्रो देवता ज्ञेया यत्र वैशिष्ठ्यं तत्र वक्ष्यत इति परिभाषितम् ।

प्र सु श्रुतं सुराधसम्० (ऋ० ८ । ५०) सूक्तस्य पुष्टिगुः ऋषिः । देवताच्छन्दसी पूर्ववत् ।

यथा मनौ सांवरणौ० (ऋ० ८ । ५१) सूक्तस्य श्रुष्टिगुः ऋषिः । देवताच्छन्दसी पूर्ववत् ।

यथा मनौ विवस्वति० (ऋ० ८ । ५२) सूक्तस्य आयुः ऋषिः । देवताच्छन्दसी पूर्ववत् ।

उपमं त्वा मघोनाम्० (ऋ० ८।५३) सूक्तस्याष्टौ ऋचस्तासां मेध्य ऋषिः । देवताच्छन्दसी पूर्ववत् ।

एतत् तं इन्द्र वीर्यम्० (ऋ० ८ । ५४) सूक्तस्य मातरिश्वा ऋषिः । 'आ नो विश्वे सजोषसः०' (ऋ० ८।५४।३) इति तृतीयस्य मन्त्रस्य विश्वे देवा देवताः । अन्येषामिन्द्र एव देवता पूर्ववत् । छन्दः प्रगाथाः ।

भूरीदिन्द्रस्य वीर्यम्० (ऋ० ८ । ५५) सूक्तस्य पञ्च ऋचस्तासां कृश ऋषिः । छन्दो गायत्री । तृतीयपञ्चम्योः ऋचोस्तु अनुष्टुप् छन्दः, तस्मात् प्रथम-द्वितीयचतुर्थीनामेव गायत्री छन्द इति बोध्यम् । इन्द्रो देवता पूर्वतो ऽनुवर्तते, प्रस्कण्वस्य दानस्तुतिश्च ।

प्रति ते दस्यवे वृक०(ऋ० ८।५६) सूक्तस्य पृषध्र ऋषिः । अत्र या ऽन्त्या पञ्चमी ऋक् तस्या अग्निसूर्यौ देवते । पङ्क्तिश्छन्दः । शिष्टानां गायत्री छन्दः । इन्द्रो देवता इत्यनुवर्तत एव ।

युवं देवा क्रतुना पूर्व्येण० (ऋ० ८।५७) सूक्तस्य चतस्र ऋचस्तासां मेध्य ऋषिः । अश्विनौ देवते । त्रिष्टुप् छन्दः ।

यमृत्विजो बहुधा कल्पयन्त० (ऋ० ५।५८) सूक्तस्य तिस्र ऋच-स्तासां मेध्य ऋषिः, त्रिष्टुप् च छन्द इति पूर्वतोऽनुवर्तते । विश्वे देवा देवताः । आद्ये=प्रथमे मन्त्रे ऋत्विक्स्तुतिरपि देवता ।

इमानि वां भागधेयानि सिस्रतः० (ऋ० ८।५९) सूक्तस्य सप्त ऋच-स्तासां सुपर्ण ऋषिः । । इन्द्रावरुणौ देवते । जगती छन्दः ।

उक्तप्रकारेण बालखिल्यऋचामृषिदैवतछन्दांसि कात्यायनेनानुक्रान्तानि । नहि परिशिष्टानामृषिदैवतछन्दांस्यनुक्राम्यन्ते तत ऋक्संहितान्तर्गता एव बालखिल्य-ऋचो न तु परिशिष्टाः ।

३—बालखिल्यऋचां ब्राह्मणेऽपि सद्भावः । तथाहि—

क. इन्द्र नेदीय एदिहीतीन्द्रनिहवः प्रगाथः ।

(ऐ० ब्रा० ४ । २१)

अस्यायमर्थः—'इन्द्र नेदीय एदिहि॰' (ऋ० ८ । ५३ । ५) इत्यादिः इन्द्रनिहवः प्रगाथ उच्यते । इयं बालखिल्य ऋगेव ।

ख. स यद्यैन्द्रावरुणे रोहेत् सौपर्णे रोहेत् ।

(ऐ० ब्रा० ६ । २५)

अस्यायमर्थः—स प्रतिष्ठाकामो यद्यैन्द्रावरुणं सूक्तं रोहणार्थं निश्चिनुयात् तदा सौपर्णं[1] सूक्तं चिनोतु । "इमानि वां भागधेयानि" (ऋ० ८ । ५९ । १) इति सौपर्णमैन्द्रावरुणं सूक्तं बालखिल्येष्वेव दृश्यते । 'अयं हि ते अमर्त्य॰' (ऋ० १० । १४४ । १) इति दशमे मण्डलेऽपि सुपर्णस्यैकं सूक्तं परं तदैन्द्रं सूक्तं नत्वैन्द्रा-वरुणम् ।

ग. तान्येतानि सहचराणीत्याचक्षते । नाभानेदिष्टं, बालखिल्या, वृषाकपिम्, एवयामरुतम्, तानि सहैव शंसेत् ।

(ऐ० ब्रा० ५ । १५)

अस्यायमर्थः—नाभानेदिष्टं सूक्तद्वयम्,[2] बालखिल्या मन्त्राः,[3] वृषाकपिदृष्टं सूक्तम्,[4] एवयामरुन्नाम्ना महर्षिणा च दृष्टं सूक्तम्,[5] तान्येतानि चत्वारि सहचराण्युच्यन्ते तानि सहैव शंसेत्=पठेत् इति बालखिल्यानां शंसने प्रयोग ऐतरेयब्राह्मणे दृश्यते ।

एवमृग्वेदस्य ब्राह्मण ऐतरेये बालखिल्यानां सद्भावात् संहितान्तर्गता एव बालखिल्या न तु परिशिष्टाः ।

१—यस्य सूक्तस्य सुपर्णं ऋषिः ।

२—ऋ० १० । ६१ । ऋ० १० । ६२ ।

३—ऋ० ८ । ४९—५९ ।

४—ऋ० १० । ८६ ।

५—ऋ० ५ । ८७ ।

४. ऋषिपरम्परा ऽपि वालखिल्यान् रक्षति । तथाहि—

क. ऐतरेये वालखिल्यमन्त्राः प्रतीकनिर्देशेनोक्ताः । स्ववेदगता हि मन्त्राः प्रतीकेनोच्यन्ते । ब्राह्मणेषु स्ववेदातिरिक्ता मन्त्राः समस्ता पठ्यन्ते ।

ख. कात्यायनानुक्रमण्यां वालखिल्यानामृषिदैवतछन्दांसि निर्दिष्टानीत्युक्तं प्राक् ।

ग. यन् नाभानेदिष्टो वालखिल्यो वृषाकपिरेवयामरुत् तस्मात् तानि सार्द्धमेवोपेयुः ।

(गो० ब्रा० उ० ६ । ७)

घ. यन् नाभानेदिष्टं पूर्वं शस्यत उत्तरा वालखिल्याः ।

ता० ब्रा० २० । ६ । २)

ङ. तस्मादाहुः कस्माद् वालखिल्या इति ।

(श० ब्रा० ३० । ८)

एवं सर्वेषु ब्राह्मणेषु वालखिल्यप्रवादा उपलभ्यन्ते ।

५—महर्षेः साक्षाद् दर्शनमप्यासीत् ।

कथमासां वालखिल्यसंज्ञा ?

अथेदं विचार्यते—कथं वालखिल्यमन्त्राः, वालखिल्यसूक्तानि वालखिल्या ऋषयः । खिलसूक्तानीत्यपि केचित् । इति नामकरणम् । तत्रोच्यते—

वहुकालपर्यन्तमेते मन्त्रा असाक्षात्कृतार्था आसन् । एभ्यः पूर्वे परे च मन्त्राः साक्षात्कृतार्थाः प्रागासुः । खिलभूता ह्येते ऽवर्तन्त । यथा सस्याढ्ययोः क्षेत्रयो र्मध्ये यदसंस्कृतमकृष्टमसस्याढ्यं क्षेत्रं भवति तत् खिलमित्युच्यते । पश्चान् महर्षिभिरेते ऽपि साक्षात्कृताः । साक्षात्करणे चासां वालमात्रं सूक्ष्ममेवान्तरमासीत् ततो वालखिल्यसंज्ञा । यस्मादेते पूर्वमसाक्षात्कृता अतिष्ठन् तस्मादासामृचां खिलसंज्ञा प्रवृत्ता । अर्थदृष्ट्या परिशिष्टा हि ते । तत्साम्यात् परिशिष्टानामपि खिलसंज्ञा प्रसिद्धेत्येके ।

अथवा वालखिल्याः प्राणा उच्यन्ते । तथाहि—

प्राणा वै बालखिल्याः............यद्वा उर्वरयोरसंभिन्नं भवति खिल इति वै तदाचक्षते । बालमात्रादु हेमे प्राणाः असंभिन्नास्ते यद् बालमात्रादसंभिन्न स्तस्माद् बालखिल्याः ।

(श० ब्रा० ८ । ३ । ४ । १)

बालखिल्यसूक्तेषु प्राणमहिमा वर्ण्यते तस्मादेषां बालखिल्यसंज्ञा । तथाहि— बालखिल्यसूक्तेषु महर्षिनिर्दिष्टा देवता अधस्तनप्रकारेण ज्ञेया ।

ऋ० ८।४९–५३–इन्द्रो देवता । ऋ० ८।५४। १,२,५–८।–इन्द्रो देवता। ऋ० ८।५४।३,४।–विश्वे देवा देवताः। ऋ० ८।५५।–प्रस्कण्वस्य दानस्तुतिर्देवता। ऋ० ८।५६।१—४।—प्रस्कण्वस्य दानस्तुतिर्देवता । ऋ० ८।५६।५।–अग्निसूर्यौ देवते। ऋ०८।५७।अश्विनौ देवते। ऋ० ८।५८।१। ऋत्विजो देवताः । ऋ० ८।५८।२ ३। विश्वे देवा देवताः। ऋ० ८।५९।—इन्द्रावरुणौ देवते ।

एता बालखिल्यमन्त्रनिर्दिष्टा देवताः प्राणवचना इति ह विज्ञायते[1] । तथाहि—

क. प्राण इन्द्रः । श० ब्रा० ६ । १ । २ । ८ ॥

ख. प्राणा वै विश्वे देवाः श० ब्रा० १४ । २ । २ । ३७ ॥

ग. नासिके[2] अश्विना । श० ब्रा० १२ । १ । ६ । १४ ॥

घ. अश्विनौ प्राणापानौ । महर्षिभाष्यम् । यजु० २१ । ६० ॥

ङ. प्राणा सर्वे ऋत्विजः । ऐ० ब्रा० ६ । १४ ॥

च. इन्द्रावरुणौ प्राणोदानवत् प्रियबलिनौ । महर्षिभाष्यम् ऋ० ४ । ४१ । १ ॥

छ. अग्निर्वै प्राणः । जै० उ० ४ । २२ । १६ ॥

ज. आदित्यो वै प्राणः । जै० उ० ४ । २२ । ११ ॥

झ. कण्व इति मेधाविनामसु पठितम् । निघण्टु ३ । १५ ॥

(प्रस्कण्वः कण्वस्य पुत्रः । प्रशब्दो ऽत्यन्तवचनो ऽत एवापत्यार्थे । जनकात् पुत्रो ऽधिकगुणो ऽपेक्षते । अस्यायं पुत्रः अस्मादप्यधिकगुण इत्यर्थः । तथा चोक्तं यास्केन—

१—विज्ञानग्रन्थेषु ब्राह्मणेषु प्रतिपाद्यत इत्यर्थः ।

२—नासिकाप्रभवौ प्राणापानावित्यर्थः ।

मगन्दः कुसीदी ... तदपत्यं प्रमगन्दः। अत्यन्तकुसीदिकुलीनः।
(निरुक्त ६ । ३२)

प्रस्कण्वस्य=अत्यन्तमेधाविनो दानस्तुतिः। प्राणसंयमनेन वै मेधावी भवति)

अथात्र प्रथमां वालखिल्यऋचं प्राणविद्यापरतया महर्षिनिर्दिष्टदिशा दिङ्मात्रं व्याख्यातुं प्रयते—

ओ३म्। अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥
(ऋ० ८। ४९। १)

भाष्यम्— हे साधक! त्वं (वः) एकवचने बहुवचनमात्मशक्तिप्रकर्ष-द्योतनार्थम्। वः=तवात्मनः संबन्धिनं (सुराधसम्) शोभनं विद्यायोगादिधनं यस्मात् तम्। "(सुराधसः) शोभनानि विद्याचक्रवर्तिराज्यसंबन्धीनि राधांसि धनानि येषां तानेवं भूतान्" महर्षिभाष्यम्। ऋ० १।२३।६॥ (इन्द्रम्) प्राणम् (अभि) अभिलक्ष्य (प्र+अर्च) पूजय सत्कुरु प्राणं संयमये-त्यर्थः (यथा विदे) यथा विदुषे स्वगुरवे शिष्यः सत्करोति तद्वत् (मघवा) यस्मिन् प्राणे विद्यायोगादिरूपं बहु धनं विद्यते स बहुधनः (पुरुवसुः) बहुकाल-पर्यन्तं वासयिता बहुजीवनप्रदः। "(पुरुवसुः) पुरूणां बहूनां वासयिता" महर्षिभाष्यम् ऋ० २।१।५ (यः) प्राणः (जरितृभ्यः) वृद्धेभ्यो ऽपि स्तोतृभ्यः स्वोपासकेभ्यः, अथवा योगगुणसिद्धीनां वेदितृभ्यः "(जरितृभ्यः) योग-गुणसिद्धीनां वेदितृभ्यः।" महर्षिभाष्यम् ऋ० १। १०६। ६॥" (सहस्रेण इव) आयुरेव। इव शब्दो ऽत्रावधारणार्थः प्राणविद्या ऽवश्यमायुर्वर्ध-यतीत्यर्थः। "सहस्राय स्वाहेत्याह। आयुर्वै सहस्रम्। आयुरेवावरुन्धे" तै० ब्रा० ३। ८। १५॥ (शिक्षति) ददाति।

एवं प्राणानां वालखिल्यसंज्ञा। प्राणविद्यापरत्वादेतानि सूक्तानि वालखिल्य-सूक्तानीत्युच्यन्ते। वालखिल्यमन्त्राणामर्थद्रष्टार ऋषयोऽपि वालखिल्यनाम्ना प्रसिद्धाः। एते वालखिल्या ऋषयः इति। यथा "तन्मे मनः शिवसंकल्पमस्तु"

इत्यन्तानां 'यज्जाग्रतो०' इत्यादीनां षण्णां मन्त्राणामर्थद्रष्टार ऋषयः शिवसंकल्पनाम्ना व्यवहृताः। यथा च 'ऋतं च सत्यंचा०' इत्याद्यघमर्षणमन्त्राणां द्रष्टा मधुच्छन्दसः पुत्रोऽघमर्षणनाम्ना प्रसिद्धः। वालखिल्यनामान ऋषय आसन् तत्कृतत्वादेतानि सूक्तानि वालखिल्यसूक्तानीत्यपसिद्धान्तः।

इत्थं वालखिल्यऋचां संहितान्तर्गतत्वात् तत्सहिता १०५२२ ऋक्संख्या समञ्जसी। अपवालखिल्यऋच ऋक्संख्यां मन्वाना अपास्ता इति।

(२)

त्रीणि त्रीणि अर्द्धर्चा ऋचः

ऋग्वेदे त्रीणि त्रीणि अर्द्धर्चा ऋचश्चतुर्नवति (९४) संख्यका विद्यन्ते। तासामेका दिङ्मात्रमुदाह्रियते—

अ॒ग्निं होता॑रं मन्ये॒ दास्व॑न्तं॒
वसुं॑ सू॒नुं सह॑सो जा॒तवे॑दसं॒ विप्रं॒ न जा॒तवे॑दसम्।
य ऊ॒र्ध्वया॑ स्वध्व॒रो दे॒वो दे॒वाच्या॑ कृ॒पा।
घृ॒तस्य॒ विभ्रा॑ष्टि॒मनु॑ वष्टि शो॒चिषा॒ऽऽजुह्वा॑नस्य स॒र्पिषः॑ ॥ १ ॥
(ऋ० १। १२७। १)

इयमेक ऋग् अस्यास्त्रयो भागाः। 'अग्निम्' इत्यारभ्य 'जातवेदसम्' पर्यन्तमेको भागः। 'य ऊर्ध्वया' इत्यारभ्य 'कृपा' पर्यन्तं द्वितीयो भागः। 'घृतस्य' इत्यारभ्य 'सर्पिषः' पर्यन्तं तृतीयो भागः। भागत्रयवत्त्वादियमृक् 'त्रीणि त्रीणि अर्द्धर्च ऋक्' इत्युच्यते।

महीदासेनास्या एकस्या ऋच ऋग्द्वयं क्रियते। 'अग्निं होतारं' इत्यारभ्य 'देवाच्या कृपा' पर्यन्तं द्वयोर्भागयोरेक ऋक् क्रियते। 'घृतस्य' इत्यारभ्य 'सर्पिषः' पर्यन्तं तृतीयस्य भागस्य द्वितीय ऋक् क्रियते। एतादृश्यश्चतुर्नवतिसंख्यकास्त्रीणि त्रीणि अर्द्धर्चा ऋच ऋग्वेदे सन्ति। अत्राह महीदासः —

"आसां परिमाणमाह
'अग्निं होतारं०' पञ्च। 'स हि शर्द्धो न०' षट्।
'अयं जायत०' पञ्च। 'विश्वो विहायाः०' तिस्रः।
'यं त्वं रथं०' पञ्च। 'प्र तद्वोचेयं०' षट्।

१—यजु० ३४। १-६।

२—वालखिल्यऋचो वर्जयित्वा।

'एन्द्र याह्युप नः०' पञ्च। 'इमां ते वाचं०' चत्वारि।
स नो नव्येभिः' वर्जम्।
'इन्द्राय हि द्यौः०' सप्त। 'त्वया वयं०' षट्।
'अवर्मह०' एका 'वनोति हि०' एका।
'आ त्वा जुवो०' षट्। स्तीर्णं०' पञ्च।
'इमे वां सोमा०' एका, 'इमे ये ते सु वायो०' एका।
'प्र सु ज्येष्ठं०' षट् 'ऊती देवानां०' वर्जम्।
'सुषुमा यातम्०' त्रीणि। 'प्र प्र पूष्णः०' चतुष्कम्।
'अस्तु श्रौषट्०' चत्वारि 'शचीभिर्नः' वर्जम्।
'वृषन्निन्द्र०' पञ्च 'ये देवासो०' वर्जम्।
'तव त्यन्नर्यम्०' एका। 'सखे सखायम्०' एका।
'अया रुचा०' त्रीणि।

एतास्त्रीणि त्रीण्यर्द्धर्चा ऋचो हवनीयाश्चतुर्नवतिसंख्या इति त्रीण्यर्द्धंच ऋग्घवने। अध्ययने अर्द्धद्वयेन ऋगेका। अर्द्धर्चेनैकैव। ऋग्द्वये कर्तव्ये इत्यर्थः।

(चरणव्यूह पृ० १६, २०)

अस्यायमर्थः—

ऋ० २ अष्टके, १ अध्याये, १२ वर्गे 'अग्निं होतारं०' इत्याद्याः पञ्च ऋचः—५
ऋ० " " १३ वर्गे 'स हि शर्धो न०' इत्याद्याः षड् ऋचः—६
ऋ० " " १४ वर्गे 'अयं जायत०' इत्याद्याः पञ्च ऋचः—५
ऋ० " " १५ वर्गे 'विश्वो विहायाः०' इत्याद्याः तिस्र ऋचः—३
ऋ० " " १६ वर्गे 'यं त्वं रथं०' इत्याद्याः पञ्च ऋचः—५
ऋ० " " १७ वर्गे 'प्र तद् वोचेयम्०' इत्याद्याः षड् ऋचः—६
ऋ० " " १८ वर्गे 'एन्द्र याह्युप नः०' इत्याद्याः पञ्च ऋचः—५
ऋ० " " १९ वर्गे 'इमां ते वाचम्०' इत्याद्याश्चतस्र ऋचः—४
अस्मिन् वर्गे याऽन्त्या ऋक् 'स नो नव्येभिः०' तां वर्जयित्वा।

ऋ० २ अष्टके १ अध्याये २० वर्गे 'इन्द्राय हि द्यौः०' इत्याद्याः सप्त ऋचः–७
ऋ० " " २१ वर्गे 'त्वयां वयं०' इत्याद्याः षड् ऋचः–६
ऋ० " " २२ वर्गे 'अवर्महः०' इत्येका, 'वनोति हि०' इति चैका–२
ऋ० " " २३ वर्गे 'आ त्वा जुवो०' इत्याद्याः षड् ऋचः–६
ऋ० " " २४ वर्गे 'स्तीर्णम्०' इत्याद्याः पञ्च ऋचः–५
ऋ० " " २५ वर्गे 'इमे वां सोमा०' इत्येका, इमे ये ते सु वायो०
इति चैका ऋक्–२
ऋ० " " २६ वर्गे 'प्र सु ज्येष्ठम्०' इत्याद्याः षड् ऋचः–६
अस्मिन् वर्गे याऽन्त्या ऋक् 'ऊती देवानां०'
तां वर्जयित्वा।
ऋ० " २ अध्याये १ वर्गे 'सुषुमा यातम्०' इत्याद्यास्तिस्र ऋचः–३
ऋ० " " २ वर्गे 'प्र प्र पूष्णः०' इत्याद्याश्चतस्र ऋचः–४
ऋ० " " ३ वर्गे 'अस्तु श्रौषट्०' इत्याद्याश्चतस्र ऋचः–४
अस्मिन् वर्गे याऽन्त्या ऋक् 'शचीभिर्नः०'
तां वर्जयित्वा।
ऋ० " " ४ वर्गे 'वृषन्निन्द्र०' इत्याद्याः पञ्च ऋचः–५
अस्मिन् वर्गे याऽन्त्या ऋक् 'ये देवासो०'
तां वर्जयित्वा।
ऋ० " ६ अध्याये २८ वर्गे 'तव त्यन्नर्यम्०' इत्येका ऋक्–१
ऋ० ३ अष्टके ४ अध्याये १२ वर्गे 'सखे सखायम्०' इत्येका ऋक्–१
ऋ० ७ अष्टके ५ अध्याये २४ वर्गे 'अया रुचा०' इत्याद्यास्तिस्र ऋचः–३

पूर्णसंख्या ९४

एताश्चतुर्नवति (९४) संख्यकास्त्रीणि त्रीणि अर्द्धर्चा ऋचो हवनीयाः=प्रयोग-काल एवासां चतुर्नवतिः संख्या। अध्ययनकाले त्वासां प्रत्येकस्या ऋच ऋग्द्वयं संपाद्यते। स च प्रकारः पूर्वं प्रदर्शितः। तथा सत्यासामृचां १८८ संख्या भवति।

अयं भावः—महीदासो हवने त्वेकामेव ऋचं मन्यते परमध्ययनकाले ऋग्द्वयं स्वीकरोति। अध्ययनकालस्य या संख्या सैव ऋक्संख्या भवति। ततो महीदासमते ऋक्संख्याप्रसङ्गे ९४ संख्याऽधिका भवति। अतो महीदासमतेऽर्द्धर्चपक्षे १०४६६ ऋक्संख्या भवति। तच्चाग्रे विवेचिष्यते।

(३)

(द्विपदाः)

लोके चतुष्पाद् श्लोको भवति । ऋचस्तु काश्चिदेकपदाः काश्चिद् द्विपदाः काश्चित् त्रिपदाः काश्चिच् चतुष्पदाः काश्चित् पञ्चपदा इत्यादिरूपेण नानाविधाः ।

(एकपादवत्य ऋचः)

ऋग्वेदस्य दशसु मण्डलेष्वेकपदाः षडेव । तथाहि—

(चित्रम् १६)

संख्या	पूर्ण ऋचा	अक्षर संख्या	महर्षि निर्दिष्ट-छन्दोनाम	कात्यायन निर्दिष्ट-छन्दोनाम
१	असिंक्न्यां यजमानो न होता[1]	१०	याजुषी पङ्क्तिः	एकपदा विराट्
२	सिषक्तु न ऊर्जव्यस्य पुष्टेः[2]	१०	याजुषी पङ्क्तिः	एकपदा विराट्
३	उरौ देवा अनिबाधे स्याम[3]	१०	याजुषी पङ्क्तिः	एकपदा विराट्
४	उरौ देवा अनिबाधे स्याम[4]	१०	याजुषी पङ्क्तिः	एकपदा विराट्
५	आ वां सुम्ने वरिमन् त्सूरिभिः ष्याम्[5]	११	आसुरी पङ्क्तिः	एकपदा त्रिष्टुप्
६	भद्रं नो अपि वातय मनः[6]	१०	आसुरी त्रिष्टुप्	एकपदा विराट्

उक्तं च प्रातिशाख्ये—

> न दाशतय्येकपदा काचिदस्तीति वै यास्कः ।
> अन्यत्र वैमद्याः सैका दशिनी सुखतो विराट् ॥
> आ वां सुम्ने, असिंक्न्यां, द्वे उरौ देवाः, सिषक्तु नः ॥

ऋ० प्रा० १७ । ५६, ५७ ॥

अस्यायमर्थः—यस्या ऋचो विमद ऋषिस्ताम् 'भद्रं नो अपि० ऋ० १० । २० । १ ॥ ऋचां वर्जयित्वा दाशतयी ऋग्वेददशमण्डलान्तर्गता काचिदेकपदा ऋचा नास्तीति वै यास्को मन्यते । सैका ऋक् दशाक्षरा विराट् मुखतः सूक्तस्यादौ वर्तते ।

ऋग्वेद एकपदा ऋचः पञ्चान्या अपि सन्ति—

आ वां सुम्ने० ऋ० ६ । ६३ । ११ ॥ असिंक्न्यां० ऋ० ४ । १७ । १५ ॥
उरौ देवाः० इति ऋग् द्वयोः स्थानयोर्ऋग्वेदे वर्तते । ऋ० ५ । ४२ । १७ ॥

१. ऋ० ४ । १७ । १५ ॥ २. ऋ० ५ । ४१ । २० ॥ ३. ऋ० ५ । ४२ । १७ ॥
४. ऋ० ५ । ४३ । १६ ॥ ५. ऋ० ६ । ६३ । ११ ॥ ६. ऋ० १० । २० । १ ॥

ऋ० ५ । ४३ । १६ ॥ सिषक्तु नः । ऋ० ५ । ४१ । २० एवं पडेकपदा ऋच ऋग्वेदे सन्तीति बोध्यम् ।

छन्दःसंख्यायामप्युक्तम्—

एकपदास्तु षट् प्रोक्ताः । (छन्दः संख्या ८)

'भद्रं नो अपि०' ऋ० १० । २० । १ इयमेकैवैकपदा । अन्या याः पञ्चैकपदाः सन्ति ताः स्वोपरितनमन्त्रस्यान्तभागो न तु स्वतन्त्रा ऋचः । तन्मते पञ्च संख्या न्यूना भविष्यति । 'भद्रं नो अपि०' ऋक् तु सूक्तस्यादौ वर्तते सा न कस्या अपि ऋचोऽन्तभागो भवितुमर्हति सूक्तादित्वात् । उक्तं च प्रातिशाख्ये—

अन्यत्र वैमदाः सैका दशिनी मुखतो विराट् ।
आहुस्त्वेकपदा अन्ये अध्यासानेकपातिनः ॥

ऋ० प्रा० १७ । ५६, ५७ ॥

अस्यायमर्थः—यस्या एकपदाया ऋचो विमद ऋषिः सैका ऋक् 'भद्रं नो अपि०' इत्येषा मुखतः सूक्तस्यादौ वर्तते दशाक्षरा विराट् । अन्या एकपदास्तु आचार्याः केचिद् एकपातिन अध्यासान् पूर्वऋचामन्तभागान् मन्यन्ते । इति ।

(द्विपादवत्य ऋचः)

ऋग्वेदे सप्तनवतिः (९७) द्विपादवत्य ऋचः सन्ति ।

ताश्चाधोनिर्दिष्टचित्रेण ज्ञेयाः ।

द्विपदा चित्रम्

(चित्रम् १७)

क्रमसंख्या	मण्डल	सूक्त	मन्त्र	महर्षि निर्दिष्ट छन्दोनाम	कात्यायन निर्दिष्ट-छन्दो नाम	ऋगनुक्रमेता-क्षरसंख्या
१	१	७०	६	याजुषी पङ्क्तिः	द्विपदा विराट्	२०
२	५	२४	१	साम्नी बृहती	द्विपदा विराट्	१८
३	५	२४	२	भुरिग्बृहती[1]	द्विपदा विराट्	१९

१—भुरिक् साम्नी बृहतीत्यर्थः ।

२

क्रमसंख्या	मण्डल	सूक्त	मन्त्र	महर्षि निर्दिष्ट छन्दोनाम	कात्यायन निर्दिष्ट-छन्दो नाम	ऋग्गूहैना-क्षरसंख्या
४	५	२४	३	भुरिग्बृह[1]ती	द्विपदा विराट्	१६
५	५	२४	४	भुरिग्बृह[1]ती	द्विपदा विराट्	१६
६	६	१०	७	प्राजापत्या बृहती	द्विपदा विराट्	२०
७	६	१७	१५	आर्ची उष्णिक्	द्विपदा त्रिष्टुप्	२१
८	६	४७	२५[2]	विराड् गायत्री	द्विपदा त्रिष्टुप्	२२
९	७	१७	१	आर्ची [3]उष्णिक्	द्विपदा त्रिष्टुप्	२२
१०	७	१७	२	साम्नी त्रिष्टुप्	द्विपदा त्रिष्टुप्	२२
११	७	१७	३	आर्ची उष्णिक्	द्विपदा त्रिष्टुप्	२१
१२	७	१७	४	आर्ची उष्णिक्	द्विपदा त्रिष्टुप्	२१
१३	७	१७	५	साम्नी पङ्क्तिः	द्विपदा त्रिष्टुप्	२०
१४	७	१७	६	आर्ची उष्णिक्	द्विपदा त्रिष्टुप्	२१
१५	७	१७	७	आर्ची उष्णिक्	द्विपदा त्रिष्टुप्	२१
१६	७	३२	३	साम्नी पङ्क्तिः	द्विपदा विराट्	२०
१७	७	३४	१	भुरिक् आर्ची गायत्री	द्विपदा विराट्	१६
१८	७	३४	२	भुरिक् आर्ची गायत्री	द्विपदा विराट्	१६
१९	७	३४	३	आ[4]र्ची गायत्री	द्विपदा विराट्	२०
२०	७	३४	४	आर्ची गायत्री	द्विपदा विराट्	१८
२१	७	३४	५	भुरिक् आर्ची गायत्री	द्विपदा विराट्	१६
२२	७	३४	६	नि[5]चृत् त्रिपात् गायत्री	द्विपदा विराट्	२०
२३	७	३४	७	निचृत् त्रिपात् गायत्री	द्विपदा विराट्	२०
२४	७	३४	८	निचृत् त्रिपात् गायत्री	द्विपदा विराट्	२०

१—भुरिक् साम्नी बृहतीत्यर्थः ।

२—महर्षिमते ऋ० ६ । ४७ । २४ ऋगपि विराड् गायत्री ।

३—भुरिगार्ची उष्णिगित्यर्थः ।

४—स्वराडार्ची गायत्रीत्यर्थः ।

५—इयं प्रतिष्ठा निचृद् गायत्री त्रिपादेकविंशत्यक्षरा भवति । एकाक्षरन्यूना निचृत् ।

त्मनां समत्सु हिनोत, यज्ञं दधात केतुं, जनाय वीरम् । ऋ० ७।३४।६ एवमग्रेऽपि योज्यम् ।

३

क्रमसंख्या	मण्डल	सूक्त	मन्त्र	महर्षि निर्दिष्ट छन्दोनाम	कात्यायन निर्दिष्ट-छन्दोनाम	ऋग्न्यूहेना-क्षरसंख्या
२५	७	३४	६	निचृत् त्रिपाद् गायत्री	द्विपदा विराट्	२०
२६	७	३४	१०	निचृत् त्रिपाद् गायत्री	द्विपदा विराट्	२०
२७	७	३४	११	निचृत् त्रिपाद् गायत्री	द्विपदा विराट्	२०
२८	७	३४	१२	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
२६	७	३४	१३	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
३०	७	३४	१४	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
३१	७	३४	१५	निचृत् त्रिपाद् गायत्री	द्विपदा विराट्	२०
३२	७	३४	१६	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
३३	७	३४	१७	आर्ची गायत्री	द्विपदा विराट्	१८
३४	७	३४	१८	निचृत् त्रिपाद् गायत्री	द्विपदा विराट्	२०
३५	७	३४	१६	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
३६	७	३४	२०	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
३७	७	३४	२१	निचृत् त्रिपाद् गायत्री	द्विपदा विराट्	२०
३८	७	५६	१	आर्ची गायत्री	द्विपदा विराट्	१८
३६	७	५६	२	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
४०	७	५६	३	प्राजापत्या बृहती	द्विपदा विराट्	२०
४१	७	५६	४	प्राजापत्या बृहती	द्विपदा विराट्	२०
४२	७	५६	५	प्राजापत्या बृहती	द्विपदा विराट्	२०
४३	७	५६	६	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
४४	७	५६	७	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
४५	७	५६	८	आर्ची उष्णिक्	द्विपदा विराट्	२१
४६	७	५६	६	भुरिग् आर्ची गायत्री	द्विपदा विराट्	१६
४७	७	५६	१०	आर्ची उष्णिक्	द्विपदा विराट्	२१
४८	७	५६	११	निचृद् आर्ची उष्णिक्	द्विपदा विराट्	२०
४६	८	१६	२७	[1]भुरिग् आर्ची विराड् उष्णिक्	द्विपदा विराट्	२०
५०	८	२६	१	आर्ची गायत्री	द्विपदा विराट्	१८
५१	८	२६	२	आर्ची गायत्री	द्विपदा विराट्	१८
५२	८	२६	३	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०

१. व्याख्यानतः समाधेयम् ।

४

क्रमसंख्या	मण्डलम्	सूक्तम्	मन्त्रः	महर्षि निर्दिष्ट छन्दोनाम	कात्यायन निर्दिष्ट-छन्दोनाम	ऋगक्षरसंख्या
५३	८	२६	४	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
५४	८	२६	५	विराड् गायत्री	द्विपदा विराट्	२२
५५	८	२६	६	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१६
५६	८	२६	७	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१६
५७	८	२६	८	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१६
५८	८	२६	६	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१६
५६	८	२६	१०	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
६०	८	४६	१३	निचृद् गायत्री	द्विपदा जगती	२३
६१	८	४६	२०	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
६२	६	६७	१६	भुरि[1]ग् आर्ची विराड गायत्री	नित्य द्विपदा गायत्री	१६
६३	६	६७	१७	भुरि[1]ग् आर्ची विराड् गायत्री	नित्य द्विपदा गायत्री	१६
६४	६	६७	१८	भुरि[1]ग् आर्ची विराड् गायत्री	नित्य द्विपदा गायत्री	१६
६५	६	१०७	३	पि[2]पीलिका मध्या गायत्री	द्विपदा विराट्	२१
६६	६	१०७	१६	पि[2]पीलिका मध्या गायत्री	द्विपदा विराट्	२०
६७	६	१०६	१	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१६
६८	६	१०६	२	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
६६	६	१०६	३	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
७०	६	१०६	४	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
७१	६	१०६	५	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
७२	६	१०६	६	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
७३	६	१०६	७	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१६
७४	६	१०६	८	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१६
७५	६	१०६	६	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
७६	६	१०६	१०	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१६
७७	६	१०६	११	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०

१—आर्ची विराड् गायत्री । भुरिग् व्याख्यानतः समाधेयम् ।

२—अनियताक्षरा । आद्यन्तौ पादौ बह्वक्षरौ मध्येऽल्पाक्षरः पादः । द्र०—ऋ० प्रा० ३ । ५७

५

क्रमसंख्या	मण्डलम्	सूक्तम्	मन्त्रः	महर्षि निर्दिष्ट छन्दोनाम	कात्यायन निर्दिष्ट-छन्दोनाम	अव्यूहेनाक्षरसंख्या
७८	६	१०९	१२	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
७९	६	१०९	१३	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१९
८०	६	१०९	१४	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१९
८१	६	१०९	१५	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१९
८२	६	१०९	१६	पादनिचृद् गायत्री	द्विपदा विराट्	२१
८३	६	१०९	१७	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१९
८४	६	१०९	१८	आर्ची भुरिग् गायत्री	द्विपदा विराट्	१९
८५	६	१०९	१९	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
८६	६	१०९	२०	आर्ची गायत्री	द्विपदा विराट्	१८
८७	६	१०९	२१	आर्ची गायत्री	द्विपदा विराट्	१८
८८	६	१०९	२२	आर्ची स्वराड् गायत्री	द्विपदा विराट्	२०
८९	१०	१५७	१	द्विपदा त्रिष्टुप्	द्विपदा त्रिष्टुप्	१८
९०	१०	१५७	२	द्विपदा त्रिष्टुप्	द्विपदा त्रिष्टुप्	२०
९१	१०	१५७	३	द्विपदा त्रिष्टुप्	द्विपदा त्रिष्टुप्	२१
९२	१०	१५७	४	द्विपदा त्रिष्टुप्	द्विपदा त्रिष्टुप्	२२
९३	१०	१५७	५	द्विपदा त्रिष्टुप्	द्विपदा त्रिष्टुप्	२२
९४	१०	१७२	१	पिपीलिका मध्या गायत्री	द्विपदा विराट्	२०
९५	१०	१७२	२	पिपीलिका मध्या गायत्री	द्विपदा विराट्	१९
९६	१०	१७२	३	पिपीलिका मध्या गायत्री	द्विपदा विराट्	२०
९७	१०	१७२	४	पिपीलिका मध्या गायत्री	द्विपदा विराट्	२०

१—अत्र केचिदाहु–'एकपदा द्विपदा त्रिष्टुबुदाहरणानि मृग्याणि' । इति रभसोक्तिमात्रम् । ऋ० १०। १५७।४, ५ द्विपदा त्रिष्टुप् । ऋ० ६ ६३।३ एकपदा त्रिष्टुप् । तथा चोक्तं कात्यायनानुक्रमण्याम्—

क त्यैकपदान्तं त्रैष्टुभम् । कात्या० सर्वा० ६ । ६३ ।

अस्यायमर्थः—क त्या वल्गू० ऋ० ६।६३ सूक्तस्यान्त एकपदा त्रिष्टुप् शिष्टास्त्रिष्टुभः ।

इमा नु कं भुवन आप्त्यः साधनो वा भौमनो वैश्वदेवं द्वै दं त्रैष्टुभम् ।

कात्या० सर्वा० १० । १५७ ॥

अस्यायमर्थः—इमा नु कं० ऋ० १० । १५७ । सूक्तस्य भुवन आप्त्य ऋषिः साधनो भौमनो वा ऋषिः । विश्वे देवा देवता । द्विपदा त्रिष्टुप् छन्दः ।

(अन्येषां मतम्)

अन्येत्वाहुः सन्त्यन्या अपि षष्टिर्द्विपदाः । 'पश्वा न तायुं०' (ऋ० १ । ६५–७०) इत्यादिषट्सूक्तेषु यास्त्रिंशच् चतुष्पदा ऋचस्ता हत्रने द्विपदाः कृत्वा षष्टिः क्रियन्ते । ऋक्संख्या–गणना प्रसङ्गे ताः षष्टिः गणनीया न तु त्रिंशत् । तथाहि–

(त्रिंशच् चतुष्पदाः, षाष्टिर्द्विपदाः)

(चित्रम् १८)

		अन्यमते				महर्षिमते			
मण्डलम्	सूक्तम्	द्विपदाः	मन्त्राः	छन्दः	अक्षरसंख्या	चतुष्पदाः	मन्त्राः	छन्दः	अक्षरसंख्या
१	६५	१०	१	द्विपदा विराट्	२०	५	१	पङ्क्तिः	४०
			२	द्विपदा विराट्	२०				
			३	द्विपदा विराट्	१९		२	निचृत् पङ्क्तिः	३९
			४	द्विपदा विराट्	२०				
			५	द्विपदा विराट्	२०		३	निचृत् पङ्क्तिः	३९
			६	द्विपदा विराट्	१९				
			७	द्विपदा विराट्	१९		४	विराट् पङ्क्तिः	३८
			८	द्विपदा विराट्	१९				
			९	द्विपदा विराट्	१९		५	निचृत् पङ्क्तिः	३९
			१०	द्विपदा विराट्	२०				
	६६	१०	१	द्विपदा विराट्	२०	५	१	पङ्क्तिः	४०
			२	द्विपदा विराट्	२०				
			३	द्विपदा विराट्	२०		२	पङ्क्तिः	४०
			४	द्विपदा विराट्	२०				
			५	द्विपदा विराट्	२०		३	विराट् पङ्क्तिः	४०
			६	द्विपदा विराट्	२०				
			७	द्विपदा विराट्	१८		४	विराट् पङ्क्तिः	३८
			८	द्विपदा विराट्	२०				
			९	द्विपदा विराट्	१९		५	विराट पङ्क्तिः	३८
			१०	द्विपदा विराट्	१९				

६

२

मण्डलम्	सूक्तम्	द्विपदाः	मन्त्राः	छन्दः	अक्षरसंख्या	चतुष्पदाः	मन्त्राः	छन्दः	अक्षरसंख्या
१	६७	१०	१	द्विपदा विराट्	२०	५			
			२	द्विपदा विराट्	१९		१	निचृत् पङ्क्तिः	३९
			३	द्विपदा विराट्	१९				
			४	द्विपदा विराट्	२०		२	निचृत् पङ्क्तिः	३९
			५	द्विपदा विराट्	१९				
			६	द्विपदा विराट्	२०		३	निचृत् पङ्क्तिः	३९
			७	द्विपदा विराट्	२०				
			८	द्विपदा विराट्	१९		४	निचृत् पङ्क्तिः	३९
			९	द्विपदा विराट्	१९				
			१०	द्विपदा विराट्	१९		५	विराट् पङ्क्तिः	३८
१	६८	१०	१	द्विपदा विराट्	१९	५			
			२	द्विपदा विराट्	२०		१	निचृत् पङ्क्तिः	३९
			३	द्विपदा विराट्	२०				
			४	द्विपदा विराट्	२०		२	पङ्क्तिः	४०
			५	द्विपदा विराट्	२०				
			६	द्विपदा विराट्	२०		३	पङ्क्तिः	४०
			७	द्विपदा विराट्	१९				
			८	द्विपदा विराट्	२०		४	निचृत् पङ्क्तिः	३९
			९	द्विपदा विराट्	२०				
			१०	द्विपदा विराट्	२०		५	पङ्क्तिः	४०
	६९	१०	१	द्विपदा विराट्	२०	५			
			२	द्विपदा विराट्	२०		१	पङ्क्तिः	४०
			३	द्विपदा विराट्	१९				
			४	द्विपदा विराट्	२०		२	निचृत् पङ्क्तिः	३९
			५	द्विपदा विराट्	२०				
			६	द्विपदा विराट्	१९		३	निचृत् पङ्क्तिः	३९
			७	द्विपदा विराट्	२०				
			८	द्विपदा विराट्	२१		४	भुरिक् पङ्क्तिः	४१
			९	द्विपदा विराट्	१९				
			१०	द्विपदा विराट्	१८		५	विराट् पङ्क्तिः	३७[६]

६. त्र्यक्षरन्यूनं पङ्क्तिश्छन्दः । बह्वक्षरन्यूनमपि तदेव छन्दो भवति । द्र०— ऋ० भा० १७ । ४ ॥

२

मण्डलम्	सूक्तम्	द्विपदाः	मन्त्राः	छन्दः	अक्षरसंख्या	चतुष्पदाः	मन्त्राः	छन्दः	अक्षरसंख्या
१	७०	११	१	द्विपदा विराट्	१९		१	विराट् पङ्क्तिः	३८
			२	द्विपदा विराट्	१९				
			३	द्विपदा विराट्	२०	पञ्च	२	पङ्क्तिः	४०
			४	द्विपदा विराट्	२०	चतु-			
			५	द्विपदा विराट्	१९	ष्पदाः	३	निचृत् पङ्क्तिः	३९
			६	द्विपदा विराट्	२०				
			७	द्विपदा विराट्	२०		४	विराट् पङ्क्तिः	३८
			८	द्विपदा विराट्	१८				
			९	द्विपदा विराट्	१९		५	निचृत् पङ्क्तिः	४०
			१०	द्विपदा विराट्	२०	एका			
			११	द्विपदा विराट्	२०	द्विपदा	६	याजुषी पङ्क्तिः	२०

एवं १०५२२ ऋक्संख्यायां ३० संख्यासंकलनेन १०५५२ ऋक्संख्या भवति । इमामृक्संख्यां केचित् स्वयं धीराः पण्डितम्मन्यमानाः सर्वान् ऋषि-मुन्याचार्यविदुष आक्षिपन्तो महताऽऽटोपेन वर्णयन्ति अक्षिपन्ति च ते यथा स्वामी दयानन्दसरस्वतीमहाभागोऽपि न वेद ऋक्संख्यां न च स बुबोध द्विपदासु संख्याङ्कन-प्रकारं द्विपदारहस्यं च । केवलमनुचकार मैक्समूलरमहानुभावम्, प्रायो जनाः पाश्चा-त्यानामन्धानुकरणं कुर्वन्ति, इयमेव भ्रान्तिर्वैदिकमुनेः स्वामिहरप्रसादस्य तथा ऽऽचार्यसत्यव्रतसामश्रमिणो, वैदिकपदानुक्रमकोषसंपादकस्य विदुषो विश्वबन्धोश्च, सांप्रतं न कोऽपि विवेद द्विपदास्वरूपम् । तथाहि । द्विपदा द्विविधाः । सप्तदश (१७) नित्या द्विपदाः । चत्वारिंशदुत्तरं शतं (१४०) नैमित्तिकद्विपदाः ।

नित्यद्विपदा चित्रम्

(चित्रम् १९)

क्रमसंख्या	मण्डलम्	सूक्तम्	मन्त्राः	द्विपदासंख्या
१	१	७०	११	१
२	६	१०	७	१
३	६	१७	१५	१

२

क्रमसंख्या	मण्डलम्	सूक्तम्	मन्त्रः	द्विपदासंख्या
४	६	४७	२५	१
५	७	१७	७	१
६	७	३२	३	१
७	७	३४	२१	१
८	७	५६	११	१
९	८	१९	२७	१
१०	८	४६	१३	१
११	८	४६	२०	१
१२	९	६७	१६-१८	३
१३	९	१०७	३	१
१४	९	१०७	१६	१
१५	१०	१५७	५	१

पूर्ण संख्या —— १७

नैमित्तिक द्विपदा चित्रम्

(चित्रम् २०)

मण्डलम्	सूक्तम्	मन्त्रः	पूर्णसंख्या
१	६५	१-१०	१०
१	६६	१-१०	१०
१	६७	१-१०	१०
१	६८	१-१०	१०
१	६९	१-१०	१०
१	७०	१-१०	१०
५	२४	१-४	४
७	१७	१-६	६
७	३४	१-१०	१०
७	३४	११-२०	१०
७	५६	१-१०	१०

२

	मण्डलम्	सूक्तम्	मन्त्रः	पूर्णसंख्या
	८	२९	१-१०	१०
	९	१०९	१-१०	१०
	९	१०९	११-२२	१२
	१०	१५७	१-४	४
	१०	१७२	१-४	४
पूर्णसंख्या				१४०

यथा चोक्तं महीदासेन—

पश्वा न तायुं० (ऋ० १।६५।१-१०) दश । रयिर्न० (ऋ० १।६६।१-१०) दश ।
वनेषु० (ऋ० १।६७।१-१०) दश । श्रीणन्० (ऋ० १।६८।१-१०) दश ।
शुक्रः शुशुक्वाँ० (ऋ० १।६९।१-१०) दश । वनेम पूर्वीः (ऋ० १।७०।१-१०) दश ।
अग्ने त्वं नो० (ऋ० ५।२४।१-४) चत्वारि । अग्ने भव० (ऋ० ७।१७।१-६) षट् ।
प्र शुक्रैतु० (ऋ० ७।३४।१-१०) दश । राजा राष्ट्रानां० (ऋ० ७।३४।११-२०) दश ।
क ईं व्यक्ता (ऋ० ७।५६।१-१०) दश । बभ्रुरेको (ऋ० ८।२९।१-१०) दश ।
परि प्र धन्व० (ऋ० ९।१०९।१-१०) दश । तं तें सोतारो (ऋ० ९।१०९।११-२२) द्वादश ।
इमा नु कं० (ऋ० १०।१५७।१-४) चत्वारि । आ याहि वनसा (ऋ० १०।१७२।१-४) चत्वारि ।

इति नैमित्तिकद्विपदाश्चत्वारिंशोत्तरशतमिति ।

(चरणव्यूह टीका पृ० १८)

अस्यायमर्थः—उपरिनिर्दिष्टा १४० ऋचो नैमित्तिकद्विपदाः सन्ति ।

उपलेखायां नित्यद्विपदां संख्या निर्दिष्टा । तथाहि—

साधु० (ऋ० १।७०।११)। अंसिक्न्यां[1]० (४।१७।१५)
सिषक्तु[2] न (ऋ० ५।४१।२०)। उरौ[3] देवा (ऋ० ५।२४।१७)

१—इयमेकपदा । २—इयमेकपदा । ३—इयमेकपदा ।

[1]उरौ देवाः (ऋ० ५ । ४३ । १६)। वि द्वेषांसी० (ऋ० ६ । १० । ७)
अया वाजं० (ऋ० ६ । १७ । १५)। महि राधो० (ऋ० ६ । ४७ । २५)
[2]आ वां सुम्ने० (ऋ० ६ । ६३ । ११)। ते ते देवाय० (ऋ० ७ । १७ । ७)
रायस्कामो० (७ । ३२ । ३)। प्रति नः स्तोमं० (ऋ० ७ । ३४ । २१)
स्वायुधासं० (ऋ० ७ । ५६ । ११)। पितु र्न पुत्रः० (ऋ० ८ । १६ । २७)
स नो वाजेषु० (ऋ० ८ । ४६ । १३)। गावो न यूथ० (ऋ० ८ । ४६ । ३०)
पवस्व सोममन्दयन्० (ऋ० ९ । ६७ । १६-१८) इति तिस्रः ।
परि सुवान० (ऋ० ९ । १०७ । ३)
नृभिर्येमानो० (ऋ० ९ । १०७ । १६)।
प्रत्यञ्चमर्कमनयञ्छचीभिः० (ऋ० १० । १५७ । ५)।

इति द्विपदा एकपदा द्वाविंशतिः। तासां सप्तदश द्विपदाः। एकपदाः पञ्च। इति।

(उपलेख सूत्र वर्ग ६ । १-२)

मैक्समूलरमहोदस्यायमत्यल्पोऽपराधो यस्तेन द्विपदासु संख्याङ्कने प्रकारत्रयमवलम्बितम्।

१—पश्वा न तायुं (ऋ० १ । ६५) इत्यादिषु षट्सु सूक्तेषु या द्विपदाः सन्ति तासु चतुष्पदासंख्या प्रदत्ता।

२—अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥ १ । २ ॥
स नो बोधि श्रुधी हवमुरुष्याणो अघायतः समस्मात्।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ३ । ४ ॥
(ऋ० ५ । २४ । १-४)

इत्थं चतसृषु द्विपदासु १ । २ ॥ ३ । ४ ॥ एवं सहसंख्या दत्ता।

३—अन्यासु द्विपदासु द्विपदासंख्यैव निर्दिष्टा। वस्तुतस्तु नित्यवर्जं सर्वासु द्विपदासु द्विपदासंख्यैव दातव्या। चतुष्पदासंख्या च।

१—इयमेकपदा। २—इयमेकपदा।

अत एवाह कात्यायनः

द्विर्द्विपदास्त्वृचः समामनन्ति

(कात्यायनानुक्रमणी परिभाषाप्रकरणम्)

षड्गुरुशिष्यश्च व्याख्यातवान्—

ऋचोऽध्ययने त्वध्येतारो द्वे द्वे द्विपदे एकैकामृचं कृत्वा समामनन्ति समामनेयुः अधीयीरन्। म्ना अभ्यासे लिङर्थे लट्। शपि मनादेशः। द्वे द्विपदे यासां ता ऋचो द्विर्द्विपदाः। समामनन्तीति वचनाच्छंसनादौ न भवन्ति। तेन "पश्वा न तायुं०" इति शंसने दशर्चत्वम् आसां चाध्ययने तु पञ्चत्वं भवति।

अस्यायमर्थः—द्वयोर्द्वयोर्द्विपदयोरेकैकां चतुष्पदां कृत्वाऽध्येतारोऽधीयीरन्। शंसने=प्रयोगे द्विपदा एव विनियुक्ताः। 'पश्वा न तायुं' ऋ० १। ६५ इत्यादि—सूक्तानि शंसनकाले दशर्चानि परमध्ययनकाले पञ्चर्चानि।

चरणव्यूहटीकाकारो महिदासोऽप्याह—

हवने एकैका। अध्ययने द्वे द्वे

(पृष्ठ १६)

कात्यायनानुक्रमण्यां नित्यद्विपदाशब्दव्यवहारश्च दृश्यते।

अतः मैक्समूलरमनुकुर्वद्भिः सर्वैर्भ्रान्तमेव। इति स्वयंधीराणां पण्डितम्मन्यमानां मतम्।

(अन्यमतनिराकरणम्)

तत्रोच्यते—

क. द्विपदास्त्रिविधाः—

१—आर्षा हवनीया द्विपदाः। २—अपौरुषेयद्विपदाः। ३—अपौरुषेयसहद्विपदाः। हवनीया द्विपदा ऋषिभिर्द्विपदाः कृताः। अपौरुषेयदशायां ताश्चतुष्पदा एव। हवनीया द्विपदा असुसमाप्तवाक्यार्थाः। अपौरुषेयद्विपदाः सुसमाप्तवाक्यार्थाः। सुसमाप्तवाक्यार्था हि ऋचो भवन्ति। तत्र दिङ्मात्रमुदाह्रियते—

प॒श्वा न ता॒युं गुहा॒ चत॑न्तं॒ नमो॒ युजा॒नं नमो॒ वह॑न्तम्।
स॒जोषा॒ धीराः॑ प॒दैरनु॑ ग्म॒न्नुप॑ त्वा सीद॒न् विश्वे॒ यज॑त्राः॥

(ऋ० १। ६५। १)

अस्यायमर्थः—हे भगवन् (पश्वा) अपहृतस्य पशोः पादचिह्नादिना (न) यथाऽन्वेषकाः (तायुम्) चौरं प्राप्नुवन्ति तथा (सजोषाः) समानप्रीतयः समानसेवनाश्च (धीराः) विद्वांसः (विश्वे) सर्वे (यजत्राः) उपासकाः (नमो युजानम्) नम इत्यन्ननाम, उपलक्षणमात्रं चैतत् भक्तेभ्यः प्रदातुं सर्वभोग्यपदार्थाधारभूतम् । तथा (नमो वहन्तम्) नमस्कारं स्वीकुर्वन्तं (गुहा चतन्तम्) गुहायां सर्वपदार्थानां मध्ये चतन्तं व्याप्तम्, गुहायामन्तः करणे चतन्तमुपदेष्टारं वा (त्वा) त्वाम् (पदैः) प्रत्यक्षप्राप्तैः गुणनियमैः (अनुग्मन्) पश्चात् प्राप्नुवन्ति (उप सीदन्) उपासते च ।

'पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम्' इति पूर्वार्द्धभागस्तु कर्तृक्रियाहीनः कर्ममात्रपरः । सा कथमृक् स्यात् । तेषामृग् यत्रार्थवशेन पादव्यवस्था । मीमां २ । १ । ३५ ॥ प्रयोगे मन्त्रखण्डा अपि विनियुक्ताः स्युः किं नश्छिन्नम् । वयं तु ऋचो गणयितुं प्रवृत्ता न तु ऋक्खण्डान् । इषे त्वा । ऊर्जे त्वा । इत्यादयो यजुः खण्डा विनियुज्यन्ते परं मन्त्रस्तु 'इषे त्वा प्रभृति पशून् पाहि पर्यन्तमेक एव । तथा चोक्तं व्यासेन—

पशुहिंसा वारिता च यजुर्वेदादिमन्त्रतः ।

(महाभारत शान्ति पर्व ३४४ । २१)

अस्यायमर्थः—यजुर्वेदस्य प्रथममन्त्रात् "इषे त्वा ··· पशून् पाहि" रूपात् पशुहिंसा प्रतिषिद्धा वर्तते । 'पशून् पाहि' पर्यन्तं यजुर्वेदस्य प्रथमो मन्त्र इत्यर्थः । स एव गण्यते न तु यजुः खण्डाः' इषे त्वा' इत्यादयः । तस्मात् 'पश्वा न तायुम्' इत्यादिषु षट्सु सूक्तेषु सुसमाप्तवाक्यार्था ऋचश्चतुष्पदा एवापौरुषेय्यः । तास्त्रिंशदेव गणनीयाः । ननु या अन्या द्विपदाः सन्ति ता अपि चतुष्पदाः कृत्वा गणनीयाः । अयुक्तमेतद् । तासां चतुष्पदाकरणेन कोऽर्थः । तास्तु हवनेऽपि द्विपदाः सुसमाप्तवाक्यार्था अपौरुषेयदशायामपि द्विपदाः । तत्रापि दिङ्मात्रमुदाह्रियते—

अग्ने भवं सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीताम् ।

(ऋ० ७ । १७ । १ ॥)

अस्यायमर्थः—हे (अग्ने) अग्निरिव विद्वन् । अत्रोपमावाचकस्येवशब्दस्य लोपः, त्वं (सुषमिधा) यथा समिधाऽग्निः प्रदीप्यते तथा शोभनया समिधेव

धर्मक्रियया ब्रह्मचर्यसुशीलतापुरुषार्थादिना (समिद्धः) प्रदीप्तः (भव) (उत) अपि च यथा स प्रदीप्तोऽग्निः (उर्विया) पृथिव्या सह (बर्हिः) उदकं विस्तृणाति विस्तारयति आच्छादयति तथा भवान् विद्यया प्रकाशितो भूत्वा जिज्ञासुहृदयेषु विद्यां (वि स्तृणीताम्) तनोतु विस्तारयतु ।

सुसमाप्तवाक्यार्थो हीयमृक् । अत्र भव विस्तृणीताम् इति क्रियाद्वयं वाक्यार्थं पूर्णतां गमयति । अन्यथा ऋचा ऽस्या ऋचश्चतुष्पदाकरणे किं प्रयोजनम् ।

ख. ऋक्संहिताहस्तलेखेषु सायणादिभाष्यहस्तलेखेषु वा न कुत्रचनापौरुषेय-द्विपदासु चतुष्पदासंख्या दृश्यते ।

ग. ऋक्संहिताभाष्यकाराः सर्वे एव 'पश्वा न तायुं' इत्यादिकास्त्रिंशदृचश्चतुष्पदा एवाहुः । तथा च सायणभाष्यम्—

तत्र प्रथमामृचमाह—पश्वा न तायुम्॰ ''विश्वे यजत्राः ॥

द्वितीयामृचमाह—ऋतस्य देवा अनु व्रता ''सुजातम् ॥

तृतीयामृचमाह—पुष्टि र्न रण्वा क्षितिर्न पृथ्वी ''क ईं वराते ॥

चतुर्थीमृचमाह—जामिः सिन्धूनां भ्रातेव स्वस्राम् ''रोमा पृथिव्याः ॥

पञ्चमीमृचमाह—श्वसित्यप्सु हंसो न सीदन् ''विभुर्दुरेभाः ॥

(सायणभाष्य ऋ॰ १ । ६५ । १—५)

इन्दौरवागलकोटादितः प्राप्तेषु सायणभाष्यहस्तलेखेषु सर्वत्रेदृशः पाठ उपलभ्यते । राजारामशिवराम संपादिते १८१० शकाब्दे मुंबई मुद्रिते सायणभाष्येऽपि तथैव मुद्रितम् । अन्यासु द्विपदासु च सर्वत्र द्विपदायामेव 'प्रथमामृचमाह द्वितीयामृचमाह' इत्याह सायणो न तु तत्र चतुष्पदायां 'प्रथमामृचमाह द्वितीयामृचमाह' इति चाह सायणः । परं मैक्समूलरमहाभागेन स्वसंपादिते सायणभाष्ये 'तत्र प्रथमामृचमाह द्वितीयामृचमाह' इत्यादि पाठा हस्तलेखेषु विद्यमाना अपि परित्यक्ताः । अनुकृतं च पुण्यपत्तनस्थवैदिकसंशोधनमण्डलसंपादकैः ।

घ. सर्वा द्विपदाश्चतुष्पदा करणीयाः सर्वासु चोभयविधा संख्या द्विपदासंख्या चतुष्पदासंख्या च दातव्येत्यदृष्टपूर्वो न कुत्राप्युपलभ्यमान ऋक्संहिताप्रकारो मट्टसातवलेकरसंपादिते ऋक्संस्करणे दृश्यते । अकस्माज्जातप्रसिद्धिरयं भट्टसातवलेकरमहाभागश्चतुर्षो निमोलयाऽऽर्षासु द्विपदास्वपौरुषेयसहद्विपदास्वपौरुषेयद्विपदासु च सर्वत्रैव द्विपदासंख्यां चतुष्पदासंख्यां च दत्तवान् । तत्याज च सहद्विपदासु सह-

संख्यां वैदिकसंप्रदायभङ्गकारी । संहितासंस्करणेषु नव्यसंप्रदायप्रवर्तकोऽयं महानुभावोऽपि ऋ० ७ । ३४ सूक्ते विद्यमानासु द्विपदासु चतुष्पदासंख्यां न निरवहत् किंकर्तव्यतामूढः । तत्र द्विपदासंख्यैव दृश्यते न चतुष्पदासंख्या । तस्मिन् सूक्ते पञ्चाधिका विंशति ऋचस्तास्वेकविंशतिराद्या द्विपदाः । तत्र षोढश्या ऋचोऽहिर्देवता, सप्तदश्या ऋचश्चाहिर्बुध्न्यो देवता । सर्वा द्विपदाश्चतुष्पदाः करणीया इति सिद्धान्तेऽहिदेवताका षोढशी ऋक् विश्वेदेवदेवतया पञ्चदश्या ऋचा सह चतुष्पदा स्यात् अहिर्बुध्न्यदेवताका सप्तदशी ऋक् च विश्वेदेवदेवतयाऽष्टादश्या ऋचा सह चतुष्पदा स्यात् । एतादृशं शंसनं कुत्राप्यदृष्टवान् मुमोच चतुष्पदामोहं वराकः । अन्यत्र सर्वासु द्विपदासु प्रतिसूक्तमेकैव देवताऽस्ति तत्र निर्वाहितः सर्वद्विपदाचतुष्पदाकरणप्रकारः ।

यच्चोक्तं मैक्समूलरमनुकुर्वद्भिः सर्वं भ्रान्तमेव तदप्यविचारितरमणीयम् । मैक्समूलरमहोदयेन स्वसंपादिते ऋग्वेदस्य सायणभाष्यस्य द्वितीयसंस्करणे १८६० ख्रिस्ताब्दमुद्रिते 'पश्वा न तायुम्०' इत्यादौ सहसंख्या प्रदत्ता न तु चतुष्पदा

१—क. मैक्समूलर संपादितस्य सायणभाष्यस्य प्रथमसंस्करणे मुखपृष्ठे—

Published under the patronge of the honourable the EAST INDIA Company.

London

W. H. Allen and Co.

Book-Seller to the Honourable the East India Company.

7 Leaden Hall street

1849

ख. मैक्समूलर संपादितस्य सायणभाष्यस्य द्वितीयसंस्करणे मुखपृष्ठे—

Published under the patronage of his Highness the Maharaja of Vijaya nagar.

Lonon

Henry frowde

Oxford University Press ware house omen corner.

1890

ग. मैक्समूलरमृत्युसमयः—

1 November 1900

संख्या। मैक्समूलरमहाभागस्य मृत्युः १९०० ख्रिस्ताब्दे नवम्बरमासस्य प्रथमतारिकायां संजातः। तेन स्वजीवनकाल एव स्वयं द्वितीयं संस्करणं सायणभाष्यस्य संपादितम्। मुखमस्तीति वक्तव्यं दशहस्ता हरीतकीत्यन्यत्। मैक्समूलरस्यानुकृतिस्तु वैदिकसंशोधनमण्डलसंपादकैः कृता न तु महर्षिणा।

८. 'पश्वा न तायुं' इत्याद्याश्चतुष्पदा ऋचो याः शंसने-हवने-प्रयोगे द्विपदाः कृतास्तत्कृत्वा ऋक्संख्या न गणिता स्यादित्यभिप्रेत्यैव सायणाचार्योऽप्याह—

तत्र पश्वेत्यादीनि षट् सूक्तानि द्वैपदानि तेष्वध्ययनसमये द्वे द्वे ऋचौ चतुष्पदामेकैकामृचं कृत्वा समाम्नायते। अयुक्संख्यासु तु या ऽन्त्याऽतिरिच्यते सा तथैवाम्नायते। प्रायेणार्थोऽपि द्वयो र्द्विपदयोरेक एव। प्रयोगे तु ताः पृथक् शंसनीयाः। सूत्र्यते हि पश्वा न तायुमिति द्वैपदम् (आश्व० ८। १ ॥)

(सायणभाष्य ऋ० १। ६५। १ ॥)

अस्यायमर्थः—पश्वा न तायुं० इत्याद्याश्चतुष्पदा ऋचो विनियोजकैः सूत्रकारैर्यज्ञे प्रयोगार्थं द्विपदाः कृताः। वस्तुतस्तु ता अध्ययनसमये चतुष्पदा एव। चतुष्पदावस्थायामेव तासामर्थः संभाव्यते न तु द्विपदावस्थायाम्।

ऋ० १। ७० सूक्ते अयुक्तु—अयुतसंख्यासु एकादशसु द्विपदासु।

'साधुर्न गृध्नुरस्तेव शूरः०' ऋ० १। ७०। ६ ॥ इयमन्त्या द्विपदैव। सा हि सुसमाप्तवाक्यार्था। सायणस्यायं सन्दर्भः पश्वा न तायुं० इति षट्सूक्तपर एव न तु सर्वद्विपदापरः। अतएव 'याऽन्त्याऽतिरिच्यते सा तथैवाम्नायते' इत्युक्तं न तु 'या अन्त्या अतिरिच्यन्ते तास्तथैवाम्नायन्ते' इत्युक्तम्। 'प्रायेणार्थोऽपि द्वयोर्द्विपदयोरेक एव' इति सायणवचोऽपौरुषेयद्विपदासु कथं नाम संगच्छेत तत्रैकैकस्या द्विपदायाः स्वतन्त्रवाक्यार्थत्वात्। सायणभाष्येऽपौरुषेयद्विपदासु चतुष्पदाकरणस्योल्लेखो न दरीदृश्यते।

ननु न स्यात् सायणमते 'पश्वा न तायुं०' इत्यादिमन्त्राणां द्विपदासंज्ञा। यास्कस्तु 'पश्वा न तायुं०' मन्त्रान् द्विपदा एव प्राह। यथा चोक्तम्—

अग्निरपि यम उच्यते । तमेता ऋचोऽनु प्रवदन्ति ।

"सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत् त्वेषप्रतीका ॥
यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम् ॥
तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम् ॥"
(ऋ० १ । ६६ । ७—६)

इति द्विपदाः ।

(निरु० १० । २१ ॥)

अत्र हि 'तमेता ऋचोऽनुप्रवदन्ति' इति बहुवचनेन निर्देशः । 'इति द्विपदाः।' इति साक्षात् तासां द्विपदाशब्दप्रयोगश्च यास्केनाकारि । सत्यम् । यज्ञानुबन्धेन हि यास्को द्विपदामाह । शंसने हवने द्विपदा इति पूर्वमुक्तमेव ।

पराशरस्यार्षम् । प्रातरनुवाकाश्विनयर्विनियोगः । तदनुसारिणी यास्क-व्यख्या ततो द्विपदात्वम् । तथाहि—

(यास्ककृता व्याख्या)

अग्नेः अर्चिः (सृष्टा सेनेव) सेनापतिना प्रेरिताऽभ्यनुज्ञाता सेनेव (अमम्) भयम् (दधाति) धारयति शत्रुभ्यः (अमम्) बलं वा दधाति स्वेभ्यः । (अस्तुः) प्रक्षेप्तुः (दिद्युत् न) आयुधमिव दिद्युदिति वज्रनाम वज्रनामानि चायुधमात्रवच-नानि तेनात्र शक्तिरभिप्रेता प्रक्षेप्तुः शक्तिनामास्त्रमिवेत्यर्थः । (त्वेषप्रतीका) प्रतीकं दर्शनमुच्यते त्वेषशब्दश्च भयबलयशोमहत्प्रदीप्तवचनः । भयदर्शना—यस्या दर्शनादेव भयं जायते, बलदर्शना–यस्या दर्शनात् स्वेषु बलमुत्पद्यते, यशः प्रतीका यस्याः सेनाया दर्शनात् तत्सेनापतेः यशो भवति, महाप्रतीका–महादर्शना महती या दृश्यते, दीप्तप्रतीका–दीप्तदर्शना (यमो ह जातः) यम इन्द्रेण सह संगतोऽग्निः जात उत्पन्न भूतसङ्घः (यमो जनित्वम्) तादृशोऽग्निरेव जनिष्यमाणं भूतजातम् । 'इन्द्राग्नी" इत्येवं रूपेणाग्निर्यमज इवेन्द्रेण सह स्तूयते । यत्किंचिद् भूतं भविष्यच्च चान्नादिकं तत्सर्वमग्न्यधीनमेव तत्सहायेन तदुत्पत्तेः । अयमग्निः (कनीनां जारः) कन्यानां कन्यात्वस्य जरयिता । अग्निसमीपे विवाहसमये कन्यात्वमपगच्छति भार्यात्वं च समधिगम्यते । (जनीनां पतिः) जनीनां जायानां पालकः ऽग्निर्भवति। उक्तं च यास्केन "तत्प्रधाना हि यज्ञसंयोगेन भवन्ति ।" निरु० १०।२१॥ यज्ञसंयोगेन स्त्रियोऽग्निप्रधाना भवन्ति । अग्निसमीपे ता जायात्वस्य व्रतं गृह्णन्ति

व्रतसमाप्तिपर्यन्तं चाग्निपरतन्त्रा भवन्ति 'पत्युर्नो यज्ञसंयोगे' शब्दानु० ४। १। ३३। इति पत्नीशब्दसिद्धिरपि यज्ञसंयोगेनैव। यज्ञस्य पत्नीसाधनत्वात् तत्फलग्रहीतृत्वाद्वा। पत्नीविरहितस्य यज्ञेऽनधिकारः। पतिकर्तृकफलग्रहीत्री हि सा तस्य कर्मणः पत्नीसहायेन निष्पादितत्वात्।

एवं प्रातरनुवाकाश्विनयोर्विनियोगेऽग्निस्तुतिपरस्यार्थस्य व्याख्याता यास्क 'इति द्विपदाः' इत्याह। वस्तुतस्तु चतुष्पदा इमा ऋचः।

(महर्षिभाष्यानुसारिणी व्याख्या)

यः सेनापति (यमः) नियन्ता (ह) किल (जातः) प्रकटत्वं गतः (यमः) सर्वथा नियामकः (जनित्वम्) जन्मादिकारणं जनक इव वर्तमानः (कनीनाम्) कन्येव वर्तमानानां रात्रीणां (जारः) हन्ता सूर्य इव द्योतमानः (जनीनाम्) प्रजानाम् (पतिः) पालकश्चास्ति सः (सुष्टा) सुशिक्षिता (सेनेव) विजयकर्त्री सेनेव (अस्तुः) शस्त्रास्त्राणि प्रक्षेप्तुः (त्वेषप्रतीका) स्वदीप्तिभिः प्रतीयमाना (दिद्युत् न) विद्युदिव वर्तमानमायुधमिव (अमम्) अपरिपक्वविज्ञानं जनम् (दधाति) धारयति स्वसंरक्षणे।

एवं चतुष्पदाया ऋचोऽर्थः। अपौरुषेयचतुष्पदा विनियोजकैर्द्विपदाः कृत्वा विनियुक्ता व्याख्याताश्च। तस्मात् 'पश्वा न तायुम्०' इत्यादयो मन्त्राश्चतुष्पदा एवापौरुषेयदशायां ततस्त्रिंशदेव गणनीया न तु षष्टिः।

एतेन नित्यनैमित्तिकद्विपदाचतुष्पदाप्रवक्तारो महीदासादयोऽपास्ताः।

(सहद्विपदासु सहसंख्या)

यच्चोक्तं ऋ० ५। २४ सूक्ते द्विपदासु सहसंख्या किमर्थं दत्ता। मैक्समूलरस्य भ्रान्त्या स्वामिदयानन्दसरस्वतीमहोदयेनापि भ्रान्तम्। एतदप्यसांप्रतमेव। अग्ने त्वं नोऽन्तम० ऋ० ५। २४। १–४) इति चतसृषु ऋक्षु संप्रदायं निर्वोढुं सहसंख्यैव दातव्या। ता हि सहऋचस्तयोर्द्वयोर्द्वयो ऋचोः सह साक्षात्कृतत्वात् सह साक्षात्कर्तुं योग्यत्वाच्च। अपौरुषेयावस्थायामेव सहसंख्यावत्त्वात्। इदमप्यन्यदत्रावधेयं यत् समानमन्त्राणामपि पूर्वोत्तरप्रकरणवशतोऽर्थान्तरावस्थितिर्भवति। साक्षात्कर्तुर्ऋषेर्भेदाच्च विभिन्नार्थसाक्षात्कारश्च जायते। एवं दैवतच्छन्द आदिष्वपि ज्ञेयम्। अतोऽन्यवेदगतानामीदृशमन्त्राणां भिन्ना स्थितिः।

ननु विचित्रोऽयं प्रकारो यद् भवन्ति सहऋचोऽपीति । शृणु—यथा सहासना ऋषयो भवन्ति तथा सहऋचोऽपि । उक्तं च वेङ्कटमाधवेन—

सहासनकृतां तत्र संप्रीतिं कारणं विदुः ।
आत्ममन्त्रसमांश्चैते मन्त्रान् पश्यन्ति संगताः ॥
बहवः सन्ति ननु च द्रष्टारो द्वैपदस्य ये ।
बन्धुः सुबन्धुरित्येते सत्यं ते भ्रातरोऽभवन् ॥

वेङ्कटमाधवानुक्रमणी ५ । ६ । ६, १० ।

एतदेवाभिप्रेत्य सायणाचार्योऽपि ऋग्वेदभाष्ये प्राह—
तत्रेमे प्रथमद्वितीये । अथ तृतीयाचतुर्थ्यौ ।

(ऋ० सायणभाष्य ५ । २४ । १—४)

एवं सायणो द्वयोर्द्वयो ऋचोः सहनिर्देशं चकार । सायणभाष्यस्य हस्तलेखेषु विद्यमाना अप्येते पाठा मैक्समूलरमहोदयेन परित्यक्ता अनुकृतं च वैदिकसंशोधनमण्डलसंपादकैः । परमेते पाठा राजाराम शिवराम संपादिते १८१० शकाब्दे मुंबईनगरे मुद्रिते सायणभाष्येऽद्यापि दृश्यन्त एव । अतः सहऋचासु द्विपदासु सहसंख्यैव देया सर्वत्र तथैवोपलब्धेः । मैक्समूलरसंपादितेषु ऋक्संहितायां पदपाठे सायणभाष्यस्य प्रथमद्वितीयसंकरणयोरन्यत्र मुद्रिते सायणभाष्ये संहितासंस्करणे हस्तलेखेषु च सहसंख्यैव दृष्टा ।

तच्चैतदजानता मैक्समूलरेण ऋक्संहितायाः सायणभाष्यस्य द्वितीयसंस्करणे 'पश्वा न तायुं०' इत्यादिषु ऋक्ष्वपि सहसंख्या प्रदत्ता तदप्यनुकृतं वैदिकसंशोधनमण्डलसंपादकैः । द्विपदानां त्रैविध्यात् द्विपदासु त्रिविधसंख्याङ्कनप्रकारः शोभते महर्षेर्द्विपदातत्त्वज्ञस्य । तद् भूषणं न तु दूषणं महर्षेः । आर्षासु द्विपदासु चतुष्पदा संख्यैव देयाऽपौरुषेयदशायां तासां चतुष्पदात्वात् द्विपदास्तु शंसने ऋषिभिः कृताः । सहऋचासु द्विपदासु सहसंख्यैव देया । अन्यत्रापौरुषेयद्विपदासु द्विपदासंख्यैव देयेति सुस्थमेव ।

ननु भवतामियं नवीना कल्पना भवन्ति त्रिविधा द्विपदाः । नित्यनैमित्तिकद्विपदाः श्रूयन्ते । सत्यम् । अत्रेदं पृच्छयते यथा वेदे ऋचां स्थितिस्तथा व्यवहारः

कर्तव्य उताहो स्विद् यथा नवीनैः परिभाषितं तथा वेदः कर्तव्यः । यथा तैर्दृष्टं तथा तैः परिभाषितं यथाऽस्माभिर्दृष्टं तथाऽस्माभिः परिभाषितम् । बाह्याभ्यन्तरप्रमाणानि, परम्परा, हेतवश्च यथायथं प्रदर्शितानि । तदनभ्युपगमे समस्तदर्शनवैयाकुली स्यात् ।

ततो 'पश्वा न तायुं०' द्विपदा कृतया त्रिंशत्संख्याभिवृद्धया १०५५२ ऋचो भवन्तीत्यपसिद्धान्तः ।

१०५२२ ऋच ऋग्वेदे सन्तीत्येव सुवचम् । एतामेव ऋक्संख्यां मैक्समूलर-महोदयः सत्यव्रतः सामश्रमी च स्वीचकार । इमामेव संख्यामश्रित्य वैदिकपदानु-क्रमकोषसंपादनम् । मैकडानलमहोदयोऽपि ऋक्सर्वानुक्रमणीभूमिकायां १७, १८ पृष्ठे खिलवर्जम् ऋचां संख्या द्विचत्वारिंशदधिकचतुःशतदशसहस्रम् (१०४४२) इत्याह । तत्र वालखिल्य ऋचामशीतिः संख्या तत्संकलनेन १०४४२+८०= १०५२२ ऋक्संख्या संपद्यते ।

(अथ द्विपदात्वविवेचनम्)

कात्यायनादयो द्वयोर्द्वयोर्द्विपदयोरेकैकां चतुष्पदामाहुः । तथाहि—

विंशतिका द्विपदा विराजः । तदर्धमेकपदाः ।
द्विर्द्विपदास्त्वृचः समामनन्ति । अयुग्वन्त्या द्विपदैव ।

(कात्यायनानुक्रमणी परिभाषा खण्डः)

अस्यायमर्थः—यस्यां द्विपादयस्यामृचि विंशतिरक्षराणि सन्ति सा द्विपदा विराट्छन्दस्का ज्ञेया । एकपदायामृचि तदर्धं दशाक्षराणि भवन्ति । अध्येतारो द्वयोर्द्विपदयोश्चतुष्पदां कृत्वाऽधीयते । अयुतसंख्यासु द्विपदासु यान्त्या शिष्यते सा द्विपदैव ।

प्रातिशाख्यकारस्त्वेकामेव द्विपदां चतुष्पदां करोति । तथाहि—

विराजो द्विपदाः केचित् सर्वा आहुश्चतुष्पदाः ।
कृत्वा पश्चाक्षरान् पादांस्तांस्तथाऽक्षरपङ्क्तयः ॥

(ऋ० प्रा० १७ । ५० ॥)

अस्यायमर्थ—या विंशत्यक्षरा द्विपदा विराजः सन्ति तासां पञ्चाक्षरान् चतुरः पादान् कृत्वा केचिच्च चतुष्पदाः प्राहुः । तासामक्षरपङ्क्तिश्छन्दः । तथाहि—

त्मना॑ स॒मत्सु॑, हि॒नोत॑ य॒ज्ञम् ।
दधा॑त के॒तुं, जना॑य वी॒रम् ॥

(ऋ० ७ । ३४ । ६)

अत्रैकस्यामेव विंशत्यक्षरायां द्विपदायां पञ्चाक्षरान् चतुरः पदान् उपर्युक्तदिशा केचित् कुर्वन्ति । द्विपदामेव चतुष्पदामाहुः ।

द्विपदाशब्देन पादसंख्या निर्दिश्यते । विराज् शब्देन चाक्षरसंख्या । अस्यामृचि कियन्तः पादा कियन्ति चाक्षराणि भवन्त्येतद् द्विपदाविराज्शब्दावाहतुः । तत्र किं छन्द इति छन्दो नामाप्यवश्यं देयम् ।

अत्राह प्रातिशाख्यकारः—

एक एकपदैतेषां द्वौ पादौ द्विपदोच्यते ।
ते तु तेनैव प्रोच्येते सरूपे यस्य पादतः ॥

(ऋ० प्रा० १७ ५५ ॥)

अस्यायमर्थः—यस्यामृच्येकः पादः सैकपदा यस्यां च द्वौ पादौ सा द्विपदा प्रोच्यते । परं छन्दो नाम तस्य पृथग् देयम् । यस्यच्छन्दसः पादेनास्य सादृश्यं तच्छन्दोनाम तस्यामेकपदायां द्विपदायां वाऽवश्यं निर्देश्यम् । प्रातिशाख्यव्याख्याकार उवटोऽप्याह—

छन्दसां मध्ये यस्यच्छन्दसः पादतः सरूपे भवतः । यदि गायत्रस्य सरूपे भवतो यदि वा त्रिष्टुभः । गायत्री द्विपदा त्रिष्टुबेकपदा । इति (उवट)

स्पष्टम् ।

छन्दः संख्या परिशिष्टे ऋग्वेदीयछन्दोगणनायाम्—

एकपदास्तु षट् प्रोक्ता द्विपदा दश सप्त च ।

(छन्दः संख्यापरिशिष्ट ८)

इति कथनं न समञ्जसम्। अनिर्दिश्य छन्दोनाम केवलमेकपदाः षट् सप्तदश च द्विपदा इति कथनं न छन्दोज्ञानं कारयति। महर्षिणा तु सर्वत्र छन्दोनामानि निर्दिष्टानि।

पिङ्गलसूत्रेष्वपि द्विपदामध्ये द्विपदा विराट् परिगणिता—

तृतीयं द्विपाज्जागतगायत्राभ्याम्। (पिङ्गल ३। १६॥)

अस्यायमर्थः—यस्यां जागतगायत्रपादौ भवतः सा तृतीयमर्थात् विराट् द्विपदा गायत्री छन्दः। पिङ्गलसूत्रेषु तृतीयाध्याये 'गायत्र्या वसवः' 'जगत्या आदित्याः' 'विराजो दिश' इति सूत्रत्रयमध्ये तृतीयं 'विराजो दिशः' अतः तृतीय-शब्देन विराडुच्यते। जगतीशब्दो द्वादशसंख्यावाचको गायत्रीशब्दश्चाष्टसंख्यामाह[1]।

(वेङ्कटमाधवस्य ऋक्संख्या)

वेङ्कटमाधव ऋग्वेदभाष्ये पञ्चमाष्टकस्य पञ्चमाध्यायभूमिकाश्लोकेषु ऋक्संख्या-माह—

शतैश्चतुर्भिरधिकमयुतं गणितं मया।
द्वे च यान्यतिरिच्यन्ते द्विपदाश्चात्र संगताः॥
पृथग् यदा तु गणनं द्विपदानां तदाधिका।
चतुःशतादशीतिश्च वाक्यं च ग्रहवानयम्॥

अस्यायमर्थः—मया वेङ्कटमाधवेन द्वे च यान्यतिरिच्यन्ते अर्थाद्द्व्यधिकं चतुः-शतादधिकं चायुतं दशसहस्रं गणितम्। ऋग्वेदे १०४०२ ऋचः परिगणिताः। अत्र द्विपदाश्चतुष्पदीकृता वर्तन्ते। यदा तु द्विपदानां पृथक् गणना कृता तदा १०४८० ऋचो भवन्ति। अस्य सांकेतिकं वाक्यं ग्रहवानयम् इति वेङ्कटमाधवमतम्।

नव्यमते १०५५२ ऋचः। तत्र १७ नित्यद्विपदाः। १४० नैमित्तिकद्विपदाः। नित्यद्विपदाश्चतुष्पदा न कर्तुं शक्यन्ते तासां विषमसंख्यादिस्थितेः। १४० नैमित्तिक-द्विपदा यदा चतुष्पदाः संपाद्यन्ते तदा ७० संख्या न्यूना भवति। १०५५२ ÷ ७०=१०४८२ ऋचो भवन्ति ततोऽपि खिलऋचां ८० संख्या यदा व्यवकलिता तदा १०४८२ ÷ ८०=१०४०२ ऋक्संख्या भवति। एषा वेङ्कटमाधवस्य चतुष्पदा-पक्षे ऋक्संख्या। द्विपदापक्षे द्विपदानां पृथक् गणनायां ७० संख्यैवाधिका भवेत्

१—'आद्यं चतुष्पाद्दतुभिः' पिङ्गल ३। ८॥ इति गायत्र्या अधिकारः।

१४० नैमित्तिकद्विपदा एव चतुष्पदीकृता आसन् न तु १७ नित्यद्विपदा अपि। तदा १०४७२ ऋक्संख्या स्यान्नतु १०४८० संख्या। वेङ्कटमाधवोक्ता १०४८० द्विपदाकृता ऋक्संख्या चिन्त्या।

(छन्दःसंख्याया ऋक्संख्या)

छन्दःसंख्यायां छन्दोऽनुसारमृक्संख्या परिगणिता तथाहि—

"एकपञ्चाशद् ऋग्वेदे गायत्र्यः शाकलेयके।
सहस्रद्वितयं चैव चत्वार्यैव शतानि तु ॥ १ ॥
त्रीणि शतानि सैकानि चत्वारिंशत् तथोष्णिहः।
अनुष्टुभां शतान्यष्टौ पञ्चाशत् पञ्चसंयुता ॥ २ ॥
बृहतीनां शतं ज्ञेयमेकाशीत्याधिकं बुधैः।
शतानि त्रीणि पङ्क्तीनां द्वादशाभ्यधिकानि तु ॥ ३ ॥
पञ्चाशत् त्रिष्टुभः प्रोक्तास्तिस्रश्चैव ततोऽधिकाः।
सहस्राण्येव चत्वारि विज्ञेयं तु शतद्वयम् ॥ ४ ॥
चत्वारिंशत् तथाष्टौ च तथा चापि शतत्रयम्।
जगतीनामियं संख्या सहस्रं तु प्रकीर्तितम् ॥ ५ ॥
दशैवातिजगत्यो ऽपि तथा सप्त न संशयः।
शक्वर्यो ऽपि तथैवोक्तास्तथा नव विचक्षणैः ॥ ६ ॥
नव चैवातिशक्वर्यः षडष्टयः प्रकीर्तिताः।
अशीतिश्च चतस्रश्च तथात्यष्टिऋचः स्मृताः ॥ ७ ॥
धृतिद्वयं विनिर्दिष्टमेकातिधृतिरेव च।
एकपदास्तु षट् प्रोक्ता द्विपदा दश सप्त च ॥ ८ ॥
प्रगाथा बार्हता ये ऽत्र तेषां शतमुदाहृतम्।
चतुर्नवतिरेवोक्तास्तद्वद् द्वयृचास्त्वसंशयः ॥ ९ ॥
काकुभानां तु पञ्चाशद् विज्ञेया पञ्चसंयुता।
महाबार्हत एवैक एवं सार्धं शतद्वयम् ॥ १० ॥

एवं दश सहस्राणि शतानां तु चतुष्टयम् ।
ऋचां द्व्यधिकमाख्यातमृषिभिस्तत्त्वदर्शिभिः ॥ ११ ॥"

अस्यायमर्थः—ऋग्वेदे २४५१ गायत्र्यः । ३४१ उष्णिहः । ८५५ अनुष्टुभः । १८१ बृहत्यः । ३१२ पङ्क्तयः । ४२५३ त्रिष्टुभः । १३४८ जगत्यः । १७ अतिजगत्यः । १९ शक्वर्यः । ९ अतिशक्वर्यः । ६ अष्टयः । ८४ अत्यष्टयः । २ धृतीः । १ अतिधृतिः । ६ एकपदाः । १७ द्विपदाः । १९४ बार्हतप्रगाथाः । ५५ काकुभप्रगाथाः । १ महाबार्हतप्रगाथः । एते प्रगाथा द्वृचा ऋग्द्वयसमुदाया इत्यर्थः १९४+५५+१=२५० सार्धशतद्वयं सर्वे प्रगाथाः सन्ति तेषां द्विगुणनेन ५०० ऋचो भवन्ति । एवं ऋग्वेदे १०४०२ ऋचः ।

नव्यमते द्विपदापक्षे १०५५२ ऋक्संख्या । १०५५२ ऋक्संख्यायां १४० नैमित्तिकद्विपदा यदा चतुष्पदाः संपाद्यन्ते तदा ७० संख्या न्यूना भवति । १०५५२÷७०=१०४८२ ऋक्संख्या । तत्रापि ८० खिलऋचो व्यवकलिताः स्युस्तदा १०४८२÷८०=१०४०२ ऋक्संख्या ।

(महीदासस्य ऋक्संख्या)

चरणव्यूहटीकाकारमहीदासमते—ऽर्धर्चपक्षे—१०४९६ ऋक्संख्या । तथा चोक्तम्—

अथाध्ययने ऋक्संख्योच्यते । षण्णवत्याधिकचतुःशतदशसहस्राणीति १०४९६ ॥

(चरणव्यूह पृ० २१)

अस्यायमर्थः—ऋग्वेदे त्रीणि त्रीणि अर्धर्चा ऋचः ९४ सन्ति । पूर्वनिर्दिष्टायां १०४०२ ऋक्संख्यायां ९४ संख्यासंकलनेन १०४९६ ऋक्संख्या भवति ।

चरणव्यूहटीकाकारमहीदासमते द्विपदापक्षे १०५५२ ऋचः । तथाचोक्तम्—

ऋग्द्वयसमुदायः प्रगाथो भवति । तत्र पूर्वस्या ऋचो यच्छन्दस्तेन छन्दसा प्रगाथस्य नामकरणं जायते । यथा बार्हते प्रगाथे द्वे ऋचौ तत्र प्रथमा ऋक् बृहतीछन्दस्का द्वितीया ऋक् सतोबृहतीछन्दस्का तत्र बृहत्याः नामकरणेन बार्हतः प्रगाथः । काकुभप्रगाथे प्रथमा ऋक् ककुप् द्वितीया ऋक् सतोबृहती तत्र ककुभा नामकरणेन काकुभः प्रगाथः । महाबार्हतप्रगाथे प्रथमा ऋक् महाबृहती द्वितीया ऋक् महासतोबृहती तत्र महाबृहत्या नामकरणेन महाबार्हतः प्रगाथः । (द्र० शब्दानु० ४ । २ । ४४ ॥)

बालखिल्यसहिता सर्वानुक्रमणीग्रमन्त्ररूपी ऋक्संख्योच्यते। द्विपदाश्चाशदधिकपञ्चशतदशसहस्राणि। बालखिल्यव्यतिरिक्ता संख्या तु द्विसप्तत्यधिकचतुःशतदशसहस्र ऋक्—१०४७२ ॥

(चरणव्यूह पृ० १७)

अस्यायमर्थः—ऋग्वेदे द्विपदापक्षे बालखिल्यसहिता १०५५२ ऋक्संख्या। बालखिल्यरहिता १०४७२ ऋक्संख्या।

(कात्यायनमतम्)

ऋग्वेदसर्वानुक्रमणीकारकात्यायनमते—१०५५२ ऋक्संख्या।

(सत्यव्रतसामश्रमिणो मतम्)

सत्यव्रतसामश्रमिमते १०५२२ ऋक्संख्या तथा चोक्तं तेन—

अस्मत्परिगणनया त्वत्र बालखिल्यसहिता १०५२२ ऋचः सन्ति।

(ऐतरेयालोचनम् पृष्ठ १४३)

(पारायण ऋक्संख्या)

पारायणविधौ १०५८१ ऋक्संख्या। तथा चोक्तम्—

ऋचां दश सहस्राणि ऋचां पञ्चशतानि च।
ऋचामशीतिः पादश्च पारायणविधौ खलु ॥
पूर्वोक्तसंख्यायाश्चेत्तु सर्वशाखोक्तसूत्रगाः।
मन्त्राश्चैव मिलित्वैव कथनं चेति पुनः पुनः ॥

(शौनकादिस्मृतिः)

ऋचां दश सहस्राणि ऋचां पञ्च शतानि च।
ऋचामशीतिः पादश्च पारणं संप्रकीर्तितम् ॥ ४३ ॥

(अनुवाकानुक्रमणी)

ऋचां दश सहस्राणि ऋचां पञ्च शतानि च।
ऋचामशीतिः पादश्चैतत् पारायणमुच्यते ॥

(चरणव्यूह पृ० १४)

अस्यायमर्थः—ऋग्वेदस्य सर्वशाखासूत्रगता ऋचो दश सहस्रं पञ्चशतमशीतिस्तथैकः पादः 'भद्रं नो अपि वातय मनः' ऋ० १०। २०। १॥ इत्येकपादा। एवं १०५८१ पारायणसंख्या वर्ण्यते।

१०५२२—महर्षेरियं निर्विवादमृक्संख्या। तत्समालोचनं बाललीलामात्रमिति पूर्वं प्रपञ्चितम्।

१०५५२—केचित्—पृश्वा न तायुमित्यादि षट्सूक्तगतास्त्रिंशच्चतुष्पदाः षष्टिर्द्विपदाः कृत्वा गणयन्ति तदा त्रिंशत्संख्याधिका भवति १०५२२+३०=१०५५२ ऋक्संख्या।

१०४७२—अन्ये—वालखिल्यसूक्तानां या ८० ऋचः सन्ति ताः १०५५२ ऋक्संख्याया व्यवकलयन्ति तेषां ५०५५२÷८०=१०४७२ ऋक्संख्या।

१०४८२—अपरे तु—या ६७ द्विपादवत्य ऋचः सन्ति तत्र सप्तदश (१७) तु नित्या द्विपदास्ताश्चतुष्पदाः कर्तुं न शक्यन्ते शिष्टा या अशीतिः (८०) द्विपदास्ताश्चतुष्पदाः कुर्वन्ति तदा तेषां चत्वारिंशत्संख्या न्यूना भवति। १०५२२÷४०=१०४८२ ऋक्संख्या। ६७ द्विपदावत्यऋचः ६०—६४ पृष्ठे प्रपञ्चिताः।

१०४०२—इतरे—१०४८२ ऋक्संख्याया ८० वालखिल्यऋचो व्यवकलयन्ति तेषां १०४८२÷८०=१०४०२ ऋक्संख्या।

१०४६६—महीदासस्तु १०४०२ ऋक्संख्यायां ६४ त्रीणि त्रीणि अर्द्धर्चा ऋचो याः सन्ति ताः द्विगुणाः कृत्वा संकलयति तस्य १०४०२ +६४=१०४६६ ऋक्संख्या।

१०४१७—शाकलचरणान्तर्गतशैशिरीयशाखाया ऋक्संख्या।

१०४१६—शाकलचरणान्तर्गता वर्गानुसारं पञ्चशाखा संख्या। अत्र संज्ञानसूक्तस्य पञ्चदश ऋचः संमिलिताः।

१०४०४—संज्ञानसूक्तं विना १०४०४ ऋक्संख्या शाखान्तरकृता

१०४४२—मैकडानलमहोदयस्य खिलवर्जमियं संख्या। खिलसंकलने १०४४२+८०=१०५२२ संख्या भवति।

१०४८०—वेङ्कटमाधवस्य द्विपदापक्षे विचारणीय ऋक्संख्या ।

१०५६६—महीदासस्य द्विपदापक्षे ऽर्धर्चपक्षे च । १०४०२+७०+६४=१०५६६ ।

१०५८१—पारायणसंख्या । अथवा महीदासानुसारम्—
१०४९६ ऋक्संख्यायां नैमित्तिकद्विपदां सप्तति (७०) संख्याया संकलनेन १०४९६+७०=१०५६६ ऋक्संख्या । तत्रापि संज्ञानसूक्तस्य पञ्चदश (१५) संख्या संकलिता क्रियेत, तदा १०५६६+१५=१०५८१ ऋक्संख्या भवति । परन्तु संज्ञान-सूक्तस्य पञ्चदश संख्या संकलते संज्ञानसूक्तस्य चत्वारो वर्गा अपि संकलिताः स्युस्तदा वर्गसंख्या २००६+४=२०१० स्यात् । अनुवाकानुक्रमण्यां खिलवर्जं २००६ वर्गसंख्या ।

(मैक्डानलमहोदयस्य ऋक्संख्या)

मैक्डानलमहोदय ऋक्सर्वानुक्रमणीभूमिकायामृक्संख्यामाह । तथाहि—

The grand total of Verses in the Śākal recension of Rigveda resulting from the addition of the totals for each Mandal is thus 10442. Which is the exact sum I obtain by adding up the aggregates of each metre, where as the same calculation for the aggregates of the Khandah—Saṅkhyā produce only 10402. Dayanand Saraswati, though his totals for each would give only 10521, states the grand total to be 10589. My total by counting the dvipadās (127) twice would be 10569, only eleven less than the figure of the Anuvākānukramaṇí. I think it is not at all improbable that the apparent inconsistencies in the numerical statement for this ancient index will be removed by taking into consideration all the Verses of Rigveda which are repeated. If this should prove to be the case it will indeed be one of the most remarkable fact in the history of literature that a people should have preserved its sacred book without adding chiefly by means of oral tradition, the subjoined table shows the distribution of the metres in detail.

अस्यायमर्थः—प्रतिमण्डलान्तर्गतमन्त्राणां परिगणनेनोपलब्धः शाकल-शाखाया ऋग्वेदस्य मन्त्राणां वृहद्योगः १०४४२ इति संपद्यते । स एव मम छन्दसां परिगणनेन चाप्यते । परं छन्दःसंख्याग्रन्थस्य परिगणनेन स १०४०२ इति संजायते । दयानन्दसरस्वतीस्वामिना यद्यपि मण्डलाधारेण संकलिते वृहद्योगे १०५२१ इति सत्यपि १०५८९ इति समग्रो योगः स्वीकृतः । मम योगे १२७ द्विपदानां द्विः परिगणनेन १०५६९[क] संख्या संपद्यते । सा चानुवाकानुक्रमण्यां निर्दिष्टायाः संख्यातो ११ संख्या न्यूना भवति[ख] । मन्ये ऋग्वेदस्य द्विरावृत्तानां मन्त्राणां विषये गवेषणया प्राचीनतमायां सूच्यां[ग] संख्यागतस्य स्पष्टविरोधस्य परिहरणं नासंभवम् । यदीदमेव तत्त्वं निश्चीयते तदा साहित्यस्येतिहासे महद् वैचित्र्यमिदं यत् सन्ति तेऽपि जना यैः स्वपवित्रग्रन्थो रटनसंप्रदायमुखेन तथा रक्षितो यथा नैकस्यापि न्यूनताऽधिकता वा समजनि । संलग्नेन चित्रेण छन्दोऽनुसारमृचां विभागो ज्ञेयः ।

(ऋक्सर्वानुक्रमणी मैकडानल भूमिका पृष्ठ १७, १८)

क. १०४४२+१२७=१०५६९ मैकडानलसंख्या । अयुक्तमेतत् । चतुष्पदा द्विपदाः कृत्वा द्विर्गण्यन्ते न तु द्विपदा अपि द्विगुणीक्रियन्ते ।

ख. पारायणसंख्या १०५८० एकश्चपादः । १०५६९+११=१०५८० संख्या ।

ग. छन्दःसंख्यायाम् ।

(चित्रम् २१)

Man-dal	G.	U.	A.	B.	P.	T.	J.	Atij	S.	Atis	A.	Aty	D.	Ati-dh.	DV.	EK.	B.Pr	K.Pr	MPr	Total
1	472	21	117	5	61	742	356	—	—	5	4	80	1	1	31	—	80	—	—	1976
II	37	—	14	1	—	[1] 230	[2] 142	—	—	4	1	—	—	—	—	—	—	—	—	429
III	104	10	27	19	2	399	50	—	—	—	—	—	—	—	—	—	6	—	—	617
IV	[3] 119	[4] 2	27	—	—	[5] 403	33	1	1	—	1	—	1	—	—	1	—	—	—	[5] 589
V	79	[6] 19	155	6	54	[7] 284	103	11	[8] 1	—	—	—	—	—	4	[9] 3	4	4	—	[10] 727
VI	137	9	45	14	5	478	[11] 39	1	[12] 6	1	—	—	—	—	3	[13] 1	20	4	2	[14] 765
VII	61	1	44	4	1	586	39	—	1	—	—	—	—	—	40		64	—	—	841
VIII	[15] 733	22	[16] 112	[17] 89	[18] 33	81	65	3	7	—	—	—	—	—	13	—	[19] 188	84	—	[20] 1656
IX	600	42	55	10	20	149	166	—	—	—	—	3	—	—	27	—	22	14	—	[21] 1108
X	108	12	260	32	72	901	351	—	4	—	—	—	—	—	9	1	4	—	—	1754
Total	2450	344	856	180	248	4253	1344	16	20	10	6	83	2	1	127	6	388	106	2	10442

(1) Khaudoşn. 229 (2) Kh 143 (3) Kh 120 (4) Kh 1 (5) the total of Kh is 588, 402T, 2S and no Ekpada. The explanation is that a tristubh and the following ekpada are here considered a Sakvari it is the same in mandals V and VI.

(6) Omitted in kh (7) kh 281 (8) kh 5 (9) none kh, (10) kh 724 see note 5 (11) kh 40 (12) kh 7 (13) none kh (14) kh 764 (15) kh 717 (16) kh 104. the difference in these cases is exactly made up for by 8 Anushtummukhas (=8 an and 16 gay). (cp. Sarv introd. 116) which though not mentioned in the Kh. Sankhya are given in Sarv VIII 69 and 74 (17) kh 98. (18) kh 35 (19) kh 19 (=38) (20) Dayan Sarasv 1776 (21) [illegible]

अस्यायमर्थः—इममेवाग्निं=पार्थिवं बह्न्याख्यं पदार्थं मेधाविनो विद्वांसो बहुधा बहुभिर्नामभिर्वदन्ति । इति निरुक्तगतं प्रथमं वाक्यं मन्त्रगतस्य तृतीयवाक्यस्य "अग्निं यमं मातरिश्वानमाहुः" इत्यस्य विवरणम् । अग्नेः पदार्थस्य बहूनि नामानि सन्तीत्यर्थः ।

महान्तं चात्मानं=परमात्मानं मेधाविनो बहुधा बहुभिर्नामभिर्वदन्तीति निरुक्तगतं द्वितीयं वाक्यं मन्त्रगतस्य द्वितीयवाक्यस्य "एकं सद्विप्रा बहुधा वदन्ति" इत्यस्य विवरणम् । परमात्मनो बहूनि नामानि सन्तीत्यर्थः ।

इन्द्रं मित्रं वरुणं दिव्यं गरुत्मन्तं च 'अग्निम्' आहुः । इन्द्रादीन् पदार्थान् अग्निनाम्ना कथयन्तीति निरुक्तगतं तृतीयं वाक्यं पूर्वार्द्धर्चस्य "इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्" इत्यस्य विवरणम् । अग्निशब्दस्य बहवो ऽर्था भवन्तीत्यर्थः

(दुर्गव्याख्या)

इन्द्रं मित्रमृत्यृचम् इमं निरुक्तसन्दर्भं च दुर्गाचार्यो ऽप्यव्याख्यातवान् तथाहि—

"इन्द्रं मित्रमिति अस्यवामीय एषा । इन्द्रं मित्रं वरुणम् इत्येतैरभिधानैः अग्निमाहुः सतत्त्वविदः । अथो अपि च यो ऽयमादित्यो दिवि जायते सुपर्णः सुपतनः गरुत्मान् गरणवान् स्तुतिभिस्तद्वान् रसानां वा गरिता आदित्यः । अयमपि स एवाग्निरित्याहुः । किं बहुना । इममेवाग्निम् एकं महान्तमात्मानम् अनन्यत्वेन पश्यन्तो विप्रा मेधाविन आत्मविदो बहुधा वदन्ति अग्निं यमं मातरिश्वानमित्येवम् । अन्यैश्चाभिधानैः ।"

(दुर्ग० निरु० भा० ७ । १ ॥)

दुर्गस्यायमभिप्रायः—

१—अग्नेः इन्द्रमित्रवरुणनामानि सन्ति

२—यो ऽयं सूर्यः सोग्निरेवास्ति

३—अयमग्निर्महानात्मा तम् अग्निमयममातरिश्वादिनामभिः कथयन्ति।

आख्यातत्रयस्य तथा ऽग्निशब्दस्य द्विरुच्चारणस्य कारणमजानन्, किमत्र प्रस्तुतमित्यप्यपश्यन्, उद्देश्यमनुक्त्वैव न विधेयमुदीरयेदिति न्यायं चोल्लङ्घयन्, दुर्गो महान्तमात्मानं परब्रह्म विस्मृत्य अग्निमेव महान्तमात्मानं मन्यमान ऋचमप-व्याख्याति। अग्निशब्दस्य विद्युदर्थः, अग्निशब्दस्य सूर्यो ऽर्थः, अग्निशब्दस्य सर्वा देवता अर्थः=अग्निशब्दः सर्वदेवतावाचक इति प्रस्तुतं तु दुर्गभाष्ये ऽदृष्टमेव। अग्नेर्बहूनि नामानि, अयं च सूर्यो ऽग्निरेवेत्युभयमप्रस्तुतमेव। वाक्ये चोद्देश्यस्य प्रथमोपादानं भवति तत उत्तरं विधेय उपादीयते। इन्द्रं मित्रं वरुणम् इत्युद्देश्य-कोटिगतस्य मन्त्रे प्रथमोपादानम् तत उत्तरम् 'अग्निमाहु इति विधेयोपादानम्'।

दुर्गवृत्तौ तु 'इन्द्रं मित्रं वरुणम्' इति विधेयकोटौ प्रक्षिप्तम् अग्निमित्युद्देश्य-कक्षायां निवेशितम्। अतएवाह दुर्गः अग्निम् इन्द्रमित्रवरुणाभिधानैः कथयन्ति। तदसत्। इन्द्रं मित्रं वरुणम् अग्निनाम्ना कथयन्ति न तु अग्निम् इन्द्रमित्रवरुण-नाम्ना ऽऽहुरिति। पुनश्च दुर्गः अग्निशब्दं विधेयं मत्वा सूर्यं चोद्देश्यं कृत्वा व्या-ख्याति सूर्यम् अग्निनाम्नाऽऽहुरिति। इममेवाग्निम् अग्निनाम्ना कथयन्ति इति दुर्गवचो-ऽपि विचित्रमेव। अग्निम् 'अग्निः' इति कथयन्ति किमत्र वैशिष्ट्यम्। दुर्गाश्रयेण व्याख्यातॄणां मुकुन्द झा सीतारामशास्त्र्यादीनां तु का कथा।

(स्कन्दव्याख्या)

इन्द्रं मित्रमित्यृचम् इमं निरुक्तसन्दर्भं च स्कन्दः सविस्तरं प्रशस्तकल्पं व्याख्यातवान् तत्रापि विचार्यते—

"दीर्घतमसः। इन्द्रं मित्रं वरुणं चाग्निमाहुः। अग्निशब्देन ब्रुव-न्तीत्यर्थः। परस्तात् तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। अथ शब्दश्चार्थे। यश्चायं दिव्यो दिवि भवः सुपर्णः रश्मिनामैतत्। अन्तर्णीतमत्वर्थः

सुपर्णवानित्यर्थः । शोभनं वा पतनं गमनं यस्य स सुपतनः सुपर्णः आदित्यः । गरुत्मान् गरुत् गरणं भौमानां रसानां रश्मिभिर्गरणेन तद्वान् छान्दसत्वात् त भावः गरितेत्यर्थः । अथवा गुर्वात्मा सन् गरुत्मान् । सः द्वितीयार्थे प्रथमा तं चाग्निमाहुरिति सम्बन्धः ।”

(स्कन्द निरु० भा० ७ । १८ ॥)

स्कन्दस्यायमभिप्रायः—इन्द्रं मित्रं वरुणं सूर्यं च अग्निशब्देन ब्रुवन्ति । अग्निशब्दस्य इन्द्रमित्रवरुणसूर्या अर्थाः । अग्निशब्दस्येत्येतानर्थान् पूर्वार्द्धर्चं आह । अत आह यास्कः तस्योत्तरा भूयसे निर्वचनायेति । इति पूर्वार्द्धर्चं सम्यग् व्याख्यातवान् स्कन्दः ।

अथ प्रकरणप्राप्तमुत्तरार्द्धर्चं यास्कव्याख्यातं स्कन्दो विवरीतुं प्रयतते ।

परे ऽर्धर्चे भिन्नं वाक्यम् । किं च एकं सत् कारणमात्माख्यं वस्तु विप्राः मेधाविनः बहुधा बहुभिः प्रकारैर्वदन्ति अग्निं यमं मातरिश्वानं चाहुरिति प्रदर्शनमात्रं चेदम् । सर्वैर्हि शब्दैस्तेन तेन विकारात्मनावास्थितः कारणात्मैवोच्यते । एवमस्या ऋचः पूर्वार्द्धर्चे इन्द्रादयो ऽग्निशब्देनोच्यन्ते इत्येतदाह । परः सर्वशब्दकारणात्मेति ।

(स्कन्द निरु० ७ । १८ ॥)

स्कन्दस्यायमभिप्रायः—संपूर्णे उत्तरार्द्धर्चे “एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः” इत्येतस्मिन् एकं महावाक्यम् तद् यथा—विप्रा एकं सत् बहुधा वदन्ति किं तदिति प्रश्न आह अग्निं यम मातरिश्वानमाहुरिति संपूर्ण उत्तरार्द्धर्चः सर्वशब्दकारणात्मानमाहेति । एषा स्कन्दस्यापव्याख्या वस्तुतस्तु उत्तरार्द्धर्चे वाक्यद्वयं वर्तते—

१—विप्रा एकं सत् बहुधा वदन्ति ।

२—अग्निं यमं मातरिश्वानमाहुः ।

इति पूर्वं व्याख्यातम् । अथ स्कन्दो दुर्गव्याख्यामाक्षिपति—

कस्मात् पुनः पूर्वार्द्धर्चं एवं न व्याख्यायते—इन्द्रं मित्रं वरुण-

मग्निमेवाहुरिति । उच्यते । एवं व्याख्यायमाने इन्द्रादिशब्दानामग्नौ प्रवृत्तिः प्रदर्शिता स्यात् नाग्निशब्दस्येन्द्रादिषु । अग्निशब्दस्य देवतान्तरेष्वपि प्रवृत्तिप्रदर्शनार्थमस्या ऋच इहोपादानम् ।

(स्कन्द निरु० ७ । १८ ॥)

स्कन्दस्यायमभिप्रायः—इन्द्रमित्रवरुणनामानि अग्नेरेव इति व्याख्या पूर्वार्द्धर्चस्य कथं न क्रियते[1] । तत्रोत्तरमाह स्कन्दः । यद्येवं व्याख्या पूर्वार्द्धर्चस्य क्रियेत तदा तु इन्द्रमित्रवरुणशब्दा अभिधानानि स्युः अग्निश्चार्थः स्यात् । अग्नेरभिधानस्य नाना ह्यर्था भवन्त्येतद् द्रढयितुम् इन्द्रंमित्रमित्यृक् उदाह्रियते । न तु इन्द्रादिशब्दानामग्निरर्थो भवतीत्येतत् प्रतिपाद्यते । एषा स्कन्दकृता दुर्गस्य समीक्षा प्रशस्या ।

पुनश्च स्कन्दो दुर्गमाक्षिपति—

ततश्चेममेवाग्निमित्यादिना न समुदायनिर्वचनं । किं तर्हि ? परस्यैवार्धर्चस्य 'बहुधा वदन्ति' इत्येतस्य विवरणम् । कथं ? एवशब्दो ह्यावधारणार्थे । महान्तमित्येतस्माच्च परो द्रष्टव्यः । यो ऽप्यग्निशब्दात् । एकमात्मानमित्यात्मशब्दो वस्तुवचनः··············

एवं तु परार्धशेषतया सर्वस्मिन् भाष्ये योज्यमाने 'अग्निः सर्वा देवता' इति प्रकृतोदाहरणविषयत्वं भाष्ये न प्रदर्शितं स्यात् । तस्मादिदमेवाग्निमित्यादि वदन्त्यन्तं भाष्यं परार्धर्चस्योदाहरणप्रकारेण विवरणम् । अग्नि चेमं यमं च मातरिश्वानं चेत्येवमादिभिर्वदन्तीति । इन्द्रं मित्रमित्यादि तु पूर्वार्धर्चविवरणमेव द्रष्टव्यम् ।

(स्कन्द निरु० भा० ७ । १८ ॥)

स्कन्दस्यायमभिप्रायः—यः कश्चिद् व्याख्याता[2] 'इन्द्रं मित्रम्' इति समस्तामृचं तद्व्याख्यानभूतम् इममेवाग्निं महान्तमात्मानं बहुधा मेधाविनो वद-

१—एषा दुर्गव्याख्या सा च पूर्वं प्रदीपकारेण समालोचितैव ।

२—इयमपि दुर्गसमीक्षा । दुर्गो हि निरुक्तवृत्तौ समस्तामृचं सर्वं निरुक्तसन्दर्भंचैकवाक्यतामापादयति ।

न्तीन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मन्तम्” इत्येतं सर्वं निरुक्तसन्दर्भं चैकवाक्यतामापादयति तदसत् । निरुक्ते हि ‘इममेवाग्निम् महान्तमात्मानं बहुधा मेधाविनो वदन्ति’ इत्येष भागः उत्तरार्धर्चस्य ‘एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहु” इत्येतस्य विवरणम् । “इन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मन्तम्” इत्यन्तिमो निरुक्तभागः पूर्वार्धर्चस्य ‘इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्’ इत्येतस्य विवरणम् । सर्वस्मिन् निरुक्तभाष्य एकवाक्यतया योज्यमाने तु अस्यैवाग्नेर्महत आत्मन इन्द्रादीनि बहूनि नामानि सन्तीत्यर्थः स्यात् । तच्च प्रस्तुतोदाहरणं न स्यात् । अग्नेर्बहवोऽर्था इत्येव हि निरुक्ते प्रस्तुतम् । न त्वग्नेबहूनि नामानि प्रस्तूयन्ते । तस्मात् समुदायनिर्वचनव्याख्या ऽपव्याख्या । वस्तुतस्तु ‘इममेवाग्निम्’ इत्यादौ निरुक्ते योऽयमेवशब्दः सः निरुक्तवाक्ये ऽग्निशब्दात् परभूतात् ‘महान्तम्’ इत्येतस्मात् परो ऽन्वेतव्यः । आत्मशब्दश्च वस्तुवचनः । ततश्च ‘महान्तमेव इममग्निं बहुधा मेधाविनो वदन्ति अग्निं यमं मातरिश्वानमाहुरिति । इति स्कन्दमतम् ।

अत्र हि एकवाक्यताविषया दुर्गसम्बन्धिनी स्कन्दकृता समीक्षा तु प्रशस्या परं स्कन्दः उत्तरार्धर्चमेकं वाक्यं मन्यते । एव शब्दं च महान्तमित्येतस्मात् परमुपदिशति तदसत् । उत्तरार्धर्चे वाक्यद्वयमित्युक्तं प्राक् । एवशब्दश्च यथास्थितमेव ‘इममेवाग्निम्’ इत्यनेन भौतिकाग्निमाह । इममेवाग्निं भौतिकमित्यर्थः महान्तं चात्मानं परमात्मानम् उभयमपि मेधाविनो बहुभिर्नामभिर्वदन्ति । महर्षिसंमतैषा व्याख्यैव सत्यार्थप्रदर्शिनी । आख्यातत्रयम् अग्निशब्दस्य द्विरुच्चारणं च न जानाति न च समाधत्ते स्कन्दो ऽपि ।

ननु “अग्निं चेमं यमं च मातरिश्वानं चेत्येवमादिभिर्वदन्तीति” इत्येतत् स्कन्दभाष्ये तृतीयाख्यातपरमेव प्रतीयते । कथमिदमुच्यते भवता ‘आख्यातत्रयम् अग्निशब्दस्य द्विरुच्चारणं च न जानाति न च समाधत्ते स्कन्दो ऽपीति । उच्यते—स्कन्दः “एकं सद्विप्रा बहुधा वदन्ति” इत्यस्य पूरकम् “अग्निं यमं मातरिश्वानमाहुः” इति चतुर्थं पाद मन्यते । अतएव स आह—

१—परे ऽर्धर्चे भिन्नं वाक्यं किं च एकं सत् कारणमात्माख्यं वस्तु विप्रा मेधाविनो बहुधा वदन्ति अग्निं यमं मातरिश्वानं चाहुरिति प्रदर्शनमात्रं चेदम् ।

२—परः सर्वशब्दकारणात्मेति ।

३—एवं व्याख्यायमाने इन्द्रादिशब्दानामग्नौ प्रवृत्तिः प्रदर्शिता स्यात् ।

४—तस्मादिममेवाग्निमित्यादि वदन्त्यन्तं भाष्यं परार्धर्चस्य उदाहरणप्रकारेण विवरणम् अग्निं चेमं यमं च मातरिश्वानं चेत्येवमादिभिर्वदन्तीति ।

अयमाशयः—उत्तरार्धर्चः सम्पूर्णः सर्वशब्दकारणात्मानमाह। तस्योदाहरण-प्रदर्शनमिदम् अग्निं यमं मातरिश्वानमिति ।

अस्मिन् स्कन्दव्याख्याने नाख्यातत्रयस्य गतिः । 'अग्निं चेमं यमं च मातरिश्वानं च' इत्यस्यार्थस्तु—

इमं महान्तमात्मानम् अग्निं च यमं च मातरिश्वानं चाहुरिति । अन्यथा सन्द-र्भान्तराणां का व्याख्या स्यात् । अथ चाह स्कन्दः "इन्द्रादिशब्दानामग्नौ प्रवृत्तिः प्रदर्शिता स्यात्"। यदि तृतीयाख्यातरहस्यं स्कन्दो जानाति तदा का हानि-र्यदि इन्द्रादिशब्दानामग्नौ प्रवृत्तिः प्रदर्शिता स्यात् । तृतीयाख्यातस्यायमेवार्थो यथा भौतिकाग्निं यममातरिश्वादिनामभिः कथयन्तीति । यमादिशब्दानामग्नौ प्रवृत्तिरिति। तस्मात् सत्यमुक्तम् आख्यातत्रयम् अग्निशब्दस्य द्विरुच्चारणं न जानाति न च समा-धत्ते स्कन्द इति । उभयथा वा व्याख्यातं स्यात् ।

(निरुक्तपाठान्तराणि)

निरुक्तस्य सन्दिग्धपाठो ऽपि भ्रान्तिकारणम् । बहवो निरुक्तहस्तलेखाश्चकार-रहितमेव निरुक्तपाठं लिखन्ति । संपादयन्ति च संपादकास्तादृशमेव । "इममेवाग्निं महान्तमात्मानमेकमात्मानम्" इति । निरुक्तपाठान्तराणि त्वित्थम्—

क. "इममेवाग्निं महान्तं चात्मानम्"—अयं शुद्धः पाठः निरुक्तप्रधान-संपादकस्य डा० लक्ष्मणस्वरूपस्य । राजवाड़े महोदयस्य च पाठान्तरम् ।

ख. इममेवाग्निं महान्तमेवात्मान०"–महर्षिसंगृहीहस्तलेखपाठो यज्ञ-
ऽऽर्याभिविनयोपक्रमणिकायाम्।
अत्र द्वितीय एवशब्दश्चकारार्थः।

ग. "इममेवाग्निं महान्तमेकमात्मानम्"—स्कन्दपाठः, राजवाडे-
अनुमितदुर्गपाठश्च।

घ. "इममेवाग्निं महान्तमात्मानम्"—डा. लक्ष्मणस्वरूपपाठान्तरम्।

ङ. "इममेवाग्निं महान्तमात्मानमेकमात्मानम्" सायणपाठः राज-
वाडे पाठश्च।

तत्र "इममेवाग्निं महान्तं चात्मानम्" इत्येव साधीयान् पाठः।

"इममेवाग्निं महान्तमेवात्मानम्" इति वा प्रशस्यतरः पाठः। अत्र द्वितीय एवकारश्चकारार्थः। निरुक्तहस्तलेखाश्च प्रायः पञ्चशतवर्षाभ्यन्तर' लिखिता एवोपलभ्यन्ते। तत्र सांप्रदायिकैश्चकारपाठो लोपित इत्यनुमीयते। दृष्टिपथं नायाति तादृशानां सांप्रतमपि। दुर्गस्कन्दसायणादिपार्श्वे ऽपि चकाररहितपाठ एवासीदिति प्रतीयते। चकाररहितनिरुक्तपाठाङ्गीकारे तु 'इन्द्रं मित्रम्' ऋच आख्यातत्रयासंगतिर्दुर्निवारैव स्यात्।

(अथ निरुक्तपरिशिष्टम्)

"इममेवाग्निं महान्तं चात्मानम्" अयमेव निरुक्तस्य शुद्धः पाठ इत्यत्र निरुक्तपरिशिष्टमेव प्रमाणम्। तथाहि—

अथैतं महान्तमात्मानमेष ऋग्गणः प्रवदति—"इन्द्रं मित्रं वरुणमग्निमाहुः" इति। अथैष महानात्मा ऽऽत्मजिज्ञासया ऽऽत्मानं प्रोवाच

१—The manuscripts fall into two groups and for the sake of convenience and brevity, may be called A. and B.–A representing the longer and B the sh rter recension. None of the manuscripts grouped in these two families is earlier than A.D. 1479. —डा० लक्ष्मणस्वरूप

"अग्निरस्मि जन्मना जातवेदाः०" "अहमस्मि प्रथमजा०" इत्येताभ्याम् ।

(निरुक्त परिशिष्ट १४ । १ ॥)

अस्यायमर्थः—एतं महान्तमात्मानं परमात्मानमेष ऋक्समूहः प्रवदति । यथा—"इन्द्रं मित्रं वरुणमग्निमाहुः०" । अथैष महानात्मा ऽऽत्मजिज्ञासाहेतुं कृत्वा अहमिति उत्तमपुरुषयोगेन स्वात्मानं वर्णयति द्वाभ्याम् ।

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
अर्कस्त्रिधातू रजसो विमानो ऽजस्रो घर्मो हविरस्मि नाम ॥

आरण्यसंहितायामस्या ऋचो भाष्ये सायणाचार्यो ऽप्याह—
परब्रह्मत्वमुक्तं भवति ।

(आरण्यसंहिता ३।२८ सायणभाष्य)

अहमन्नमहमन्नमहमन्नम् । अहमन्नादो ३ऽहमन्नादो ३ऽहमन्नादः । अह ९ श्लोककृदह९श्लोककृदह९श्लोककृत्—

इत्युपक्रम्य—

अहमस्मि प्रथमजा ऋता३स्य । पूर्वं देवेभ्यो ऽमृतस्य ना३भायि ।
यो मा ददाति स इदेव मा ३ वाः । अहमन्नमहमन्नमदन्तमा३द्मि ॥

(तैत्ति० उप० भृगु० व० १०)

अस्य विवरणे—महर्षिः स्वयमाह—

इस से ईश्वर के अन्न अन्नाद और अत्ता नाम हैं ।

(सत्या० प्र० शता० भाग १ पृ० ८७)

महर्षेरनुयायिनो ऽपि वेदवेदाङ्गादिव्याख्याप्रसङ्गे महर्षिकृतं व्याख्यानमुपेक्ष्य स्वपाण्डित्यं प्रदर्शयन्ति । उपरितननिरुक्तपरिशिष्टवचसा इन्द्रं मित्रमित्यृग् अध्यात्मपरमप्यर्थमाहेति सुस्पष्टम् ।

(वेङ्कटमाधवव्याख्या)

वेङ्कटमाधवो ऽपि इन्द्रमित्रमित्यृचो भाष्ये आख्यातद्वयमेव व्याख्याति तथाहि—

इन्द्रं मित्रम्। अथापि ब्राह्मणं भवति 'अग्निः सर्वा देवताः'। इति तस्येयं भूयसे निर्वचनाय। इन्द्रादींश्च अग्निमाहुः। अथो दिव्यः स सुपतनः गरणवान् आदित्यश्च। एकमेव सन्तमग्निं बहुशरीरपरिग्रहाद् बहुधा वदन्ति। अग्निमेव यमं मातरिश्वानञ्चाहुः।

(वेङ्कटमाधव ऋ० भा० १। १६४। ४६॥)

वेङ्कटमाधवः "एकं सद् विप्रा बहुधा वदन्ति" इत्यस्य व्याख्यानम् एकं सन्तमग्निम् इत्येव व्याख्यातवान्। न जानाति स आख्यातत्रयकारणम् अग्निशब्दस्य द्विरुच्चारणहेतुं च।

(सायणव्याख्या)

सायणस्तु आदित्यपरामेव सर्वामृचमाह तथाहि--

"अमुमादित्यम् ऐश्वर्यविशिष्टं--इन्द्रमाहुः। तथा मित्रम्--प्रमीतेर्मरणात् त्रातारमहरभिमानिनमेतन्नामकं देवं तमाहुः। वरुणम्--पापस्य निवारकं रात्र्यभिमानिनं देवमाहुः। तथा अग्निम्--अङ्गनादिगुणविशिष्टमेतन्नामकमाहुः। अथो अपि च अयमेव दिव्यः--दिवि भवः सुपर्णः--सुपतनः गरुत्मान्--गरणवान् पक्षवान् वा एतन्नामको यः पक्ष्यस्ति सोऽप्ययमेव। कथमेकस्य नानात्वमिति। उच्यते--

अमुमेवादित्यम् एकम् एव वस्तुतः सन्तं विप्राः--मेधाविनो देवतातत्त्वविदो बहुधा वदन्ति--तत्तत्कारणेनेन्द्राद्यात्मानं वदन्ति। 'एकैव वा महानात्मा देवता स सूर्य' इत्याचक्षते" इत्युक्तत्वात्। किं च तमेव वृष्ट्यादिकारणं वैद्युतम् अग्निम्। यमम्--नियन्तारम् मातरिश्वनम्--अन्तरिक्षे श्वसन्तं वायुम् आहुः। सूर्यस्य ब्रह्मणोऽनन्यत्वेन सार्वात्म्यमुक्तं भवति।

अत्र ये केचिद् 'अग्निः सर्वा देवताः' इत्यादि श्रुतितोऽयमेवाग्निरुत्तरे अपि ज्योतिषी इति मत्वा ऽग्नेरेव सार्वात्म्यप्रतिपादको अयं मन्त्र इति वदन्ति तत्पक्षे प्रथमो ऽग्निशब्द उद्देश्यः तमग्निमुद्दिश्य इन्द्राद्यात्मकत्वकथनम्। अयं मन्त्रो निरुक्त एवं व्याख्यातः--

'इममेवाग्निं महान्तमात्मानमेकमात्मानं बहुधा मेधाविनो वदन्ति इन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मन्तम् । दिव्यो दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति वा' ।"

(सायण ऋ० भा० १ । १६४ । ४६ ॥)

एतत् पाण्डित्यं सायणाचार्यस्य यन्मन्त्रगताख्यातत्रयकारणमजानन् सर्वामृचमेकवाक्यतामापादयत् । एकमग्निशब्दम् अङ्गनादिगुणविशिष्टम् अपरमग्निशब्दं वैद्युताग्निपरमाह । विचित्रा संगतिः । पक्षान्तरं च व्याचक्षाण आह—प्रथमोऽग्निशब्द उद्देश्यः । अग्निम् अग्निमाहुरिति तस्याकूतम् । अग्निः अग्निः कथ्यते किमत्रापि सन्देहः । निरुक्तसन्दर्भं च न स्वपक्षपरं मेने सायणः ।

(आत्मानन्दव्याख्या)

अस्यवामीयसूक्ते आत्मानन्दस्य भाष्यं वर्तते । तत्र 'इन्द्रं मित्रम्' ऋचो भाष्यं प्रशस्यनिर्वचनमपि आख्यातत्रयविवेकशून्यमेव । तथाहि—

ननु "चत्वारि[1] वाक्०" इति पदार्थानां नानात्वमुक्तम् । तर्हि द्वैतापत्तिरित्याशङ्क्याह—एकैव देवता परमात्मा सर्वदेवता । एकस्यैव नानानामग्रहणमित्युच्यते । यद्वा "त्रयः[2] केशिनः०" इत्यत्र देवतात्रित्वमुक्तम् । तर्हीन्द्रादयो न काश्चिद् देवता इत्याशङ्क्याह । एकैव देवता परमात्मा सर्वदेवता । एकस्यैव नानानामग्रहणम् । त्रित्वोक्तिस्तु नानादेवतानां त्रित्वसंख्यावरोधार्थं यज्ञादिप्रवृत्त्यर्थं तदुच्यते ।

इन्द्रं परेशमाहुः "[3]अहन्नहिं पर्वते शिश्रियाणम्०" इत्यादौ ।
मित्रं परेशमाहुः "[4]मित्रो जनान् यातयति ब्रुवाण०" इत्यादौ ।
वरुणं परेशमाहुः "[5]शतं ते राजन् भिषजः०" इत्यादौ ।
अग्निं परेशमाहुः "[6]त्वमग्ने रुद्रो०" इत्यादौ ।

अथो तथा दिव्यः सूर्यस्तं परेशमाहुः "[7]चित्रं देवानाम्०" इत्यादौ स परेशो गरुत्मान् सुपर्ण इत्याहुः ।

१—ऋ० १।१६४।४५।। २—ऋ० १।१६४।४४।। ३—ऋ० १।३२।२।।
४—ऋ० ३।५९।१।। ५—ऋ० १।२४।९।। ६—ऋ० २।१।६।। ७—ऋ० १।११५।१।।

सौवर्णपक्षममितद्युतिमप्रमेयं छन्दोमयं विविधयज्ञतनुं वरेण्यम् ।
पक्षौ बृहच्च भवतो रथवच्च यस्य तं वैनतेयमजरं प्रणमामि नित्यम् ॥

इदानीम् अग्निं परेशमाहुः । अग्निशब्दो ऽत्र नेत्राग्निमतो रुद्रस्य वाचकः "[1]स्थिरेभिरङ्गैः०" "[2]अर्हन् बिभर्षि०" इत्यादौ । यमं परेशमाहुः "[3]त्रिकद्रुकेभिः पतति०" इत्यादौ । मातरिश्वानं परेशमाहुः "[4]आत्मा देवानां भुवनस्य गर्भोः"। इत्यादौ ।

इन्दतीति इन्द्रः "इदि परमैश्वर्ये" । मितो हिंसायास्त्रायत इति मित्रः । एवं वृणुत इति वरुणः । अङ्गं नयतीति अग्निः "अगि गतौ" णीञ् प्रापणे" गत्यर्था ज्ञानार्थाः । दिवि महापुरुषबुद्धौ द्योतनवत्यां भवो दिव्यः । शोभनो मोक्षपक्षः सुपर्णः । संसारमोक्षाभ्यां गरुद्भ्यां गरुत्मान् । रोदयतीति रुद्रः । स एवाग्रणीत्वाद् अग्निः । यमयतीति यमः । येन रुष्टेन मातरि मायायां क्षिप्तो जीवः श्वेव भवति स मातरिश्वा ।

एकं सद् ब्रह्म विप्रा ब्राह्मणत्वाभिमानिनो यज्ञसिद्धये बहुधाऽभिधानेनेन्द्रादिरूपेणाहुः। योजनान्तरे तु विप्रा मेधाविनस्तत्त्वविदस्तु इन्द्रादिरूपे बहुधा सद् ब्रह्म एकमाहुः । कल्पस्तु--

इन्द्रादिशब्दा गुणयोगतो वा व्युत्पत्तितो वापि परेशमाहुः ।
विप्रास्तदेकं बहुधा वदन्ति प्राज्ञास्तु नानापि सदेकमाहुः ॥
(आत्मानन्द ऋ० भा० १ । १६४ । ४६ ॥)

अस्यवामीयसूक्तभाष्यकारो ऽयमात्मानन्द आख्यातत्रयस्य अग्निशब्दस्य द्विरुच्चारणस्य च कारणमजानन् द्वितीयमग्निशब्दं नेत्राग्निमतो रुद्रस्य वाचकं व्याचष्टे । द्वयोरग्निशब्दयोर्निर्वचनद्वयं कृत्वा तुतोष च वराकः । १--अङ्गं नयतीति अग्निः 'अगि गतौ' 'णीञ् प्रापणे' २—स एवाग्रणीत्वादग्निः । इति ।

(अरविन्दव्याख्या)

अरविन्दमहोदयेन On the Veda नाम्नि ग्रन्थे इन्द्रं मित्रमित्यृग् व्याख्याता । तथाहि--

१—ऋ० २।३३।१०॥ २—ऋ० २।३३।१०॥ ३—ऋ० १०।१४।१६ ४—ऋ० १०।११६।८॥

"The existent is one" Says the Rishi Dirghatamas, but the sages express it variously; they say Indra, Varuna Mitra, Agni; they call it Agni, Yama Matriswan."

(On the Veda Page 66)

न जानात्यरविन्दमहाभागोऽपि आख्यातत्रयस्य अग्निशब्दस्य द्विरुच्चारणस्य च हेतुम् । They say Agni, They call it Agni ते ऋषयस्तत् सद् 'अग्निम्' कथयन्ति, ते ऋषयस्तत् सद् अग्निनाम्नोच्चारयन्ति कोऽत्र भेदः ।

अपरं च गण्डस्योपरि स्फोटः संवृत्तः—उपरितनेन सन्दर्भेण ज्ञायते यदरविन्दो मन्त्रान् ऋषिनिर्मितान् मन्यते । अनार्ष एष विचारः । अरविन्दस्तु महर्षिभाष्यं प्रशस्य वैदिकविद्वत्समालोचनया स्वात्मानं ररक्ष । वैदिकविद्वांसश्च अयमरविन्दो महर्षिभाष्यप्रशंसक इत्यालोच्य प्रमुग्धाः सन्तोऽनार्षसिद्धान्तप्रलापिनमरविन्दमुपेक्षाञ्चक्रुः । अनेनारविन्देन स्वामीदयानन्दसरस्वती न कुत्रापि 'ऋषिः' 'महर्षि' इत्यादिविशेषणैर्व्यशेषि । स्वात्मानं च ऋषिमुद्घोषयाञ्चकार । अयमरविन्दसंप्रदायो न केवलं मन्त्रान् ऋषिकृतानाह परं ब्राह्मणादिपरम्परागतनिर्वचनान्यपि विलसनादिवत् काल्पनिकानि मन्यते । अन्तर्यागवहिर्यागमिषेण च यज्ञादिशब्दानां निर्वचनान्तराणि लुलोप ।

(ग्रिफिथ व्याख्या)

They call him इन्द्र, मित्र, वरुण, अग्नि and he is heavenly nobly winged गरुत्मत् . To what is one, sages give many a title they call it अग्नि,यम, मातरिश्वन् ।

Garutman : the celestial bird, the sun. All these names, say the poet, are names of one and the same divine being, the one supreme sprit under various manifestation.

(R. T. H. Griffith)

(विल्सनव्याख्या)

They have styled (him, the sun) Indra, Mitra, Varuna Agni, and he is the celestial, well-winged Garutmat, for learned priests

call one by many names as they speak of Agni, Yama, Matrishwan.

... ...

the sun is Sayana's interpretation : Yask say Agni, : but they are the same and are the same as all other forms, according to the texts, "Ekaiva va mahan atmā devatā Súryah" the divine sun is the one great sprit; and Agni sarva devtah, Agni is all the divinities.

(H. H. WILSON.)

(जर्मन[1] भाषायां गेल्डनरकृता व्याख्या)

Sie nennen (es) Indra, Mitra, Varuna, Agni, and es ist himmlische Vogel Gurutmat. Was nur das Eine ist benennen die Redekundigen vielfach. Sie nennen es Agni Yama, Matrisvan.

Die vielheit der worte und die Einheit der welt (R. V. 10. 114. 5)

(Karl Friedrich Geldner)

सर्वे एते पाश्चात्या वेदानुसन्धानकर्तारः प्रायः सायणानुकरास्तेषां पृथक् समालोचना पिष्टपेषणमात्रमेव । अत्रेदं वक्तुं युक्तं प्रतिभाति ।

इन्द्रं मित्रमृचो ह्यर्थं सम्यग् वेत्ति कविः[2] स्वयम् ।
यास्कोऽथवा दयानन्दो नेमं[3] स्कन्दो न चेतरे ॥

अथ च—इयमृक् निचृत् त्रिष्टुप् । त्रिष्टुभश्चतुर्ष्वपि पादेषु एकादशाक्षराणि

१—(जर्मनभाषाव्याख्याया आङ्गलभाषायामनुवादः)

They call (it) Indra, Mitra, Varuna, Agni, and it is heavenly bird Garutmat, what only the one is call the wise in many ways They call it Agni, Yama, Matarisvan.

The variety of words and the unity of world.

२—'कविर्मनीषी परिभूः स्वयंभूः०' इत्यत्र प्रतिपादितः परेश्वरः।

३—नेमम्=मर्द्धम् ।

भवन्ति। चतुश्चत्वारिंशदक्षरा त्रिष्टुप्। इन्द्रंमित्रमृचि तु त्रयश्चत्वारिंशदक्षराणि तस्मादियं त्रिष्टुप् निचृदुच्यते। एकाक्षरोनं छन्दो निचृद् भवति। तथा च छन्दःशास्त्रम्।

"ऊनाधिकेनैकेन निचृद्भुरिजौ"

(पिङ्गल ३। ५९॥)

अस्यायमर्थः—एकेनाक्षरेण न्यूनेन निचृद् भवति। एकेनाक्षरेणाधिकेन भुरिग् भवति। अस्यामृचि तृतीये पादे एकाक्षरन्यूनता तस्मादियं निचृत् त्रिष्टुप्। सा च न्यूनता "एकं सद् विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः"। इत्यसन्धिना विश्रम्य पाठेन व्यपेति। "एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः" इति नित्ये संहितापाठे तु निचृत्त्वैव। किमियं निचृत्ता ऽपि विश्रम्य पाठस्य पृथग् वाक्यस्य द्योतिका विचार्यमेतच् छन्दोरहस्यज्ञैः। अतः परमात्मनो ऽग्न्यादीनि बहूनि नामधेयानि सन्तीत्यस्यापि प्रतिपादिकेयमृक् तस्मादग्निशब्दस्येश्वरार्थत्वे मन्त्रवर्ण एव प्रमाणमिति सम्यगुक्तम्। इन्द्रंमित्रमिति। बृहदुपाख्यातम्। तस्योत्तरा भूयसे निर्वचनाय।

तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः॥

(यजु० ३२। १॥)

तत्। एव। अग्निः। तत्। आदित्यः। तत्। वायुः।। तत्। ऊँ इत्यूँ। चन्द्रमाः। तत्। एव। शुक्रम्। तत्। ब्रह्म। ताः। आपः। सः। प्रजापतिरिति प्रजाऽपतिः।

भाष्यम्— (तत्) प्रसिद्धं[1] सच्चिदानन्दादिस्वरूपं सत् (एव) निश्चयेन (अग्निः) ज्ञानस्वरूपत्वात् प्रकाशकत्वाच्च अग्निपदवाच्यमस्ति। यथा चोक्तं मन्त्रान्तरे "एकं सद् विप्रा बहुधा वदन्ति०" (तत्) (आदित्यः) प्रलये सर्वस्यादातृत्वाद् आदित्यनामास्ति। (तत्) (वायुः) अनन्तबलत्वसर्वधातृत्वाभ्यां वायुनाम्ना कथ्यते। (तत्) (चन्द्रमाः) आनन्दस्वरूपत्वाद् आह्लादकत्वाच्च चन्द्रमा इति

१—प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते।

नाम्ना प्रसिद्धम् । (तत्) (एव) (शुक्रम्) आशुकारित्वाद् शुद्धभावाच्च शुक्र-पदव्यवहार्यं यथा चोक्तम्—

"तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते"
तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥

(कठोपनिषत् २ । २ । ८ ॥)

अस्यायमर्थः—तदेव शुक्रब्रह्मामृतनामभिः कथ्यते तस्मिन् सर्वे लोका आश्रिताः तत् कश्चन कश्चिदपि न अत्येति अतिक्रमितुं न शक्नोति ।

अथ च शुक्रशब्दस्य पुंल्लिङ्गे ऽपि प्रयोगो दृश्यते । यथा—

शुक्रो ऽसि भ्राजो ऽसि । स यथा त्वं भ्राजता
भ्राजो ऽस्येवाहं भ्राजता भ्राज्यासम् ॥

(अथर्वे० १७ । १ । २० ॥)

अस्यायमर्थः—हे परमात्मन् त्वं शुद्धभावत्वात् (शुक्रः असि) शुक्र-नामासि । प्रकाशस्वरूपत्वात् (भ्राजः असि) भ्राजनामासि । (स यथा त्वं) (भ्राजता) प्रकाशमानेन स्वरूपेण (भ्राजः असि) (एव) एवम् (भ्राजता) प्रकाशमानेन स्वरूपेण (भ्राज्यासम्) प्रकाशमानो भूयासम् । अतः शुक्रशब्दो ऽपि ब्रह्मवाचक इति ध्येयम् । तथा चोक्तं महर्षिणा—

"यः शुच्यति शोचयति वा स शुक्रः"

(सत्यार्थप्रकाश श० सं० भा० १ पृष्ठ ६८)

अस्यायमर्थः—यः शुच्यति स्वयं पवित्रो ऽस्ति शोचयति वा स्वसंसर्गेण जीवान् पवित्रयति स शुक्रः ।

(तत्) (ब्रह्म) सर्वेभ्यो बृहत्त्वाद् ब्रह्मेति व्याह्रियते । (ताः आपः) तत् प्रसिद्धं सच्चिदानन्दादिस्वरूपं सत् सर्वत्र व्यापकत्वात् आप इति प्रोच्यते । (सः उ प्रजापतिः) तदेव च सर्वस्याः प्रजायाः स्वामित्वात् प्रजापतिनामधेय-मस्ति । 'ताः आपः' 'सः प्रजापतिः' इत्युभयत्र तच्छब्दे विधेयप्राधान्यात् स्त्रीलिङ्ग-पुंल्लिङ्गता । तदादिप्रयोगे उद्देश्यप्रतिनिर्देश्ययोः पर्यायलिङ्गता प्रसिद्धा ।

उवटमहीधरौ मन्त्रमिममपभाषेते तथाहि—

"अग्निः तदेव कारणं ब्रह्म, आदित्यस्तदेव, वायुस्तदेव, चन्द्रमास्तत् (उ) तदेव, उ एवार्थे। शुक्रं शुक्लं तत् प्रसिद्धं ब्रह्म त्रयीलक्षणं तत् ब्रह्मैव। ताः प्रसिद्धाः आपः जलानि सः प्रसिद्धः प्रजापतिरपि तदेव ब्रह्म।"

(यजु० महीधर भाष्य ३२।१॥)

अस्यायमर्थः—ब्रह्मविकारभूता एवाग्न्यादयः। अग्निरपि ब्रह्म, सूर्यो ऽपि ब्रह्म, वायुरपि ब्रह्म, चन्द्रमा अपि ब्रह्म, वेदा अपि ब्रह्म, जलमपि ब्रह्म, प्रजापतिनामा यः कश्चिदपि तन्मतेनास्ति सो ऽपि ब्रह्म। अद्वैतप्रतिपादको ऽयं मन्त्र इति तयोराशयः। तत्र विचार्यते—

क. अस्मिन् व्याख्याने विधेयाविमर्शदोषः। मन्त्रे तच्छब्दा उद्देश्यकोटिगता अग्न्यादयश्च विधेयप्रविष्टाः। तत् सत् अग्निनामधेयमस्तीत्यादि हि तत्र विवक्षितम्। अग्निः तदेव आदित्यस्तदेव इत्थं व्यत्यासेनान्वये तु मन्त्रे विधेयस्य तच्छब्दस्य प्रथमं निर्देशः स्यात् उद्देश्यस्याग्न्यादेश्च पश्चादुक्तिः। अयमेव विधेयाविमर्शदोषः। "अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्" इति हि सिद्धान्तः। उवटमहीधरव्याख्याने अनुवाद्यमुद्देश्यमग्न्यादिकमनुक्त्वैव तच्छब्दस्य विधेयस्य प्रथमं मन्त्रे उच्चारणं 'तदेवाग्निः' इत्यादि।

ख. अथ चास्मिन् मन्त्रे ऽष्टौ तच्छब्दा अष्टौ च नामधेयानि। उवटमहीधरव्याख्याने सप्तैव ब्रह्मविकारभूता अभिप्रेताः शुक्रशब्दस्तु वेदार्थस्य ब्रह्मशब्दस्य विशेषणमात्रमेव। अतएव किंकर्तव्यतामूढाभ्यामुवटमहीधराभ्यां द्वौ तच्छब्दौ ब्रह्मवाक्ये निवेशितौ। एकस्तच्छब्दः प्रसिद्धार्थको व्याख्यातो द्वितीयस्तावत् कारणवाचकः। तथैव तयोर्व्याख्यानम्—शुक्रं=शुक्लं तत्=प्रसिद्धं ब्रह्म=त्रयीलक्षणं तत्=ब्रह्मैव" अत्रैकस्मिन् वाक्ये द्वौ तच्छब्दौ निवेशितौ। इमं दोषं मनसि ध्यायन् सायणाचार्यः तैत्तिरीयारण्यकव्याख्याने शुक्रशब्दं नक्षत्रवाचकं मन्यते। तथाहि—

"शुक्रं दीप्यमाननक्षत्रादिकं······तदेवाधिष्ठानरूपमेव"

(तै० आ० सायणभाष्य १०।१।१॥)

ग. तथाचास्मिन् व्याख्याने द्वौ तच्छब्दावध्याह्रियेते——ताः प्रसिद्धा आपः जलानि तदेव कारणम् । सः प्रसिद्धः प्रजापतिः तदेव कारणम् । इति हि तयोरन्वयः।

घ. नचास्मिन् मन्त्रे कारणशब्दस्य प्रयोगो येनार्थः स्यात् अग्निस्तदेव कारणमित्यादि । न च 'जज्ञे' इत्यादिक्रियापदस्योक्तिः यतो हि अग्निस्तस्मात् कारणात् जातः इति व्याख्यानं भवेत् । अस्तिभवती तु सर्वत्रानुक्ते अपि गम्येते । तत्=सत् अग्निः=अग्निनामास्ति इति हि सुव्याख्यानम् ।

ङ. अन्यत्र 'आहुः' 'उच्यते' 'वदन्ति' इत्यादिपदानां प्रयोगस्तु दृश्यते तथाहि—

"तदे॒वर्तं तदु॑ स॒त्यमा॑हु॒स्तदे॒व ब्रह्म॑ प॒र॒मं क॑वी॒नाम् ।"

(तै० आ० १० । १ । १॥)

"तदेव शुक्रं तद् ब्रह्म तदे॒वामृ॒तमु॒च्यते"

(कठोप० २ । ८ ॥)

"एकं॒ सद् विप्रा॑ बहु॒धा व॑दन्ति"

(ऋ० १ । १६४ । ४६ ॥)

इत्यादि।

ननु "तदे॒वाग्निस्तदा॑दि॒त्यस्तद्वा॒युः" इति वत् "तदाप॒स्तत्प्र॒जाप॑तिः" इति पाठे तु महर्षिकृतं व्याख्यानं सुसंगतं स्यात् ।' 'ता आप॒ः स प्र॒जाप॑तिः" इति पाठस्तु ता आपः स प्रजापतिः तदेव कारणमित्यर्थमेव प्रत्याययति । अत्रोच्यते—

तस्मिन् व्याख्याने पञ्च दोषा असमाधेया प्रदर्शिताः । अथ च शृणु। मन्त्राणां पाठान्तराणि व्याख्यानानि भवन्ति । यथा—

यस्ति॒त्याज॑ सचि॒विदं॒ सखा॑यं॒ न तस्य॑ वा॒च्यपि॑ भा॒गो अ॑स्ति

(ऋ० १० । ७१ । ६॥)

यस्ति॒त्याज॑ सखि॒विदं॒ सखा॑यं। न तस्य॑ वा॒च्यपि॑ भा॒गो अ॑स्ति।

(तै० आ० १ । ३ । १॥)

इत्यत्र 'सचिविदम्' इति ऋग्गतस्य पदस्य तैत्तिरीयारण्यके 'सखिविदम्' इति व्याख्यानम् । तथैव——

ता आप॒ः स प्र॒जाप॑तिः (यजु० ३२ । १ ॥)

तदा॒प॒स्तत्प्र॒जाप॑तिः (काण्व० ३५।३।१॥)

तदा॒प॒स्तत् प्र॒जाप॑तिः (तै० आ० १०।१॥)

इत्यत्र 'ताः' 'सः' पदयोर्व्याख्यानं 'तत्' इति स्पष्टम्। तत् सत् 'आप' इति नामधेयमस्ति, तत् सत् प्रजापतिनामकमस्ति। इति हि तैत्तिरीयारण्यककाण्वसंमतं महर्षेर्व्याख्यानम्। ताः=प्रसिद्धाः, सः=प्रसिद्धः इति कुव्याख्यानमेव।

ननु भवताऽपि तत् सत् नामधेयम् इति कृत्वा सत् नामधेयपदावाक्षिप्तौ। सत्यम्। मन्त्रेषु 'आहुः' 'उच्यते' 'वदन्ति' 'एकं सद् विप्रा बहुधा' इत्येतेतेषां विवरणमात्रमेव सत्नामधेयपदौ न त्वाक्षिप्येते।

तथा च—

तदे॒वर्तं तदु॑ स॒त्यमा॑हु॒स्तदे॒व ब्रह्म॑ पर॒मं क॑वी॒नाम्।

इ॒ष्टा॒पू॒र्तं ब॑हु॒धा जा॒तं जाय॑मानं वि॒श्वं बि॑भर्ति॒ भुव॑नस्य॒ नाभिः॥

तदे॒वाग्नि॒स्तद् वा॒युस्तत्सूर्य॒स्तदु॒ च॒न्द्रमाः।

तदे॒व शु॒क्रम॒मृतं॒ तद् ब्र॒ह्म तदा॒प॒स्तत्प्र॒जाप॑तिः॥ (तै० आ० १०।१॥)

अस्यायमर्थः—कवीनां परमं सर्वोत्तमं कविरूपं यत् ब्रह्मास्ति यच्च इष्टं, पूर्तं बहुधा जातं पूर्वकल्पोत्पन्नं जायमानं वर्तमानं च विश्वं विभर्त्ति, यच्च भुवनस्य नाभिभूतमस्ति तत् ऋत–सत्य–अग्नि–वायु–सूर्य–चन्द्रमस्–शुक्र–अमृत–ब्रह्म–अप्–प्रजापतिनामधेयमस्ति[1]। इत्यत्र ऋत सत्य शुक्र अमृतादिशब्दा नामधेयपरा एव सुसंगताः।

अथ च 'तदेवाग्नि०' मन्त्रेण ज्ञाप्यते यथा—

तदादिशब्दप्रयोगे उद्देश्यप्रतिनिर्देश्ययोः पर्यायलिङ्गता[2] भवति। ब्रह्मणश्च

१— तैत्तिरीयारण्यके 'स प्रजापति' 'तत्प्रजापतिः' इत्युभयमपि पाठभूतं हस्तलेखेषूपलभ्यते। वैदिककंकाडँससंमतः पाठस्तु 'तत्प्रजापतिः' इत्येव। स हि काण्वसंमतः पाठः।

२— क्वचिदुद्देश्यप्राधान्याल् लिङ्गम् क्वचिच्च विधेयप्राधान्यात् लिङ्गं भवति यथा— छन्दःसंख्या नाम्नी संक्षिप्ता सूची छन्दोऽनुक्रमण्याः परिशिष्टं ज्ञेयम्। छन्दःसंख्या नाम्नी संक्षिप्ता सूची छन्दोऽनुक्रमण्याः परिशिष्टं ज्ञेया। इत्युभयमपि साधु। अत्र सूची उद्देश्यं परिशिष्टं च विधेयं वर्तते। उद्देश्यसूचीप्राधान्यमाश्रित्य स्त्रीलिङ्गता, विधेयपरिशिष्ट-प्राधान्यमाश्रित्य नपुंसकलिङ्गता।

लिङ्गत्रये ऽपि नामानि भवन्तीति च । तथा चोक्तं महर्षिणा—

"ब्रह्म चितिरीश्वरश्चेति"

(सत्यार्थ० प्र० श० सं० भा० १ पृ० १०२)

अस्यायमर्थः—परमात्मनो त्रिषु लिङ्गेषु नामानि भवन्ति ब्रह्मेत्यादि नपुंसकलिङ्गे चितिरित्यादिकं स्त्रीलिङ्गे ईश्वर इत्यादिनामानि पुंलिङ्गे ।

यजुः सर्वानुक्रमणी च भवति —

"आत्मदैवतः । ब्रह्म स्वयंभ्वैत्तत्"

अस्यायमर्थः—'तदेवाग्नि०' मन्त्रस्य स्वयम्भु ब्रह्म ऋषिः । आत्मा देवता । तदेवाग्नि० मन्त्रो व्याख्यातः ।

महर्षेरुभयोर्भाष्ययोर्निर्दिष्टानि प्रमाणान्तराणि पदार्थप्रदीपे व्याख्यास्यन्ते । महर्षिभाष्यं चात्र द्रष्टव्यम्—

(अग्निम्) परमेश्वरम् ।

(महर्षिभाष्यम् १। १। १॥)

अथाग्निशब्दनिर्वचने महर्षेर्विस्तृतं भाष्यम्——

"सर्वज्ञः सर्वशक्तिमान् न्यायकारीत्यादिविशेषणयुक्तः परमेश्वरोऽग्निः·······"अञ्चु गतिपूजनयोः", "णीञ् प्रापणे", "अगि गत्यर्थः", "इण् गतौ", इत्यादिधातुभ्यो ऽग्निशब्दः सिध्यति ॥ अञ्चति अच्यते=जानाति ज्ञायते, गच्छति गम्यते सत्करोति=पूजयति, सत्क्रियते=पूज्यते। नयति=प्राप्नोति, नीयते=प्राप्यते धर्मात्मा जनो विद्वान् तथा विद्वद्भिर्धर्मात्मभिर्मुमुक्षुभिश्चेत्यादिव्याकरणनिरुक्तप्रमाणैरप्यग्निशब्देन परमेश्वरग्रहणे सुष्ठूक्तिर्गम्यते ॥

(महर्षेर्विस्तृतं भाष्यम् ऋ० १ । १ । १ ॥)

अस्यायमर्थः—अञ्चति जानाति सर्वज्ञ इत्यर्थः[1] । अच्यते ज्ञायते वेदादि-शास्त्रैः[1] । अञ्चति गच्छति यो हि सर्वत्र गतो ऽस्ति सर्वव्यापक इत्यर्थः[2] । अच्यते गम्यते प्राप्यते सर्वत्र[2] । अञ्चति सत्करोति पूजयति धर्मात्मनो जनस्यादरं करोती-त्यर्थः[3] । अच्यते पूज्यते विद्वद्भिः[3] । अञ्चति नयति प्राप्नोति[4] यः सर्वाणि सुखानि प्राप्तो ऽस्ति पूर्णकाम इत्यर्थः । अच्यते नीयते प्राप्यते[4] विद्वद्भिर्धर्मात्मभिर्मुमुक्षुभिश्च सर्वसुखप्राप्त्यर्थम् । (अगि) "अङ्गेर्नलोपश्च" उणा० ४।५२॥ इत्यगिधातोर्नि-प्रत्यये धातुनकारलोपे अग्निशब्दः सिध्यति । अगि+नि, अन् ग्+नि, अग्+नि= अग्निः । अयं नि प्रत्ययः कर्तरि कर्मणि च । तथा चोक्तं दशपाद्युणादिवृत्तौ—

"अङ्गेर्नलोपश्च"..................कर्ता कर्म च ।

(दशपाद्युणादिवृत्तिः १।२०॥)

(अञ्चु) अयं निप्रत्ययो बाहुलकाद् अञ्चतेरपि भवति । अञ्च+नि, वर्णलो-पेन अच्+नि, वर्णव्यापत्त्या[5] परोक्षेण अग्+नि=अग्निः ।

अञ्चतेः इकारो वा नामकरणः[6] । अञ्च्+इ, अन् च्+इ, वर्णविपर्ययेण अच् न्+इ, वर्णव्यापत्त्या[5] अग् न्+इ=अग्निः ।

(णीञ्) "णीञ् प्रापणे" इत्यस्मात् तु अग्रोपपदात् १४१ पृष्ठे व्याख्यातम् । अग्र+णी क्विप्, अग्रशब्दस्य अग् भावः णी धातोर्ह्रस्वत्वं च अग्+नि=अग्निः । अस्य मूलं निरुक्ते ७।१४॥

(इण्) "इण् गतौ" इत्यस्मादपि अग्रोपपदादेव । अग्र+इ वर्णलोपेन[7] अग्+ र्+इ, वर्णव्यापत्त्या[8] परोक्षेण अग्+न्+इ=अग्निः । अग्रे एतीति अग्निः । अस्य मूलं शतपथे—

१—गतेस्त्रयो ऽर्था भवन्ति । ज्ञानं गमनं प्राप्तिश्चेति । इयं व्युत्पत्तिर्गतेर्ज्ञानार्थे ।

२—गतेर्गमनार्थे व्युत्पत्तिः ।

३—अञ्चु धातोः पूजनार्थे व्युत्पत्तिः ।

४—गतेः प्राप्त्यर्थे व्युत्पत्तिः ।

५—व्यापत्तिर्वर्णान्तरेण विकारः चकारस्य गकारभावेनेत्यर्थः ।

६—नामकरणः प्रत्यय इत्यर्थः ।

७—अग्रशब्दस्यान्त्याकारलोपेनेत्यर्थः ।

८—रकारस्य नकारेणेत्यर्थः ।

"यो वै पूर्व एत्यग्रऽएतीति वै तमाहुः सो एवास्याग्निता"

(शतपथ० २।२।४।२॥)

"स यदस्य सर्वस्याग्रमसृज्यत तस्मादग्निः। अग्निर्ह वै तमग्नि-रित्याचक्षते परोक्षम्।"

(शतपथ० ६।१।१।१।११॥)

ननु अग्रोपपदात् नी धातोर्ह्रस्वत्वे, अग्रोपपदात् इण् धातोर्वा क्विप् प्रत्यये तुग्, क्विन् प्रत्यये कुत्वेन, विजादिषु च गुणेन भाव्यम्। अत्रोच्यते "आगमशास्त्रम-नित्यम्" इति तुको निवृत्तिः। "संज्ञापूर्वको विधिरनित्यः" इति गुणादिबाधः। अजन्तस्य न कुत्वम्। औणादिके क्विपि बाहुलकात् तुगभावः। तथा च वर्णानीतिः।

"अर्तिकिरत्योः कलोपश्च" अनयोः क्विप् कृधातोः कलोपश्च। ऋ ऋ। क्विपः पित्वेऽपि बाहुलकात् ऋ धातो र्न तुक्।

(वर्णानीति २ सूत्र)

स्कन्दस्तु निरुक्तभाष्ये डिप्रत्ययमपि मन्यते—

"नीः नयतिः परो डि प्रत्ययान्तः"

(स्कन्द निरु० भा० ७। १४॥)

लैटिनभाषायां Ignis इग्निस्" शब्दः।

अग्निर्व्याख्यातः।

कीदृशमग्नि परमात्मानम् (यज्ञस्य होतारम्) (यज्ञस्य) विदुषां सत्कारस्य, सत्सङ्गतेः, विद्यादिदानस्य च। 'यज देवपूजासंगतिकरणदानेषु' अस्माद् धातोः "यज याच यत विच्छ प्रच्छ रक्षो नङ्" (शब्दानु० ३।३।९०॥) इति भावे नङ्। यजनं यज्ञ इति। देवपूजा=विद्वत्सत्कारः देवानां पूजा देवपूजा देवैः कृता वा पूजा देवपूजा। महर्षिभाष्ये 'विदुषां सत्कारः' इत्यत्र कर्तरि कर्मणि वा षष्ठी। "यज्ञः कस्मात्? प्रख्यातं यजतिकर्मेति नैरुक्ताः" (निरु० ३। १९॥)। अस्यायमर्थः—प्रख्यातं प्रसिद्धं यजतिकर्म यजधातोरर्थो लोके वेदे च। तद्वाचकात् यजधातोर्भावे यज्ञशब्दो निरुच्यत इति नैरुक्ता आहुः।

१—शतपथे ऽधोरेखया उदात्तः स्वर्यते।

तथा च (यज्ञस्य) महिम्नः "याच्ञो भवतीति वा" (निरु० ३।१६॥) अस्यायमर्थः—अपरश्च यज्ञशब्दो ऽस्ति स याच धातोः सिध्यति । 'टुयाचृ याच्ञायाम्' अस्माद् धातोः "यज याच् यत०" (शब्दानु ३।३।६०॥) इति नङ्प्रत्यये याच्ञा शब्दः सिध्यति । याच्ञा अस्यास्तीति याच्ञः । "अर्श आदिभ्योऽच्" (शब्दानु० ५।२।१२७॥) इति मत्वर्थीयोऽच् प्रत्ययः । याच्ञा + अ = याच्ञः । याच् + ञः, याज् + ञः, यज् + ञः = यज्ञः । वर्णव्यापत्त्या परोक्षेण यज्ञ इत्युच्यते । यद् वा याच धातोः कर्मणि नङ्प्रत्यये याच् + नः, यच् + नः, यज् + नः = यज्ञः । वर्णव्यापत्त्या परोक्षेण यज्ञ इत्युच्यते । योहि याच्यते स यज्ञः महिमेत्यर्थः । महिमा हि प्रार्थनीयो भवति । "यज्ञो वै महिमा" (शत० ६ । ३ । १ । १८ ॥) इत्यादि ब्राह्मणं भवति ।

तथा च (यज्ञस्य) कर्मणः "यजूंष्येनं नयन्तीति वा" (निरु० ३।१६॥) अस्यायमर्थः—अपरश्च यज्ञशब्दोऽस्ति स यजुः पूर्वात् 'णीञ् प्रापणे' इत्यस्माद् धातोः कर्मणि क्विपि सिध्यति । यजुस् + नी + क्विप्, यज् + नी, यज् + नः । वर्णलोपेन वर्णव्यापत्या च परोक्षेण यज्ञ इत्युच्यते । अत्रायं भावः । एनं = कर्मरूपं यज्ञं यजूंषि = यजुर्वेदमन्त्रा आदित आरभ्य समाप्तिं नयन्ति = समाप्तिपर्यन्तं वर्णयन्तीत्यर्थः । ऋग्वेदे ज्ञानं, यजुर्वेदे कर्म, सामवेद उपासना, अथर्ववेदे विज्ञानम्, एष हि वेदानां विषयक्रमः । यो हि यजुर्भिर्नीयते स यज्ञः कर्मेत्यर्थः । "यज्ञो वै श्रेष्ठतमं कर्म" (शत० १।५।१।५॥) इत्यपि ब्राह्मणं भवति ।

तथा च (यज्ञस्य) अग्निहोत्राद्यश्वमेधान्तस्य क्रियासमूहजन्यस्य सर्वजग-दुपकारकस्य यज्ञस्य । "यजुरुन्नो भवतीति वा" (निरु० ३।१६॥) अस्यायमर्थः—अपरश्च यज्ञशब्दोऽस्ति स यजुः पूर्वात् 'उन्दी क्लेदने' इत्यस्माद् धातोः कर्मणि क्तप्रत्यये सिध्यति । यजुः + उन्द् + क्त, यजुः + उन्नः, यज् + न्नः, यज् + नः = यज्ञः । वर्णलोपेन वर्णव्यापत्त्या च परोक्षेण यज्ञ इत्युच्यते । अत्रायं भावः । अयं हि अग्निहोत्राद्यश्वमेधान्तो यज्ञो यजुर्भिः = यजु-र्वेदमन्त्रैः उन्नः = क्लिन्नः परिपूर्ण इत्यर्थः । एषु अग्निहोत्राद्यश्वमेधान्तेषु यज्ञेषु भूयांसो यजुर्वेदमन्त्रा अल्पशश्चान्ये । तथा चाह—"व्यृद्धमु वा ऽएतद् यज्ञस्य

यद्यजुष्केण क्रियते" (शत० १३।१।२।१॥) अस्यायमर्थः—यज्ञस्य यत् = कर्म अयजुष्केण = यजुर्वेदमन्त्रैर्विना क्रियते = संपाद्यते वै = निश्चयेन एतत् = यज्ञस्य कर्म व्यृद्धम् = विगतर्द्धिकम् । यो हि यजुर्भिः उक्तः स यज्ञः अग्निहोत्रादिरूप इत्यर्थः ।

तथा च (यज्ञस्य) विद्याविज्ञानयोगादेः सत्संगतिकरणोत्पन्नस्य । "बहु-कृष्णाजिन इत्यौपमन्यवः" (निरु० ३ । १६॥) अस्यायमर्थः—अपरश्च यज्ञशब्दोऽस्ति सोऽजिनशब्दात् "अर्श आदिभ्योऽच्" (शब्दानु० ४ । २। १२७॥) इति मत्वर्थीयेऽच् प्रत्यये सिध्यति । यत्राभिन्नरूपेण शब्देन तद्वानभि-धीयते सोऽर्शआदिगणे द्रष्टव्यः । अजिन+अ, अ+ज्+इ+न्+अ+अ, इ+य+ज्+न+अ, य+ज्+नः = यज्ञः । वर्णलोपेन वर्णविपर्ययेण वर्णव्यापत्त्या च परोक्षेण यज्ञ इत्युच्यते अत्रायं भावः —योगादौ बहूनां कृष्णाजिनानामुपयोगो दृश्यते । ब्रह्मचारिणोऽपि अजिनवन्तः, योगिनोऽपि अजिनवन्त इत्येवमादयः। अजिनान्यत्र सन्तीति स यज्ञो योगादिरूपः इत्यर्थः । "कृष्णाजिनं वै सुकृतस्य योनिः" (शत ६।४।२।६) "स (ब्रह्मचारी) यन्मृगाजिनानि वस्ते तेन तद् ब्रह्मवर्चसमवरुन्धे" (गो० पू० २।२॥) "एतद् (कृष्णाजिनं) वै प्रत्यक्षं ब्रह्मवर्चसम्" (ताण्ड्य० १७।११।८॥) इत्यादि ब्राह्मणं भवति ।

तथा च (यज्ञस्य) अस्य जातस्य जगतः प्रकृत्यादिपृथिव्यन्तकार्यकारण-संगत्योत्पन्नस्य । "स यज्ञ जायते तस्माद् यज्जः । यज्जो ह वै नामैतद् यद् यज्ञ इति ।" (शत० ३।६।४।२३॥) अस्यायमर्थः—अपरश्च यज्ञशब्दोऽस्ति स शङ्न्तेणधातुपूर्वात् डप्रत्ययान्तात् जनिधातोः सिध्यति । यन्+ज, य+ज+न्+अः = यज्ञः । वर्णविपर्ययेण वर्णव्यापत्त्या च परोक्षेण यज्ञ इत्युच्यते। अत्रायं भावः इदं हि दृश्यमानं जगत् जातं वस्तु न नित्यः पदार्थः किन्तु कार्यकारणसंगत्योत्पद्यते[1] । यो हि प्रकृत्यादिपृथिव्यन्तकार्यकरणसंगतिं यन्-गच्छन् प्राप्नुवन् जातः स यज्ञ जगदित्यर्थः ।

१—"कारणगुणपूर्वकः कार्यगुणो दृष्टः । वैशेषिकअ० २, आ० १, सू० २४॥ इति कार्यकारणसंगतिः।

एवं यज्ञशब्दस्य विभिन्ननिर्वचनानां पृथक् पृथगर्था भवन्ति । यजधातोः संगतिकरणमर्थमादायापि विद्याविज्ञानयोगादिः, जगत्, विद्यादिदानं चार्था भवितुमर्हन्ति ।

सति चैवं षण्णां यज्ञशब्दानां १—विद्वत्सत्कारो विद्वत्कृता पूजा च, २—सत्संगतिः, ३—विद्यादिदानं, ४—महिमा, ५—कर्म, ६—अग्निहोत्राद्यश्वमेधान्तो यज्ञः, ७- विद्याविज्ञानयोगादिः ८—जगत् इत्याद्यभिधेयार्था भवन्ति ।

प्रतिनिर्वचनं वस्तुभेदो भवति तत्र विचार्यते—

(एकस्य शब्दस्यानेकनिर्वचनविवेचनम्)

ननु कथमेकस्य शब्दस्यानेकस्य निर्वचनस्य संभवः ? अत्र केचिदाहुः- परोक्षातिपरोक्षवृत्तिषु शब्देषु नियतनिर्वचस्यानवधारणादेवमुच्यते यथा—

"लक्ष्मीर्लाभाद् वा लक्षणाद् वा लाञ्छनाद् वा लषतेर्वा स्यात् प्रेप्साकर्मणः लग्यतेर्वास्यादाश्लेषकर्मणः लज्जतेर्वास्याद्श्लाघाकर्मणः"

(निरु० ४।१०॥)

अत्र न ज्ञायते एषां कतमो धातुर्लक्ष्मीशब्दे । अन्यतमानवधारणात् संभाविता अनेके धातवः प्रदर्श्यन्ते । तथा चात्राह स्कन्दः—

अन्यतमावधारणे कारणाभावादेकस्य शब्दस्यानेकनिर्वचनस्य संभवः तत्प्रदर्शनं च-एतावतां धातूनामभिधेयाः क्रिया अयं शब्दः प्रतिपादयितुं समर्थ इत्येतस्य प्रतिपादनार्थम् ।

(स्कन्द निरु० भा० ।।१।।)

दुर्गोऽप्याह—

विशेषलक्षणव्यवस्थाभावात् । न हि तत्र विशेषलक्षणव्यवस्था काचिदस्ति ययैकोऽवतिष्ठेत अन्ये व्यावर्तेरन् ।

(दुर्ग निरु० भा० १।०॥)

डाक्टर विल्सनादयः पाश्चात्यास्तदनुयायिनो ऽरविन्दसिद्धेश्वरवर्मादयश्च तु याज्यनिर्वचनानि काल्पनिकान्येवाहुः । यथाऽऽह विल्सनः—

Agni—A great variety of etymologies are devised to explain the meaning of the term Agni, the most of which are obviously fanciful.

(विल्सनट्रांसलेशन ऋ. १।१।१॥)

अस्यायमर्थः—अग्निशब्दस्यार्थान् व्याचष्टुमनेका व्युत्पत्त्यो निरूप्यन्ते तासां बह्वयो व्युत्पत्त्यः काल्पनिका एव ।

अरविन्दो प्याह—

To rely entirely on the traditional and often imaginative rendering of the Indian Scholars is impossible for any critical mind.

(On the Vedas Page 56)

अस्यायमर्थः—कस्यापि समालोचकस्य मनः सर्वां प्राच्यशब्दार्थपद्धतिं सम्यग् विश्वसेदित्यसंभवम् ।

सिद्धेश्वरवर्माप्यत्र प्रजगाद—

Etymology of yaska is nonsense.

(Etymologies of yaska Page 10)

अस्यायमर्थः—यास्कनिर्वचनं प्रलापमात्रम् ।

अत्रोच्यते—निर्वचनशास्त्रे प्रयुक्तो वा शब्दः समुच्चयार्थो न तु सन्देहार्थः। यथा ऽऽह यास्कः— (निरु० १।४॥)

"अथापि समुच्चयार्थे भवति 'वायुर्वा त्वा मनुर्वा त्वा" इति"

अस्यायमर्थः—अयं वा शब्दः समुच्चयार्थो ऽपि । यथा 'वायुर्वा त्वा मनुर्वा त्वा' अत्र वायुश्च त्वा मनुश्च त्वा इत्यर्थः । तथैव "याच्त्रो भवतीति वा यजुरुन्नो भवतीति वा०" इत्यादेरयमर्थः—यज्ञशब्दो न केवलं यज धातोरेव प्रत्युत याचधातोरपि यजुः पूर्वाद् उनत्तेरपि निष्पन्न इत्यादि योज्यम् ।

वस्तुतो भिन्नानामपि सरूपाणां शब्दानां समानाकृतित्वादेको ऽयं शब्द इति प्रतीतिस्तस्मादिदमुच्यते एकस्य शब्दस्यानेकानि निर्वचनानि । तत्रानेकेषां

१—तै० स० १।७।७।२॥

शब्दानामनेकानि निर्वचनानि भवन्ति। भिन्नप्रकृतिनिष्पन्नो ऽपि भवत्यविसंवादी शब्दो यथा चकारेति करोतिकिरत्योः' ।

तत्र 'चकार' 'चकार' इति भिन्ने द्वे पदे समानाकृतित्वाच्च 'चकार' इत्येकं पदमिति प्रतीतिः। तद्वत् यज्ञः यज्ञः यज्ञः यज्ञः यज्ञः यज्ञः इति षड् यज्ञशब्दाः सन्ति तत्र समानाकृतित्वाद् एको यज्ञशब्द इति प्रतीतिः। तस्मादिदं प्राकृतैरुच्यते एकस्य यज्ञशब्दस्य षण् निर्वचनानि। वस्तुतस्तु ते षड् यज्ञशब्दाः। तत्र षट्सु यज्ञशब्देषु एको यज्ञशब्दो यजधातोरुत्पद्यते तस्यार्थो 'देवपूजादयः। द्वितीयो यज्ञशब्दो 'याच' धातोरुत्पन्नस्तस्यार्थो 'महिमा'। तृतीयो यज्ञशब्दो 'यजुः' पूर्वान् 'नी' धातोर्जायते तस्यार्थः 'कर्म'। चतुर्थो यज्ञशब्दो 'यजुः' पूर्वाद् 'उन्दी' धातोर्जातस्तस्यार्थः अग्निहोत्राद्यश्वमेधान्तो यज्ञः। पञ्चमो यज्ञशब्दः 'अजिन' शब्दान् निष्पद्यते तस्यार्थः 'विद्याविज्ञानयोगादिः। षष्ठो यज्ञशब्दो 'यन्' पूर्वाज् 'जनी' धातोर्निष्पन्नस्तस्यार्थः 'जगत्'। एवं प्रतिनिर्वचनं वाच्यं वस्तु भिद्यते। प्रतिनिर्वचनं शब्दाश्च भिन्ना इत्याचार्यमतम्।

ननु 'अर्थभेदेन शब्दभेदः,' 'सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति' इति प्रसिद्ध एव सिद्धान्तो नेदं भवता नवीनमुच्यते शब्दा अपि भिद्यन्ते इति। सत्यम्। व्यक्तिपक्षेण स सिद्धान्तः प्रसिद्धः। वयं तु पक्षान्तरे ऽपि एतादृशं शब्दभेदं मन्यामहे।

एतेन 'निर्वचनानि विकल्पतो दत्तानि' इति वदन् सिद्धाञ्जनभाष्यकारो ऽरविन्दशिष्यः कपालिरपि[२] परास्तः। अथ च दुर्गस्कन्दसायणादयस्तु सरूपशब्दानां सर्वाणि निर्वचनानि एकस्मिन्नेव वाच्ये वस्तुनि संगमयन्ति। यथा यज्ञाग्निरेव अग्रणीः स एव दग्धादित्यादिविशेषणयुक्तः तथा च यज्ञ एव यजुरुन्नः तत्र यज्ञ एव यच्ञा क्रियते स यज्ञ एव यजुर्भिर्नीयते स यज्ञ एवाजिनवान्। तथा च दुर्गः।

"याच्ञो भवतीति वा याच्यते ह्यत्र......अथवा यजुर्भिरयं उन्नः क्लिन्न इव भवति बहुत्वादत्र यजुषाम्-अथवा बहुकृष्णाजिन

१—'चकार' इति पदं 'डुकृञ् करणे' इत्यस्मादपि परोक्षे लिटि निष्पद्यते 'कॄ विक्षेपे' इत्येतस्मादपि परोक्षे लिटि भवति। अविसंवादी समानाकृतिरित्यर्थः।

२—ऋग्वेदसिद्धाञ्जनभाष्यम् १।१ १॥ पृष्ठ ३॥

इत्यौपमन्यवः यद्यदत्र दृश्यते प्रतिविशिष्टं साधनं किंचित् तत् कृष्णाजिनमिति यज्ञः। सोमे तावदजिनद्वयं यजमाने ऽप्याजिनद्वयं ……अथवा यजूंष्येनमुपक्रमादारभ्यान्तं नयन्तीति यज्ञः।

(दुर्ग निरु० भा० ३।१९॥)

सर्वे एते भाष्यकारा सर्वेषां निर्वचनानामेकस्मिन्नर्थे संगमने स्वपाण्डित्य-प्रदर्शनं कुर्वन्ति। अपारोवर्यविदो हि ते। पारोवर्यविन् महर्षिः। स तु निर्वचन-बाहुल्याद् वस्तुभेदं प्रदर्शयति। तथैव महर्षिदृशा ऽस्माभिर्यज्ञशब्दो व्याख्यातः। अग्निशब्दनिर्वचनेष्वप्याह महर्षिः—

अग्रणीः सर्वोत्तमः सर्वेषु यज्ञेषु पूर्वमीश्वरस्यैव प्रतिपादनात् तस्यात्र ग्रहणम्। दग्धादितिविशेषणाद् भौतिकस्यापि।

(महर्षिभाष्यम् ऋ. १।१।१॥)

अस्यायमर्थः—अग्रपूर्वान् नी धातोर्निष्पन्नो योऽग्निशब्दः स ईश्वरवाचकः। अथ च द्वितीयो ऽग्निशब्दो यस्मिन् दह धातुरप्यस्ति स भौतिकाग्निवाचकः। उभावपीमौ अग्निशब्दौ वस्तुतो भिन्नौ। समानाकृतित्वाच्च एको ऽग्निशब्द इति प्रतीतिः तयोर्वाच्ये वस्तुनी अपि भिन्ने एव।

एते च शब्दा एकधातुजा द्विधातुजाः त्रिधातुजा इत्यादिरूपेण नाना-विधाः सन्ति। यथा भौतिकाग्निवाचको ऽग्निशब्द त्रिभ्यो धातुभ्यो निरुच्यते। तथा चाह यास्कः।

त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः। इतात्, अक्ताद् दग्धाद् वा, नीतात्। स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परः।

(निरु० ७।१४॥)

अस्यायमर्थः—एको ऽग्निशब्दस्त्रिभ्यो धातुभ्यो जायते। तस्मिन्नग्निशब्दे 'अयनम्' इत्यादौ ल्युडन्तादिरूपेषु दृष्टः 'इण्' धातोरकारः अग् इत्यादौ क्विन्नन्तादि-रूपेषु दृष्ट 'अञ्जु' धातोर्गकारः 'नी' धातुश्च परः। अथवा इणधातोरकारः

'घग्' 'दग्धम्' इत्यादिक्विन्तक्तान्तादिरूपेषु दृष्टो दह धातोः गकारः 'नी' धातुश्च परः। अ+ग्+निः=अग्निः। यो हि एति पृथिव्यादिषु व्याप्नोति अनक्ति रूपाणि दहति वा, नयति च हवींषि देवेभ्यो यस्मिन् भौतिकाग्नौ हुतं हविरादिकं वाय्वादिभ्यो देवेभ्यो गच्छति अथवा वाष्परूपेण परिणतो ऽग्निर्वहति यानानि सो ऽग्निर्भौतिकः। बृहद्देवतायां चोक्तम्।

धातूपसर्गावयवगुणशब्दं द्विधातुजम्।
बह्वेकधातुजं वापि पदं निर्वाच्यलक्षणम्॥
धातुजं धातुजाज्जातं समस्तार्थजमेव च।
वाक्यजं व्यतिकीर्णं च निर्वाच्यं पञ्चधा पदम्॥

(बृहद्देवता २।१०३, १०४।।)

अस्यायमर्थः—धातूनाम् उपसर्गाणाम् अवयवानां गुणानां=लाक्षणिकार्थानां शब्दा ध्वनयो यस्मिन् तत् निर्वाच्यलक्षणं पदं निर्वाच्यानि निर्वक्तुं योग्यानि लक्षणानि व्याख्या यस्मिन् तादृशं पदम् एकधातुजं द्विधातुजं बहुधातुजं च भवति। पदे धातुध्वनिर्यथा यज्ञशब्दे यज् याच् प्रभृतीनां धातूनां ध्वनयो वर्तन्ते। पदे उपसर्गध्वनिर्यथा उस्त्रिया शब्दे उत् उपसर्गस्य ध्वनिः। पदे अवयवध्वनिर्यथा—अ+उ+म्=ओमित्यत्र अग्निशब्दावयवस्य अकारस्य ध्वनिः उत्कर्षशब्दावयवस्य उकारस्य ध्वनिः मिनोतेर्धातोरवयवस्य मकारस्य ध्वनिः पदे लाक्षणिकार्थस्य ध्वनिर्यथा कुशलशब्दे कुशादानलक्षितस्य चातुर्यार्थस्य ध्वनिः।

एकधातुजं पदं यथा—'यज्ञः'। द्विधातुजं पदं यथा—'मिथुनम्' अत्राह यास्कः—

मिथुनौ कस्मात् मिनोतिः श्रयतिकर्मा थु इति नामकरणस्थकारो वा नयतिः परः वनिर्वा।

(निरु० ७।२९)

अस्यायमर्थः—मिथुन शब्दे थुः थकारो वा प्रत्ययो मध्ये वर्तते 'मी' धातुः पूर्वभागे विद्यते परभागे च 'नी' धातुः वनिधातुर्वा। तस्मादिदं पदं द्विधातुजं भवति। बहुधातुजं पदं यथा—'अग्नि' शब्दः इण् धातोः अञ्जु धातोर्दह धातोर्वा तथा नीधातोर्निरुच्यते।

एतादृशानि च पदानि पञ्चविधानि भवन्ति धातुजं=यथा यज्ञादयः शब्दाः।

धातुजाज्जातम् धातोर्जातं धातुजं=यथा दद धातोः दण्डशब्दस्तस्माद् धातुजाः दण्डशब्दाज् जातं दण्डयपदम् । दण्डमर्हतीति दण्डयः । समस्तार्थजपदं= यथा—जगद्वाचको यज्ञशब्दः यन् ज इति यज्ञ उच्यते ।

वाक्यजं पदं=यथा 'इति ह आस' इतिहासशब्दः । व्यतिकीर्णं पदं=यथा हृ+द+य=हृदयम्[1] । अ+उ+म्=ओ३म् । तथा चोक्तम्—

अकारः प्रथमा मात्रा-आप्तेरादिमत्वाद् वा
उकारो द्वितीया मात्रा-उत्कर्षादुभयत्वाद् वा
मकारस्तृतीया मात्रा-मितेरपीतेर्वा

(माण्डूक्योप० ९-११)

अस्यायमर्थः—ओंकारे वर्णत्रयं विद्यते अ उ म् । अकारः 'आप्' धातोः आदिशब्दस्य च ह्रस्वभूतो ऽकारः । उकार उत्कर्षशब्दस्य उभयशब्दस्य च । मकारो मितिशब्दस्य अपीतिशब्दस्थस्य पकारस्य मकारभूतस्य च ।

अयं भावः—अवया अवयविनामर्थं गमयन्ति । यथा अग्निशब्दे स्थिता अ ग् नि अवयवा अयनम् दग्धम् नीतम् इत्याद्यवयविनामर्थं गमयन्ति प्रपञ्चितमिदं प्राक् । यथा च हृदयशब्दे स्थिता हृ द य अवयवा हरति ददाति एत्यवयविनामर्थं गमयन्ति । यथा च "तवाभिधानाद् व्यथते नताननः"[2] अत्र 'त' 'व' अवयवौ तार्क्ष्यवासुकिनाम्नोरवयविनोरर्थं गमयतः "नामैकदेशग्रहणे नाममात्रग्रहणम्" इति हि सिद्धान्तः । यथा चाङ्गलभाषाप्रकारे VIBGYOR[3] शब्दे स्थिता सप्ताङ्गलभाषाक्षरा क्रमशः Violet, Indigo, Blue, Green, Yellow, Orange, Red शब्दानामर्थं गमयन्ति तथा NEWS[4] शब्दे स्थिता चत्वार आङ्गलभाषाक्षरा North, East, West, South शब्दानामर्थं गमयन्ति । तथोङ्कारे स्थिता अ उ म् वर्णा अवयविनामर्थं गमयन्ति । तदित्थम्—

१—शतपथ १४ काण्ड ६ प्रपाठक । बृहदारण्यकोप० ४ प्रपाठक ७ ब्राह्मण ।

२—किरातार्जुनीयम् ५।३४।

३—Violet=पाटलवर्णः । Indigo=श्यामवर्णः । Blue=नीलवर्णः । Green= हरितवर्णः । Yellow=पीतवर्णः । Orange=नारंगवर्णः । Red=रक्तवर्णः ।

४—North=उत्तरदिशा । East=पूर्वदिशा । West=पश्चिमदिशा । South= दक्षिणदिशा । सर्वदिग्भ्यः प्राप्तं वृत्तं News समाचार इत्यभिधीयते ।

अ + उ + म् = ओ३म्, इत्यत्र अकारो विराडग्निविश्वादिनाम्नाम्, उकारो हिरण्यगर्भवायुतैजसादिनाम्नाम्, मकारश्च ईश्वरादित्यप्राज्ञादिनाम्नां वाचको ग्राहकश्च। तस्य चायं प्रकारः। अकारः 'आप्' धातोः आदिशब्दस्य च ह्रस्वभूतस्याद्यवयवः, उकारः उत्कर्षशब्दस्य उभयशब्दस्य चाद्यवयवः, मकारः मितिशब्दस्याद्यवयवः, अपीतिशब्दस्थस्य पकारस्य मकारभूतस्य च मध्यावयवः इत्युक्तं प्राक्। अस्य विवरणं तत्रैव माण्डूक्योपनिषदि। तथाहि—

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग् वैश्वानरः प्रथमः पादः।

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः।

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत् सुषुप्तम्। स्वप्नस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः।

(माण्डूक्योप० ३—५)

पादा मात्रा मात्राश्च पादाः।

(माण्डूक्योप० ८)

अस्यायमर्थः—यथा जीवस्य जाग्रत्स्वप्नसुषुप्तयोऽवस्था भवन्ति तथा ब्रह्मणोऽपीमास्तिस्रोऽवस्थाः कल्प्यन्ते। तत्र (जागरितस्थानः) जाग्रतावस्थास्थितो जीवः (बहिःप्रज्ञः) बहिर्विषया प्रज्ञा यस्य सः। तथैव स्थूलसृष्टिं रचयतो विराड्ब्रह्मणो जाग्रतावस्था। (सप्ताङ्गः) शिरः, नाभिः, पादौ, चक्षुषी, श्रोत्रे, प्राणः, मुखम्, इति सप्ताङ्गानि यस्य स जीवः। तथा विराड्ब्रह्मणोऽपि—

'शीर्ष्णो द्यौः समवर्तत' (यजु० ३१, म० १३)
'नाभ्या आसीदन्तरिक्षम्' (यजु० ३१, म० १३)
'पद्भ्यां भूमिः' (यजु० ३१, म० १३)
'चक्षोः सूर्यो अजायत' (यजु० ३१, म० १२)
'दिशः श्रोत्रात्' (यजु० ३१, म० १३)

'वायुश्च प्राणश्च' (यजु० ३१, म० १२)

'मुखादग्निरजायत' (यजु० ३१, म० १२)

अस्यायमर्थः—ब्रह्मणो द्युलोकः शिर इव, अन्तरिक्षं नाभिरिव, भूमिः पादाविव, सूर्यश्चक्षुषी इव, दिशः श्रोत्रे इव, वायुः प्राणा इव, ब्रह्माण्डाग्निश्च मुखमिव। अथवा—

"तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः, चक्षुर्विश्वरूपः, प्राणः पृथग्वर्त्मात्मा, सन्देहो बहुलः, वस्तिरेव रयिः, पृथिव्येव पादौ" (छान्दोग्योप० ५। १८। २॥)

अस्यायमर्थः—एतस्य परमात्मनो (सुतेजाः) द्युलोकः (मूर्धा) मूर्धस्थानीयः (विश्वरूपः) सूर्यः (चक्षुः) चक्षुःस्थानीयः (पृथग्वर्त्मात्मा) वायुः (प्राणः) प्राणस्थानीयः (बहुलः) आकाशः (सन्देहः) मध्यकायस्थानीयः (रयिः) जलम् (वस्तिः) मूत्राधारस्थानीयः (पृथिवी) भूमिः (पादौ) पादस्थानीया। इति सप्ताङ्गानि यस्य सः।

(एकोनविंशतिमुखः) पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च प्राणाः मनो बुद्धिश्चित्तमहंकार इत्येकोनविंशतिमुखो जीवः इत्येतेषां च कारणानि विराड्ब्रह्मण एकोनविंशतिर्मुखानि। यथा महत्तत्त्वैकाशाद् बुद्धिर्निर्मीयते सर्वं महत्तत्त्वं ब्रह्मणो बुद्धिरित्यादि योज्यम्। (स्थूलभुक्) स्थूलं जगत् भुङ्क्ते जीवः स्थूलं जगत् रचयते ब्रह्म। सो ऽयं (वैश्वानरः) विश्वानर एव वैश्वानरः स्वार्थे अण्। विश्वानरः=विश्वान् अरः[1] सर्वान् यानीन् प्रति गन्तुं समर्थो जीवः ब्रह्मापि वैश्वानरः। विश्वान् पदार्थान् अरः व्याप्तः। वैश्वानरो विश्व इत्यनर्थान्तरम्—

"विशन्ति प्रविष्टानि सर्वाण्याकाशादीनि भूतानि यस्मिन् यो वा ऽऽकाशादिषु सर्वेषु भूतेषु प्रविष्ट स विश्व ईश्वरः" (सत्यार्थ० प्र० समु० १ शा० सं० भाग १ पृ० ६१)

१—"वैश्वानरः कस्मात्। विश्वान् नरान् नयति। विश्व एनं नरा नयन्तीति वा। अपि वा विश्वान् अर एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरः। (निरु० ७।२१॥) 'अपि वा विश्वान् जन्तून् अरः 'ऋ गतौ' इत्यस्य छान्दसत्वाद भूते पचाद्यच्। उपपद विभक्तेश्चालुक्। एव शब्दोऽवधारणार्थे' (निरु० स्कन्द भाष्य ७।२१॥)

अकार आदिशब्दस्य ह्रस्वभूतस्याद्यवयवः। आद्यवस्था जागृतावस्था विराड् ब्रह्मेत्यर्थः स्थूलब्रह्माण्डस्य रचयिता परमेश्वरो विराडित्युच्यते। तथा चोक्तं परमर्षिणा—

यो विविधं नाम चराचरं जगद् राजयति प्रकाशयति स विराट्।

(सत्यार्थ० प्र० समु० १ श० सं० भाग १ पृ० ९०)

अग्निशब्दस्य चाद्यवयवो ऽकारः। तस्मादकारो ऽग्निवाचको ऽपि। अवयवा अवयविनामर्थं गमयन्तीति सिद्धान्तात्। अतः साधूक्तम्—

"अकारेण विराडग्निविश्वादीनि ··· एतदाद्यर्था अकारेण विज्ञेयाः"

(पञ्चमहा० श० सं० भाग १ पृ० ८६४)

आदिशब्दाच्च—आप् धातोर्ह्रस्वभूत आद्यवयवो ऽकारः सर्वव्यापकविभ्वादि-नाम्नां वाचकः। आदिशब्दस्य ह्रस्वभूतस्याद्यवयवो ऽकार आदिमूलं कारणम् इत्यादिनाम्नां वाचकः।

अथोकारमात्रा प्रपंच्यते—

(स्वप्नस्थानः) स्वप्नावस्थामापन्नो जीवः (अन्तः प्रज्ञः) चित्रित पट इव मनो ऽन्तर्विषयज्ञानं स्वप्ने कुर्वन् वर्तते। ब्रह्मापि अवान्तरप्रलयदशायां सर्वप्राणिनां सर्वतत्त्वानां च प्रलयाभावात् अर्द्धसुप्तमिवावशिष्टस्य धारणपालनादि कुर्वत् स्व-स्वरूप एव ध्यानावस्थितमिव कल्प्यते। तत्र जीवस्य ब्रह्मणश्च तान्येव सप्ताङ्गानि एकोनविंशतिश्च मुखानि भवन्ति अतः (सप्ताङ्ग एकोनविंशतिमुखः) इत्युच्यते। (प्रविविक्तभुक्) सूक्ष्मभोगी जीवः। सूक्ष्मभूतैः कार्यं कुर्वद् ब्रह्म। (तैजसः) स्वप्रकाशो बाह्यविषयशून्यो जीवः। अवान्तरप्रलयेष्वपि सूर्यादीनां प्रकाशकं ब्रह्म। तथा चोक्तम्—

"सूर्यादीनां प्रकाशकत्वात् स्वयं प्रकाशत्वात् तैजस ईश्वरः"

(पञ्चमहा० श०सं०भाग १ पृ० ८६)

उकार उभयशब्दस्याद्यवयवः । उभयो मध्यस्थ इत्यनर्थान्तरम् तथा चोक्तं शंकराचार्येण—

"अकारमकारयोर्मध्यस्थ उकारः" (माण्डूक्योप० १० शांकरभाष्यम्)

मध्यावस्था स्वप्नावस्था । अवान्तरप्रलयदशायां ब्रह्म स्वस्वभावस्थायां हिरण्यगर्भो भवति । तथा चोक्तम्—

"हिरण्यानि सूर्यादीनि तेजांसि गर्भे यस्य तथा सूर्यादीनां तेजसां यो गर्भो ऽधिष्ठानं स हिरण्यगर्भः ।"

(पञ्चमहा० श० सं० भाग १ पृ० ८६६)

वायुशब्दस्य चान्तिमो ऽवयव उकारः । तस्मादुकारो वायुवाचको ऽपि । अवयवा अवयविनामर्थं गमयन्तीति सिद्धान्तात् । तस्मात् साधूक्तम्—

"उकारेण हिरण्यगर्भ वायु तैजसादीनि········ एतदाद्यर्था उकाराद् विज्ञेयाः"

(पञ्चमहा० श० सं० भाग १ पृ० ८६६)

आदिशब्दाच्च—उत्कर्षशब्दस्याद्यवयव उकारः अद्वितीयः अनुपमः इत्यादि-नाम्नां वाचकः । उभयशब्दस्य चाद्यवयव उकारो मित्रः अद्वेष्टा समः समानः इत्यादिनाम्नां वाचकः ।

अथ मकारमात्रा प्रपंच्यते—

(यत्र सुप्तो न कंचन कामं कामयते) यस्यां सुषुप्त्यवस्थायां स्वस्वरूपमापन्नो न कांचित् कामनां कुरुते । (न कंचन स्वप्नं पश्यति) (सुषुप्तस्थानः) सुषुप्त्यवस्थामापन्नो जीवः (एकीभूतः) नासौ स्थूलशरीरे चेष्टते न च सूक्ष्मशरीरे तदा ऽस्य वृत्तय एकत्रिता इव भवन्ति । (प्रज्ञानघनः एव) ज्ञानस्वरूप एव तस्य स्वाभाविकत्वात् । (आनन्दमयः) आनन्दबहुलः (चेतोमुखः) चेतनस्वरूपः (प्राज्ञः) आत्मस्वरूपज्ञानवान् भवति । तथैव ब्रह्मणोऽपि सा सुषुप्त्यवस्था कल्प्यते । यत्र तत् स्वस्वरूपमात्रस्थितम् (न कंचन कामं कामयते) प्रजापतिरकामयत

प्रजायेय' इति कामनाविरहितः (न कंचन स्वप्नं पश्यति) न च सूक्ष्मभूतेष्वपि कृतव्यापारम् ईश्वरः स्वामी इत्येव स्थितं सत् ज्ञानस्वरूपमानन्दस्वरूपं भवति। तथा चोक्तम्—

"य ईष्टे सर्वैश्वर्यवान् भवति"

(सत्यार्थ० प्र० समु० १ श० सं० भाग १ पृ० ६१)

अपीतिशब्दस्य पकारो मकारीभूतः ओङ्कारस्यान्तिमो वर्णः। अपीतिः अप्ययः अन्तिम इत्यनर्थान्तरम्। अन्तिमावस्था सुषुप्त्यवस्था यत्र परमेश्वरः ईश्वरः स्वामी इत्येवावभासते ऽतो मकार ईश्वरवाचकः। तत्र प्राज्ञ इत्येवातः मकारः प्राज्ञवाचकः। मित्रार्यमादिनाम्नामादित्यार्थानां चावयवोऽपि मकारः। ततो मकार आदित्यवाचक तादात्म्यसम्बन्धेनेश्वरवाचकः[1]। एवं मकार ईश्वरादित्यप्राज्ञादिनाम्नां वाचकः अवयवा अवयविनामर्थं गमयन्तीति सिद्धान्तात्। तस्मात् साधूक्तम्—

मकारेणेश्वरादित्यप्राज्ञादीनि नाम्नानि बोध्यानि ……
……एतदाद्यर्था मकारेण निश्चेतव्याऽध्येयाश्च।

(पञ्चमहा० श० सं० भाग १ पृ० ८६६)

आदिशब्दाच्च—अपीतिशब्दस्थः पकारो मकारीभूतः। अपीतिः अप्ययः नाश इत्यनर्थान्तरम्। मकारः प्रलयकर्त्रादिनाम्नां वाचकः। मितिशब्दस्य च मकारः। मितिः परिमितिर्ज्ञानं वा परिमित्यर्थमादाय मकार ब्रह्मादिनाम्नां वाचकः ज्ञानार्थमादाय मकारः सर्वज्ञादिनाम्नां वाचकः।

"अकारः प्रथमा मात्रा …। उकारो द्वितीया मात्रा … मकारस्तृतीया मात्रा" (माण्डूक्योप० ९—११) इत्यत्र मात्रा शब्दः पादवाचकः। "पादा मात्रा मात्राश्च पादाः" (माण्डूक्योप० ८) इत्युक्तत्वात्। अकारः प्रथमः पादः उकारो द्वितीयः पादो मकारस्तृतीयः पादः इत्यर्थः।

जागरितस्थानो विराट् ब्रह्म—वैश्वानरः प्रथमः पादः— अकारः।

१—महर्षिप्रोक्तादित्यार्थे ऽनुसन्धेयम्।

स्वप्नस्थानो हिरण्यगर्भो ब्रह्म—तैजसो द्वितीयः पादः—उकारः।
सुषुप्तस्थान ईश्वरो ब्रह्म — प्राज्ञस्तृतीयः पादः— मकारः।

अत्रेदमप्यवबोद्धव्यम् । ब्रह्मणस्तुरीयावस्था स्वव्यपदेश्याऽशब्दव्यवहार्या नोङ्कार-शब्दविषया ।।

अथाहुः—अकारो विराडग्निविश्वादिनाम्नां वाचको ग्राहकश्च । उकारो हिरण्यगर्भवायुतैजसादिनाम्नां वाचको ग्राहकश्च । मकारश्च ईश्वरादित्यप्राज्ञादिनाम्नां वाचको ग्राहकश्च । अत्र किमिदं वाचकत्वं ग्राहकत्वं च। शृणु—अकारो विराट् शब्दस्य प्रथमं वाचकस्ततो विराट्शब्द ईश्वरार्थं ग्राहयति । एवं सर्वत्र योज्यम्। उक्तं च महर्षिणा—

अकार से विराट् अग्नि और विश्वादि, उकार से हिरण्य-गर्भ वायु और तैजसादि, मकार से ईश्वर आदित्य और प्राज्ञादि नामों का वाचक और ग्राहक है।

(सत्यार्थ० प्र० समु० १ श० सं० भाग १ पृ० ८५)

सन्ध्यापद्धतिमीमांसायामस्माभिः सर्वमिदं विस्तरतः प्रपञ्चितम् ।

अत्र अ+उ+म्=ओ३मिति व्यतिकीर्णशब्दोदाहरणं व्याख्यातम् । यज्ञ-शब्दश्च धातुजः समस्तार्थजश्च । तादृशस्य यज्ञस्य । यज्ञस्येति व्याख्यातम् ।

(होतारम्) दातारम्, अत्तारम्-भक्षकं ग्रहीतारमित्यर्थः, आदातारम्-ग्रहीतारं स्वीकर्तारमित्यर्थः यद्वा आदातारम्-ग्रहीतारम् आधारभूतमित्यर्थः यद्वा आदातारम्-ग्रहीतारं संहर्तारमित्यर्थः 'जुहोतेर्होतेत्यौर्णवाभः' (निरु० ७।१५।।) 'हु दाना-दनयोः आदाने चेत्येके' इत्यस्माद् धातोः 'तृन्' (शब्दानु० ३।२।१३५) इति तृन् । 'दाने' इत्यर्थमभिप्रेत्य 'दातारम्' इत्यर्थः ।

ननु हु धातोर्दानार्थस्य प्रक्षेपार्थमाहुः स च प्रक्षेपो यज्ञे हविषः प्रक्षेपः कथमत्र होतारम्-दातारमित्याह महर्षिः । यथाऽऽह दीक्षितः ।

दानं चेह प्रक्षेपः। स च वैधे आधारे हविषश्चेति स्वभावाल् लभ्यते। (वैयाकरणसिद्धान्तकौमुदी जुहोत्यादिगणे)

सायणाचार्योऽप्याह—

हु दानादनयोः। दानादानयोरित्यन्ये। आत्रेयस्तु हु दाने इति पठित्वा आदाने चेत्येके इति ···इह दाने चोदिताधारे त्यक्तहविःप्रक्षेप इति···तथा च 'तृतीया च होश्छन्दसि' इत्यत्र भाष्ये जुहोतिः प्रक्षेपे वर्तत इत्युक्तम्। (माधवीयायां धातुवृत्तौ जुहोत्यादिप्रकरणे।)

सत्यम्। लोकैकचक्षुषो[1] हि ते। हु धातोस्तु दानम्, आदानम्, अदनम्, प्रक्षेपः, प्रीणनम् इति पञ्चार्थाः न तु दानस्यैव प्रक्षेपोऽर्थः। तथा चोक्तं कविकल्पद्रुमे—

हुलि होमे अदने। होमो देवतासंप्रदानकवह्न्यधिकरणरूपवस्तुत्यागः "जुहोति घृतमग्नौ कृष्णाय होता"। प्रक्षेपेऽप्ययं "चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत्" इति रघुः। "जटाधरः सन् जुहुधीह पावकम्" इति किराते प्रीणनार्थोऽपि। (कविकल्पद्रुमः)

पातञ्जलमहाभाष्ये तु 'तृतीया च होश्छन्दसि' इति सूत्रविषयसंगतमर्थद्वयमुक्तम्। तथाहि—

जुहोतिश्चास्त्येव प्रक्षेपणे वर्तते। अस्ति प्रीणात्यर्थे वर्तते। तद्यथा तावद् यवागूशब्दात् तृतीया तदाऽग्निहोत्रशब्दो ज्योतिषि[2] वर्तते जुहोतिश्च प्रीणात्यर्थे। तद् यथा। यवाग्वाऽग्निहोत्रं जुहोति। अग्निं प्रीणाति। यदा यवागूशब्दाद् द्वितीया तदाग्निहोत्रशब्दो हविषि वर्तते जुहोतिश्च प्रक्षेपणे। तद् यथा। यवागूमग्निहोत्रं जुहोति। यद् यवागूं हविरग्नौ प्रक्षिपति।

(पातञ्जलमहा॰ २।३।३॥)

अस्यायमर्थः—जुहोतेः प्रयोगे तृतीया भवति द्वितीया च। यवाग्वा ऽग्निहोत्रं जुहोति यवागूमग्निहोत्रं जुहोति। तत्रैव योज्यम् – अग्निहोत्रशब्दस्य हविः अग्नि-

1—यथा लोके प्रसिद्धिस्तदनुसर्तार इत्यर्थः।
2—ज्योतिषि अग्नौ इत्यर्थः।

अर्थः। तत्र जुहोतेश्च प्रक्षेपः प्रीणनं चार्थः। तृतीयाप्रयोगे ऽग्निहोत्रशब्दस्य 'अग्निः' अर्थः जुहोतेश्च प्रीणनमर्थः। यवाग्वा ऽग्निहोत्रं जुहोति यवाग्वा ऽग्निं प्रीणाति। द्वितीयाप्रयोगे ऽग्निहोत्रशब्दस्य 'हविः' अर्थः जुहोतेश्च प्रक्षेपो ऽर्थः। यवागूम् अग्निहोत्रं जुहोति। यवागूं हविः प्रक्षिपतीत्यर्थः। नह्यनेन सन्दर्भेण जुहोतेरर्थान्तराणां निषेधः। भवन्ति जुहोतेः दानम् आदानम् अदनम् अप्यर्थाः। यथा ऽऽह देवराजयज्वा निघण्टुभाष्ये उदकनामसु—

हविः हु दानादनयोः "अर्चि शुचि हु सृ भिच् छदि छर्दिभ्य इसिः" (उणा० २।१०१) इति इसि प्रत्ययः। दीयते पिपासितेभ्यः, आदीयते वा जनैरुपभोगाय।

(निघण्टु १।१२॥)

अस्यायमर्थः—हविःशब्द उदकनामसु पठ्यते। जुहोतेः इसिप्रत्यये हविः शब्दः सिध्यति। हूयते दीयते पिपासितेभ्यो यद्वा हूयते आदीयते जनैरुपभोगाय इति हविः। नह्यत्र देवतोद्देश्यकस्य अग्न्यधिकरणकस्य हविषः प्रक्षेपो लभ्यते। तस्मात् सत्यमाह महर्षिः होतारम् दातारमिति।

अथ च 'अदने' इत्यर्थमभिप्रेत्य अत्तारं भक्षकं ग्रहीतारं संहर्तारम् इत्यर्थः। आदाने इत्यर्थमभिप्रेत्य आदातारम्—स्वीकर्तारम् आधारभूतम् संहर्तारम् इत्यर्थः। तत्रैवं योजना कार्या—

(यज्ञस्य) विदुषां सत्कारस्य, सत्सङ्गते, विद्यादिदानस्य, महिम्नः, विद्याविज्ञानयोगादेः, अग्निहोत्राद्यश्वमेधान्तस्य यज्ञस्य (होतारम्) दातारम्। (यज्ञस्य) जगतः (होतारम्) अत्तारं भक्षकं ग्रहीतारं संहर्तारम्। तथा चाह व्यासो वेदान्तसूत्रे—

'अत्ता चराचरग्रहणात्' (वेदान्त १।२।९॥)

अस्यायमर्थः—कठोपनिषदि पठ्यते 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः' (कठोप० १।२।२४॥) अत्र ओदनेन कश्चिदत्ता प्रतीयते स च अत्ता जीवो ऽपि संभाव्यते ऽग्निश्च। 'तयोरन्यः पिप्पलं स्वाद्वत्ति' (मुण्डकोप० ३।१।१॥) 'अग्निरन्नादः' (बृहदारण्यकोप० १।४।६॥) इति चोक्तेः न तु परमात्मा 'अनश्नन्नन्यो अभिचाकशीति' (बृहदारण्यकोप० ३।१।१॥)

इत्युक्तेः। तत्र सिद्धान्तमाह—अत्ता ऽत्र परमात्मा न तु जीवो वा ऽग्निर्वा। ब्रह्म च क्षत्रं च ओदनः। चराचरोपलक्षकमेतत्। चराचरस्य सर्वस्य जगतो ऽत्ता संहर्ता ब्रह्मैव नान्यः कश्चित् जीवो वा ऽग्निर्वा।

(यज्ञस्य) विद्वत्कृतस्य सत्कारस्य, पूजायाः—उपासनायाः, अस्मत्कृतस्य श्रेष्ठस्य च कर्मणः (होतारम्) आदातारं ग्रहीतारं स्वीकर्तारम्, (यज्ञस्य) वर्तमान-समये सर्वस्य जगतः (होतारम्) आदातारम् आधारभूतम् प्रलयकाले च सर्वस्य जगतः आदातारम् ग्रहीतारं संहर्तारम्। यज्ञस्येति षष्ठ्या विरहितस्य होतारमिति केवलस्य पदस्य (होतारम्) जगते सर्वभोग्यपदार्थानां दातारम्, मोक्षसमये प्राप्तमोक्षाणां जनानां ग्रहीतारम्। अत्रायं भावः—परेशकृपयैव विदुषां सत्कारो भवति। सत्सङ्गतेः विद्यादिदानस्य, विद्याविज्ञानयोगादेः, महिम्नश्च प्राप्तिस्तत्कृपयैव जायते। स एवाग्निहोत्राद्यश्वमेधान्तस्य यज्ञस्य कर्त्तव्यस्य च कर्मणो वेदोपदेशेनोपदेष्टा स एव भगवान् अस्मत्कृतामुपासनां श्रेष्ठं च कर्म स्वीकरोति। स एव जगतो धर्ता संहर्ता च। स एव जीवेभ्यः सर्वं वस्तु ददाति तस्यैव चानन्दे मुक्ता विचरन्ति। महर्षिभाष्यं चात्र द्रष्टव्यम्—

(होतारम्) दातारमादातारं वा

(महर्षिभाष्यम् ऋ० १।१।१॥)

(होतारम्) सर्वजगते सर्वपदार्थाना दातारम्। मोक्षसमये प्राप्तमोक्षाणां जनानामादातारं ग्रहीतारम्। वर्तमानप्रलययोः समये सर्वस्य जगत आदातारं ग्रहीतारमाधारभूतम होतारम्। "हु दानादनयोः। आदाने चेत्येके"। अस्माद् धातोरयं शब्दः सिद्धो जायते। अदनं भक्षणं न, किन्तु चराचरस्य जगतो ग्रहणं तत्कर्ता परमेश्वरो ऽत्तेत्युच्यते। अत्र प्रमाणम्। 'अत्ता चराचर-ग्रहणात्' इति वेदान्तशास्त्रस्य सूत्रम् अ० १।पा० २।सू० ६॥

(महर्षेर्विस्तृतं भाष्यम् ऋ० १।१।१॥)

यज्ञस्य होतारमिति व्याख्यातम्। पुनरग्निं परमात्मानं विशिनष्टि।

१—ग्रहीतारं स्थितिकर्तारं पालकमित्यर्थः।

(पुरोहितम्) यः पुरः–पुरस्तात्–सृष्टेः प्राक् स्थितं सर्वं जगत्=परमाण्वादिरूपं दधाति धारयतीति तं पुरोहितम्, अथ च पुरः–पुरस्तात्=सर्वदेहधारिणामुत्पत्तेः पूर्वमेव सकलपदार्थोत्पादनेन दधाति=धारयति पुष्णातीति तं पुरोहितम्, तथा पुरः–पुरस्तात्=स्वभक्तानां धर्मात्मनां भक्तेरारम्भात् पूर्वमेव विज्ञानादिदानेन चैनं जीवं दधाति धारयति पुष्णातीति तं पुरोहितम्, सर्वाधारं सर्वपोषकं चेत्यर्थः। पुरः पूर्वात् "डुधाञ् धारणपोषणयोः" अस्माद् धातोः "आदिकर्मणि निष्ठा" (पा० ३।२।१०२॥) इत्यादिकर्मणि निष्ठा "आदिकर्मणि क्तः कर्तरि च" (शब्दानु० ३।४।७१॥) इति कर्त्तरि क्तः। ब्रह्मणः कालनिरपेक्षत्वाच् छन्दसि च कालसामान्यविधित्वादादिकर्मता ज्ञेया।

ननु यत्रादिकर्मणि कर्तरि क्तस्तत्र प्रोपसर्गेणावश्यं भाव्यं यथा—प्रकृतः कटं देवदत्त इति। अनैकान्तिकमेतत्।

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते॥

(महाभाष्य ७।४।४६॥)

इत्यत्रादिकर्मणि अवदत्तादयो ऽपि दृश्यन्ते। न च—

"आदिकर्मग्रहणं प्रदत्तशब्दस्यैव संभवाद् विशेषणम्"

(कैयटः)

"आदिकर्मणीत्येतत् प्रदत्तमित्येतस्य विशेषणं नेतरेषामसंभवात्"

(हरदत्तः)

इत्युक्तिभ्यां कथमिदं संगच्छते आदिकर्मणि अवदत्तादयो ऽपि दृश्यन्त इति। उच्यते—आदिकर्मणीति सर्वेषामवदत्तादीनां विशेषणं न तु प्रदत्तमित्येतस्यैव तथा चाह न्यासकारः—

"आदिकर्मणीति च सर्वेषां विशेषणं न तु प्रदत्तमित्येतस्यैव"

(न्यासः)

अत एव "एते याताश्च सद्यस्तव वचनमितःप्राप्य युद्धाय सिद्धाः"

(नागानन्द ३।१५॥) इत्यादिकविवचनेषु 'याताः' इत्यादावादिकर्मता सिध्यति।

अस्यायमर्थः—एते सिद्धास्तवाज्ञां प्राप्य इतो मलयप्रदेशात् युद्धाय याता गन्तुं प्रवृत्ता इति। परमात्मन इयमेवादिकर्मता यथा स प्राणिसृष्ट्या सहैव सर्वपदार्थोत्पत्तिं वेदाविर्भावं च कर्तुं प्रवर्तते।

"पुरोहितः पुर एनं दधति"

(निरु० २।१२॥)

अस्यायमर्थः—अयं पुरोहितशब्दः पुरः पूर्वाद् दधातेः कर्तरि कर्मणि च सिध्यति। न च "पुर एनं दधति" इत्यनेन कर्मैवोच्यते न कर्तेति वाच्यम्। एनमित्यन्वादेशेनोभयोः कर्तृकर्मणोरुक्तत्वात्। यथा—"देवश्रुतं देवा एनं शृण्वन्ति" (निरु० २।१२॥) इत्यत्र एनमित्यन्वादेशेन कर्ता कर्म चोच्यते। देवा एनं शृण्वन्ति—देवैर्यः श्रूयत इत्यर्थः सो ऽपि देवश्रुत्, देवान् यः शृणोति श्रावयति वा सो ऽपि देवश्रुत्। तथाहि—(देवश्रुतः) या देवान् शृण्वन्ति ताः। (यजु० भा० ६।३०॥) इति स्वभाष्ये महर्षिः कर्तृनिष्पन्नतामाह। 'हे देवश्रुतौ! देवान् श्रावयत इति देवश्रुतौ' (शत० भा० ३।४।३।१४) इति स्वभाष्ये सायणो ऽपि कर्तृनिष्पन्नं देवश्रुत् शब्दमाह। अपारोवर्यविदौ दुर्गस्कन्दौ तु "देवश्रुतं देवैः श्रुतम्" इति कर्मण्येवाहतुः। अत्राह महर्षिर्भ्रान्तिनिवारणे—

वहां अन्वादेश इसी अभिप्राय में है.....'आदिकर्मणि क्तः कर्तरि' इस से आदिकर्म विषयक जो क्त प्रत्यय है वह कर्ता में सिद्ध है। (भ्रान्तिनिवारण शताब्दी संस्करण भाग २ पृष्ठ ६११)

भवन्ति हि बहवः शब्दाः कर्तृकर्मोभयनिष्पन्ना यथा—

वैश्वानरः कस्मात्। विश्वान् नरान् नयति, विश्व एनं नरा नयन्तीति वा" (निरु० ७।२१॥) तथैव यो जगदीश्वरः पुरः पुरस्तात् सर्वं जगत् दधाति सो ऽपि पुरोहितः, तमेनं सर्वे भक्ताः स्वहृदये दधति—सर्वैश्च भक्तैर्वेनयो हृदये धीयत इत्यर्थः सो ऽपि पुरोहित इति कर्तरि कर्मणि च पुरः पूर्वाद् दधातेः क्तः।

अत्रेयं नैरुक्ती व्यवस्था—यत्राभिधेयनिर्देशोत्तरं निर्वचनोक्तिस्तत्रान्वादेशो यास्केन प्रयुक्तो निर्वचनबहुत्वे वा । यथा—"ओषधिः सोमः सुनोतेः । यदेनमभिषुण्वन्ति" निरु० ११ । २ ॥ इत्यादिष्वभिधेयनिर्देशोत्तरं निर्वचने ऽन्वादेशप्रयोगः । समुद्रः कस्मात् । समुद्द्रवन्त्यस्मादापः । समभिद्रवन्त्येनमापः" (निरु० २।१०॥) "अद्रिरादृणात्येनेन । अपि वात्तेः स्यात्" (निरु० ४।४॥) इत्यादिषु निर्वचनबहुत्वे ऽन्वादेशप्रयोगः । "पुरोहितः पुर एनं दधति" (निरु० २।१२॥) "देवश्रुतं देवा एनं शृण्वन्ति" (निरु० २।१२॥) इति निरुक्ते द्वयोः प्रयोगयोर्नाभिधेयनिर्देशोत्तरं निर्वचननिर्देशः कर्तृनिर्वचनस्य चास्वीकारे न निर्वचनबहुत्वम् । ततः कर्तृकर्मोभयनिष्पन्नतयैव "एनं दधति" "एनं शृण्वन्ति" इत्यन्वादेशः संगच्छते । ननु अप्वा यदेनयाविद्धो ऽपवीयते" (निरु० ६।१२॥) "पिनाकं प्रतिपिनष्ट्येनेन" (निरु० ३।२१॥) इत्यादिनिरुक्ते नाभिधेयनिर्देशोत्तरं निर्वचनप्रयोगो न चात्र निर्वचनबहुत्वम् । अत्रोच्यते—"अप्वा" इत्यत्र "अनवगतम्" इति हि वर्तते । "पिनाकम्" इत्यत्र च "रम्भः पिनाकमिति दण्डस्य" इत्यनुवर्तते ।

महर्षिभाष्यं चात्र द्रष्टव्यम्—

(पुरोहितं) पुरस्तात् सर्वं जगद् दधाति ।

(ऋ० भा० । १ । १ । १ ॥)

(पुरोहितः) सर्वस्य जगतः स्वभक्तानां च धर्मात्मनां भक्तेरारम्भात् पूर्वमेव सकलपदार्थोत्पादनेन विज्ञानादिदानेन चैनं जीवं दधाति स पुरोहितः परमात्माऽग्निः । 'डु धाञ् धारणपोषणयोः' अस्मात् पुरः पूर्वात् क्तप्रत्ययान्तात् पुरोहितशब्दः सिध्यति । अत एव सर्वाधारकस्सर्वपोषकश्चेश्वर एव नान्यः ।

(महर्षेर्विस्तृतं भाष्यं ऋ० १ । १ । १ ॥)

पुरोहितो व्याख्यातः । पुनरग्निं परमात्मानं विशिनष्टि । (देवम्) सुखानां दातारम्, सर्वस्य जगतो द्योतकम्—प्रकाशकम्, स्वभक्तानां मोदकम्—हर्षकरम्,

शत्रूणां मनुष्याणाम्—अधर्मान्यायकारिणां कामक्रोधादीनां च विजिगीषकम्—विजयेच्छया पूर्णम्, सर्वैर्विद्वद्भिः कामनीयम्—प्रार्थनीयम् ।

"देवो दानाद् वा, दीपनाद् वा, द्योतनाद् वा, द्युस्थानो भवतीति वा"

(निरु० ७ । १५)

अस्यायमर्थः—एको देवशब्दः 'डुदाञ् दाने' इत्यस्माद् धातोरचि सिध्यति स च 'दा अ'—'दाव् अ' सन् वकारवर्णोपजनेन 'देयात्' इत्यादौ दृष्टेन आकारस्य एकारभावेन वर्णव्यापत्त्या परोक्षेण देव इत्युच्यते । ददातीति देवः । अपरश्च देवशब्दो ऽस्ति स 'दीपी दीप्तौ' इत्यस्माद् धातोरचि सिध्यति स हि 'दीप् अ'—'दीव् अ' सन् वर्णव्यापत्त्या परोक्षेण देव इत्युच्यते दीप्यते=प्रज्वलतीति देवः । अन्यश्च देवशब्दो ऽस्ति स 'द्युत दीप्तौ' इत्यस्माद् धातोरचि सिध्यति । स वै 'द्युत् अ'—द्यु अ'—'दि उ अ'—'दि व् अ' सन् वर्णलोपेन वर्णव्यापत्त्या च परोक्षेण देव इत्युच्यते । द्योतते प्रकाशत इति देवः । सन्दिहानौ दुर्गस्कन्दावाहतुः—धात्वन्यत्वमर्थैकत्वम् (दुर्गः) धात्वन्यत्वमात्रम् (स्कन्दः) तयोरयमभिप्रायो यथा दीप धातोः द्युत धातोश्चार्थैकत्वं भिन्नधातुमात्रप्रदर्शनं देवनिर्वचने निरुक्ते । तदसत्—दीप्यते ज्वलतीत्यर्थः । द्योतते प्रकाशते इत्यर्थः । ज्वलनं भौतिकाग्नौ । प्रकाशनमन्यत्रापि यथा—

"देवः प्रकाशमानः परमेश्वरः" (महर्षिभाष्यम् ऋ० २।२२।२॥)

इतरश्च देवशब्दो ऽस्ति स दिव्शब्दात् ताद्धितेन सिध्यति । तथा चाह देवराजयज्वा निघण्टुभाष्ये—

दिवः सम्बन्धिनो वा देवाः 'तस्येदम्' (शब्दानु० ४।३।१२०॥) इत्यणि वृद्ध्यभावश्छान्दसः 'द्युप्रागपागुदक्प्रतीचो यत्' (४।२।१०१) इति यत् प्रत्ययो नात्र भवति । द्युस्थाना इत्यर्थः ।

(निघण्टुभाष्यम् ५।६॥)

दिवः=द्युलोकस्यायमिति देवः । दिव् शब्दादण् । देवाः द्युलोकस्था पदार्था इत्यर्थः । तथा चाह महर्षिः—'(देवाः) चन्द्रादयो दिव्याः पदार्था इव विद्वांसः'

(ऋ० ४ । १६ । २ ॥) अथ च 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' इत्यस्माद् धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (शब्दानु० ३।१।१३४॥) इति कर्त्तर्यचि देवशब्दः सिध्यति । दीव्यतीति देवः । "सर्वैः कामनीयम्" इत्यर्थे तु "कृतो बहुलमिति वक्तव्यं पादहारकाद्यर्थम्' (महाभाष्य ३।३।११३॥) इति कर्मण्यच् दीव्यते काम्यते—प्रार्थ्यते स देवः । महर्षिभाष्यं चात्र द्रष्टव्यम् ।

(देवम्) दातारं हर्षकरं विजेतारं द्योतकं वा

(ऋ० भा० १ । १ । १ ॥)

(देवम्) दातारं सुखानाम्, द्योतकम्—सर्वस्य जगतः प्रकाशकम्, सर्वैर्विद्वद्भिः कामनीयम्, स्वभक्तानां मोदकम्-हर्षकरम्, शत्रूणां मनुष्याणां कामक्रोधादीनां वा विजिगीषकम्-विजेतुमिच्छन्तं देवम् । (महर्षेर्विस्तृतं भाष्यम् ऋ० १.१।१॥)

देवो व्याख्यातः । पुनरग्निं परमात्मानं विशिनष्टि ।

(ऋत्विजम्) य ऋतौ ऋतौ—यथाकालं=प्रतिसृष्ट्युत्पत्तिकालमित्यर्थः यजति—संसारं संगतं करोति=स्थूलसृष्टिं रचयति तमृत्विजं परमात्मानम् । "ऋत्विग्दधृक्०" (शब्दानु० ३।२।५९ ॥) इति कर्त्तरि क्विन् । सांप्रतं वसन्तादिषु प्रसिद्ध ऋतुशब्दो नियतकालवचनः । अत एव स्त्रीणां रजःपतनकालेऽपि वर्तते । (अर्तेश्च तु) उणा० १।७२॥ अनेन ऋधातोस्तु प्रत्ययः स च किद् भवति । ऋतुरर्तेर्गतिकर्मणः" निरु० २।२५॥ "ऋ गतिप्रापणयोः" इति धातुपाठे । पुनः पुनः परिवृत्य नियमेन गमनमिह गतिशब्दार्थः । ऋच्छति पुनः पुनः परिवृत्य नियतकालेनागच्छति स ऋतुः । वसन्तादिर्वा रजःपतनकालादिर्वा सृष्ट्युत्पत्तिर्वा । आर्यो ऽप्येतस्मादेव पुनः पुनः परिवृत्य नियतगतिकर्मण ऋधातोः । आर्यो हि पुनः पुनः परिवृत्य जन्मान्तराद् वा मोक्षाद् वा नियमितसमय आगच्छति नियमिताचारवांश्च भवति । ऋतमित्युदकनामाप्येतस्मादेव । उदकं हि स्वतो निम्नं प्रदेशमेव गच्छति । प्रतिनियता हि तस्य गतिः "ऋतमित्युदकनाम प्रत्यृतं भवति"

(निरु० २।२५॥) अत एव महर्षिः पञ्चमहायज्ञविधिभाष्ये "ऋतं च सत्यं च०" (ऋ० अ० ८, अ०८, व० ४८, म० १) मन्त्रव्याख्याने ऋतं वेदशास्त्रमाह। वेदोऽपि प्रतिसृष्ट्युत्पत्तिसमये पुनः पुनः परिवृत्य स एव नियमेनागच्छति, नियमानां मर्यादानामाधारः सर्वविद्याधिकरणम् । सर्वो हि नियतकालः ऋतुशब्देनोच्यत इति ज्ञेयम् । "ऋतौ ऋतौ यष्टारमित्यृत्विजम् । यो यो यागकालस्तत्र यष्टारमित्यर्थः" इति स्कन्दः । "स्वे स्वे काले देवानां यष्टारम्" इति वेङ्कटः। तथा सति "ऋतौ ऋतौ प्रत्युत्पत्तिकालम्" इति भाष्योक्तिः संगच्छते। सृष्टेः उत्पत्तिप्रलयावपि नियतौ । अत्र ऋतुशब्दः सृष्ट्युत्पत्तिवचनः ।

अथवा सर्वेषु ऋतुषु यजनीयं पूजार्हम् । (कृतो बहुलमिति वक्तव्यं पाद-हारकाद्यर्थम्) महाभाष्य ३।३।११३॥ इति कर्मणि क्विन् । अत्र महर्षिभाष्ये महर्षे-रार्यभाषाभाष्यमपलपन्तः महर्षिभाष्यस्य स्वयमार्यभाषाकर्तारः केचिदाहुः । ऋतुषु ऋतुषु यजनीयमिति भौताग्निमेवाहुः । तदसत् । ऋतुषु ऋतुषु यजनीयमिति तु आध्यात्मिकार्थे एव संगच्छते । "यजनीयं पूजार्हम्" इति प्रथमे भाष्ये आध्या-त्मिकार्थे व्याख्यानात् । द्वितीयभाष्ये ऽपि आर्यभाषायाम् "ऋतु ऋतु में उपासना करने योग्य" इति दर्शनात् । नहि भौतिकाग्नेः पूजामुपासनां वा ऽऽर्याः कुर्वते । भौतिकाग्निपरार्थे तु प्रथमे भाष्ये द्वितीयभाष्ये चाप्यदर्शनात् ।

अथवा ऋत्विग्वद् वर्तमानम्, यथा ऋत्विग् अग्निहोत्राद्यश्वमेधान्तं यज्ञं संपादयति तथैव परमेश्वरो ऽपि ज्ञानादियज्ञसाधनं संपादयति । ज्ञानादियज्ञ-साधकमृत्विजम्" इति प्रथमे भाष्ये दृश्यते । साध्यवसाना गौणी सादृश्यलक्षणा लुप्तोपमा वा ऽत्र द्रष्टव्या । ज्ञानयज्ञादिवर्णनं च महाभारते भीष्मपर्वान्तर्गते भगवद्-गीतापर्वणि द्रष्टव्यम् । तथाहि—

> द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे
> स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ (गीता ४।२८॥)
> श्रेयान् द्रव्यमयाद् यज्ञाज् ज्ञानयज्ञः परंतपः ।
> सर्वकर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ (गीता ४।३३॥)

महर्षिभाष्यं चात्र द्रष्टव्यम्—

(ऋत्विजम्) य ऋतौ ऋतौ प्रत्युत्पत्तिकालं संसारं संगतं यजति करोति ...... ऋतुषु ऋतुषु यजनीयस्तम् ।

(ऋत्विजम्) बारंबार उत्पत्ति के समय में स्थूल सृष्टि के रचनेवाले तथा ऋतु ऋतु में उपासना करने योग्य ।

(महर्षेर्भाष्ये पदार्थान्वयभाषा ऋ० १।१।१॥)

(ऋत्विजम्) ..... सर्वेषु ऋतुषु यजनीयं पूजार्हं यथाकालं च जगद्रचकं ज्ञानादियज्ञसाधनमृत्विजम् ।

(महर्षेर्विस्तृतं भाष्यमाध्यात्मिकार्थे ऋ० १।१।१॥)

(ऋत्विजम्) जो सब ऋतुओं में पूजने योग्य है,[1] जो सब जगत् का रचनेवाला और ज्ञानादि यज्ञ की सिद्धि करानेवाला है इससे ईश्वर का नाम ऋत्विज् है। (महर्षेर्विस्तृतं भाष्यम् आर्यभाषा आध्यात्मिकार्थे ऋ० १।१।१॥)

ऋत्विग् व्याख्यातः ।

पुनरग्निं परमात्मानं विशिनष्टि—

(रत्नधातमम्) रमन्ते जनानां मनांसि येषु तानि रत्नानि । अधिकारिभेदात् प्रकृत्यादिपृथिव्यन्तानि ज्ञानहीरकसुवर्णादीनि च । (रमेस्त) इति खु धातोर्नप्रत्ययः धातोर्मकारस्य तकारश्चान्तदेशः । तानि रत्नानि जीवेभ्यो दानार्थं दधातीति रत्नधा तानि वा रत्नानि जीवेभ्यो दधाति धापयतीति रत्नधाः । अन्तर्भावितण्यर्थः । ददातीति । अतिशयेन रत्नधा इति रत्नधातमस्तं रत्नधातमम् । रत्नोपपदाद् दधातेः क्विप् । ततस्तमप् । "रत्नधातमं रमणीयानां धनानां दातृतमम्" (निरु० ७।१५॥) "यो रत्नधा वसुविद्यः सुदत्रः इति यो धनानां दाता" (शत० १४।२।१।१५॥)

महर्षिभाष्यं चात्र द्रष्टव्यम्—

(रत्नधातमम्) रमणीयानि पृथिव्यादीनि सुवर्णादीनि च

१—नहि विशिष्टो वर्षो मासो पक्षो दिनं तिथिर्वा तस्योपासनार्थे विहितः । सर्वदैव तस्योपासना कर्तव्येति ।

रत्नानि दधाति धापयतीति रत्नधाः, अतिशयेन रत्नधा इति रत्नधातमस्तम् ।

(ऋ० भा० १ । १ । १ ॥)

(रत्नधातमम्) रत्नानि सर्वैर्जनै रमणीयानि प्रकृत्यादि-पृथिव्यन्तानि ज्ञानहीरकसुवर्णादीनि च जीवेभ्यो दानार्थं दधातीति रत्नधाः । अतिशयेन रत्नधाः स रत्नधातमस्तं रत्नधातमम् । रत्नोपपदाद् डुधाञ् धातोस्तमबन्तः प्रयोगः ।

(महर्षेर्विस्तृतं भाष्यम् ऋ० १ । १ । १ ॥)

'यज्ञस्य' इति षष्ठ्याः 'देवम्' इत्यनेन 'पुरोहितम्' इत्यनेन चाप्यन्वयः । (यज्ञस्य देवम्) विद्वत्सत्कारादेः देवं दातारम्, अग्निहोत्राद्यश्वमेधान्तस्य यज्ञस्य देवं द्योतकं वेदेषु प्रकाशकम् । (यज्ञस्य पुरोहितम्) यज्ञस्य विद्याविज्ञानयोगादेः पुरोहितो यः पुरः एतान् दधाति तं पुरोहितम् आदिमूलमित्यर्थः। एवं सति (होतारम्) सर्वजगते सर्वपदार्थानां दातारम्, मोक्षसमये प्राप्तमोक्षाणां जनानामादातारं ग्रहीतारम्, अत्तारं च चराचरस्य जगत इत्यादि योज्यम् ।

'यज्ञस्य' इति सर्वान्वयि वा पदम् । शैषिकी चेयं षष्ठी तत आद्युदात्ततृ-न्नन्तहोतृपदप्रयोगे ऽपि 'न लोकाव्य०' (शब्दानु० २।३।६९॥) इति न षष्ठी-निषेधः । यत्त्वाह ऋग्वेदस्य सिद्धाञ्जनभाष्यकारो ऽरविन्दशिष्यः कपालिः[1]— 'यज्ञस्य पुरोहितं होतारं देवम् ऋत्विजं रत्नधातमम्' इति व्याख्यातॄणामन्वयो नावश्यको न च समीचीनः । तदसत् । "यस्य येनार्थसम्बन्धो दूरस्थो ऽपि तस्य तत्" इत्यभियुक्तोक्तेः । महर्षिभाष्यं चात्र द्रष्टव्यम्—

'यज्ञस्य पुरोहितम्' इत्यन्वये ।
'यज्ञस्य होतारम्' इति पदार्थान्वयभाषायाम् ।
'यज्ञस्य देवम्' इति विस्तृते भाष्ये ।

[यज्ञस्य] यह शैषिकी षष्ठी है । पुरोहित देव ऋत्विज् होता और रत्नधातम ये सब यज्ञ के सम्बन्धी हैं और अग्नि के विशेषण हैं ।

(भ्रान्तिनिवारणम् श० सं० भा० २ पृ० ११२)

इति प्रथम आध्यात्मिको ऽर्थः ।

1—अनामनिर्देशं कपालिर्महर्षिमाक्षिपति ।

आर्यभाषा

ऋग्वेद के प्रथम सूक्त में ६ ऋचाएं हैं। इस सूक्त का मधुच्छन्दा ऋषि[1] है। अग्नि देवता[2] है। गायत्री छन्द[3] है। और षड्ज स्वर[4] है।

इस प्रथम सूक्त के पहिले मन्त्र में परमात्मा ने अग्नि शब्द के द्वारा स्वयं अपना और भौतिकाग्नि का उपदेश किया है। इन दोनों अर्थों को महर्षि ने अपने भाष्य में दिखाया है। अन्य अर्थों का भी भगवान् ने उपदेश इस मन्त्र में किया है क्योंकि मन्त्रों के अनेक अर्थ होते हैं पर उन अन्य अर्थों को ऋषि लोग ही बता सकते हैं। उपलक्षणमात्र दो अर्थ यहां दिखाये जाते हैं। प्रथम ईश्वर परक अर्थ की व्याख्या की जाती है।

संगति— जिस प्रकार माता पिता और गुरुजन अपने पुत्र और शिष्य को स्वयं सिखाते हैं कि हे पुत्र! या हे शिष्य! तू हम को प्रणाम किया कर और इस प्रकार बोला करो कि "पिताजी नमस्ते" "माताजी नमस्ते" "गुरुजी नमस्ते"। जो वाक्य पुत्र या शिष्य को बोलने चाहिये उन वाक्यों को माता पिता और गुरुलोग पहिले स्वयं बोलकर सिखाते हैं इसी प्रकार माता पिता और गुरुजनों के समान कृपा करने वाला परमात्मा उपदेश करता है कि—

१—जिस २ मन्त्रार्थ का दर्शन जिस २ ऋषि को हुआ और प्रथम ही जिस के पहले उस मन्त्र का अर्थ किसी ने प्रकाशित नहीं किया था किया और दूसरों को पढ़ाया भी इसलिये अद्यावधि उस २ मन्त्र के साथ ऋषि का नाम स्मरणार्थ लिखा आता है।
(सत्यार्थ० ७ समु० शता० सं० भाग १ पृष्ठ ३१८)

२—जिस २ मन्त्र का जो २ अर्थ होता है वही उस का देवता कहाता है।
(ऋग्वेदादिभा० प्रश्नोत्तरविषय शता० सं० भाग २ पृष्ठ ६११)

३—मन्त्र में कितने अक्षर हैं इत्यादि बातों के ज्ञान के लिए प्रत्येक मन्त्र के छन्द का नाम लिखा जाता है। जैसे 'अग्निमीळे०' इस मन्त्र में आठ आठ अक्षर के तीन पाद अर्थात् २४ अक्षर वाली त्रिपदा गायत्री इस मन्त्र का छन्द है।

४—कौन २ सा छन्द किस २ स्वर में गाना चाहिये इस बात को बताने के लिये छन्द के साथ में षड्ज आदि स्वर लिखे जाते हैं जैसे गायत्री छन्द वाले मन्त्रों को षड्ज स्वर में गाना चाहिये।
(ऋग्वेदादिभा० प्रश्नोत्तरविषय शता० सं० भाग २ पृष्ठ ६११)

(१) गायत्री, (२) उष्णिक्, (३) अनुष्टुप्, (४) बृहती, (५) पङ्क्ति, (६) त्रिष्टुप्, (७) जगती ये सात छन्द हैं इनके क्रम से (१) षड्ज, (२) ऋषभ, (३) गान्धार, (४) मध्यम, (५) पञ्चम, (६) धैवत, (७) निषाद ये सात स्वर हैं। इसी प्रकार अतिजगती आदि अन्य सात छन्दों के भी क्रम से ये ही सात स्वर हैं ऐसे ही आगे भी।

हे मनुष्य देहधारी जीव! तू अपने ही कल्याण के लिये इस प्रकार बोला कर कि-

ओ३म् अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्
होतारं रत्नधातमम् ॥

पदपाठः— अग्निम् । ईळे । पुरःऽहितम् । यज्ञस्य । देवम् । ऋत्विजम् । होतारम् । रत्नऽधातमम्[1] ।

मन्त्रव्याख्या

मैं स्तुति और प्रार्थना करने वाला उपासक (अग्निम् + ईडे) परमात्मा की स्तुति और प्रार्थना करता हूँ । अर्थात् हे भगवन्! हम लोग आप की स्तुति करते हैं और आप से प्रार्थना करते हैं ।

ईडे पद की व्याख्या

यह 'ईडे' पद ईड धातु के लट् लकार उत्तम पुरुष एक वचन का रूप है । पर महर्षि ने आर्यभाषा में बहुवचन में अर्थ किया है—

हम लोग (ईडे) स्तुति करते हैं ।

(आर्यभाषा पदार्थ०[2] ऋ० १।१।१॥)

क्योंकि वेद की स्तुति और प्रार्थना प्रायः सर्वत्र बहुवचन में हैं ।

जैसे—

'धियो यो नः प्रचोदयात्'　　(यजु० ३६।३॥)

१—मन्त्रपाठ और पदपाठ में जो स्वरचिह्न पृथक् पृथक् लगाये जाते हैं उनका भेद हमारी वैदिक-स्वरपद्धतिमीमांसा में देखो ।

२—महर्षि के वेदभाष्य में आर्यभाषा में पदार्थ और भावार्थ हैं । पदार्थ का पूरा शब्द पदार्थान्वय भाषा है जैसा प्रथम मन्त्र की आर्यभाषा में छपा है आगे सर्वत्र 'पदार्थ' इतना ही संकेत है आगे भी सर्वत्र पदार्थान्वयभाषा ही समझना चाहिये । अर्थात् यह आर्यभाषा का पदार्थ संस्कृत पदार्थ का अनुवाद नहीं है प्रत्युत अन्वय का आर्यभाषानुवाद है हां इस में संस्कृतपदार्थ से सहायता लीगई है अतः इसका नाम पदार्थान्वयभाषा है । अतः आर्यभाषा के पदार्थ को अन्वय से मिलाना चाहिये न कि संस्कृतपदार्थ से । संस्कृत-पदार्थ का पूरा आर्यभाषानुवाद महर्षिभाष्य में नहीं है । आर्यभाषा पदार्थ का क्रम भी अन्वय के क्रम से इसीलिये है संस्कृतपदार्थ के क्रम से नहीं ।

(यः) जो पूर्वोक्त सविता देव परमेश्वर है, वह (नः) हमारी (धियः) बुद्धियों को (प्रचोदयात्) कृपा करके सब बुरे कामों से अलग करके सदा उत्तम कामों में प्रवृत्त करे। (पञ्चमहायज्ञविधिः)

'नमो भरन्त एमसि' (ऋ० १।१।७।।)

(वयम्) हम लोग (नमः + भरन्तः) नमस्कारादि करते हुए (उपैमसि) आपके शरण को प्राप्त होते हैं। इत्यादि प्रायः सर्वत्र बहुवचन में प्रार्थना वेद में होने से ऋषि ने बहुवचन में अर्थ किया है।

(ईड धातु के अनेक अर्थ)

धातुपाठ में ईड धातु का केवल एक अर्थ दिया है "ईड स्तुतौ" अर्थात् ईड धातु स्तुति अर्थ में है। पर कौत्सव्य[1] निघण्टु में लिखा है कि ईड धातु के अनेक अर्थ हैं। उन अनेक अर्थों की विवेचना की जाती है। निरुक्त में लिखा है कि—

अग्निमीळे ऽग्निं याचामि। ईडिरध्येषणाकर्मा पूजाकर्मा च।
(निरुक्त ७।१५।।)

अर्थात्—ईड धातु के अर्थ याचना=प्रार्थना, और अध्येषणा=पुनः पुनः इच्छा, प्रेरणा, गुणों का अन्वेषण, तथा पूजा=सत्कार। इतने अर्थ हैं। धातु पाठ में स्तुति अर्थ है ही।

निरुक्त का व्याख्याकार दुर्गाचार्य निरुक्त के ऊपर लिखे उद्धरण का अशुद्ध अर्थ इस प्रकार करता है कि—

ईडिर्धातुरध्येषणाकर्मा याच्ञाकर्मेह। अन्यत्र पूजाकर्मा।
(दुर्ग निरु० भा० ७।१५।।)

अर्थात्—ईड धातु का अध्येषणाकर्मा अर्थात् याचना अर्थ इस मन्त्र में है और पूजा अर्थ अन्यत्र है।

१—यास्क ने अपने निरुक्त में अपने से प्राचीन १२ निरुक्तकारों के नाम उद्धृत किये हैं। इन सब ने अपने अपने निघण्टु और निरुक्त दोनों बनाये थे। यास्ककृत निघण्टु और निरुक्त दोनों उपलब्ध हैं पर कौत्सव्य का निघण्टु ही उपलब्ध है जो मुद्रित है। कौत्सव्य का निरुक्त अनुपलब्ध है। अन्यों के निघण्टु और निरुक्त दोनों अनुपलब्ध हैं। वेद भाष्यकार शाकपूणि के निरुक्त का उद्धरण देते हैं इस से अनुमान होता है कि शाकपूणि का निरुक्त पिछली शताब्दियों में वर्ता जाता रहा है उसके मिलने की संभावना है।

अर्थात् दुर्गाचार्य यह समझता है कि अध्येषणा शब्द का ही अर्थ याचना है। अध्येषणा और याचना पृथक् पृथक् अर्थ नहीं है। यह उसकी भूल है क्योंकि निघण्टु में १७ धातु अध्येषणा अर्थ में लिखी हैं और ४ धातु याचना अर्थ में बताई है—

१—ईमहे, २—यामि, ३—मन्महे, ४—दद्धि, ५—शग्धि, ६—पूर्धि, ७—मिमिड्ढि, ८—मिमीहि, ९—रिरिड्ढि, १०—रिरीहि, ११—पीपरत, १२—यन्तारः, १३—यन्धि, १४—इषुध्यति, १५—मदेमहि, १६—मनामहे, १७—मायते, इति सप्तदश याच्ञाकर्माणः। (निघण्टु ३। १९ ॥)

१—परिस्रव, २—पवस्व, ३—अभ्यर्ष, ४—आशिषः, इति चत्वारो ऽध्येषणाकर्माणः। (निघण्टु ३। २१ ॥)

दुर्ग की वृत्ति का सहारा लेकर निरुक्त के आधुनिक टीकाकार राजपण्डित मुकुन्द झा आदि भी ऐसा ही समझते हैं कि अध्येषणा का ही अर्थ याचना है जैसा प० मुकुन्द झा ने अपनी टीका में लिखा है कि—

अध्येषणाकर्मा याचनार्थः। 'सनिस्त्वध्येषणा याच्ञा' इत्यमरः।
(मुकुन्द झा निरुक्त टीका ७। १५ ॥)

अर्थात्—अध्येषणा का अर्थ याचना है जैसा अमरकोष में याचना के पर्यायों में सनि। अध्येषणा। याच्ञा। शब्द दिये हैं।

आश्चर्य है कि प० मुकुन्द झा अमरकोश को भी नहीं समझते। अमरकोश का पूरा पाठ इस प्रकार है—

"सनिस्त्वध्येषणा, याच्ञा ऽभिशास्तिर्याचनार्थना"

(अमरकोष २। ३२ ॥)

इस पर अमरकोश का व्याख्याकार महेश्वर लिखता है कि—

सनिः। अध्येषणा। द्वे यद् गुर्वादेः क्वचिदर्थे प्रार्थनया नियोजनं तत्र॥ याच्ञा। अभिशास्तिः। याचना। अर्थना। चत्वारि याच्ञायाः॥
(महेश्वर अमर टीका २। ३२ ॥)

अर्थात्—गुरु आदि को प्रार्थना पूर्वक किसी कार्य में लगाने के दो पर्याय वाचक शब्द हैं। सनि और अध्येषणा। और याचना के चार शब्द पर्यायवाचक हैं। याच्ञा। अभिशस्तिः। याचना। अर्थना। अर्थात् अध्येषणा और याचना दो पृथक् पृथक् अर्थ

हैं। इसीलिये शब्दानुशासनशास्त्र[1] अर्थात् पाणिनिकृत अष्टाध्यायी में--

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्

(शब्दानु० ३।३।१६१॥)

अर्थात्—विधि, निमन्त्रण, आमन्त्रण, अधीष्ट संप्रश्न और प्रार्थना इन अर्थों में लिङ् लकार हैं। यहां भी अधीष्ट और प्रार्थना पृथक् पृथक् निर्दिष्ट हैं। अधीष्ट का अर्थ अध्येषणा ही है।

निरुक्त का दूसरा टीकाकार स्कन्द दुर्ग की इस भूल को समझता था अतः निरुक्त के उपर्युक्त उस उद्धरण की व्याख्या वह इस प्रकार करता है—

ईड स्तुतौ। याच्ञायां वा। यद्वाध्येषणायाम्।

(स्कन्द निरुक्त टीका ७।१५॥)

अर्थात्--ईड धातु के तीन अर्थ हैं। स्तुति। याच्ञा। अध्येषणा।

सायणाचार्य भी अपने ऋग्वेदभाष्य में निरुक्त के उस उद्धरण की व्याख्या इस प्रकार करता है कि--

धातूनामनेकार्थत्वमिति न्यायमाश्रित्य याच्ञा, अध्येषणा, पूजा अप्यत्रोचितत्वात् तदर्थतया व्याख्याताः।

(सायण ऋ० भा० १।१।१॥)

अर्थात्—यद्यपि धातुपाठ में ईड धातु का केवल एक अर्थ स्तुति ही लिखा है पर धातुओं के अनेक अर्थ होते हैं इस न्याय का आश्रय लेकर यास्क ने याच्ञा, अध्येषणा और पूजा अर्थ भी ईड धातु के दिखाये हैं।

इस प्रकार ईड धातु के चार अर्थ हैं १—स्तुति। २--प्रार्थना। ३--अध्येषणा। ४--पूजा। अध्येषणा शब्द के भी तीन अर्थ हैं। (१)--पुनः पुनः अर्थात् अत्यन्त इच्छा। २--प्रेरणा। ३-गुणों का अन्वेषण। अतः ईड धातु के ६ अर्थ निष्पन्न हुए।

१—पाणिनि ने अपने अष्टाध्यायी ग्रन्थ का नाम "शब्दानुशासन" रखा है। इसी लिये अष्टाध्यायी का प्रथम सूत्र "अथ शब्दानुशासनम्" है। अइउण्। ऋलृक्। आदि १४ सूत्र पाणिनि ने महेश्वर व्याकरण के जैसे के तैसे रख दिये हैं। 'वृद्धिरादैच्' से अपने सूत्र बनाये हैं अतः अपनी रचना में मङ्गलवाचक वृद्धि शब्द विधेय होने पर भी प्रथम लिखा है। पाणिनि ने अष्टाध्यायी में आगे भी "परः संनिकर्षः संहिता" आदि सूत्र प्रातिशाख्यों से जैसे के तैसे उद्धृत कर दिये हैं।

१—स्तुति=गुणों का वर्णन करना। २—याच्ञा=प्रार्थना करना। ३—अध्येषणा=अत्यन्त इच्छा। ४—अध्येषणा=प्रेरणा। ५—अध्येषणा=गुणों का अन्वेषण। ६—पूजा।

अभिप्राय यह है कि—१-हम लोग परमात्मा की स्तुति करते हैं अर्थात् परमात्मा के गुणों का वर्णन करते हैं। २-परमात्मा से प्रार्थना करते हैं। ३-परमात्मा की अत्यन्त इच्छा करते हैं कि वह हमें प्राप्त होजावे। ४-परमात्मा के गुणों का अन्वेषण करते हैं अर्थात् हमें इस बात की खोज करनी चाहिये कि परमात्मा में क्या क्या गुण हैं। ५-परमात्मा का पूजन करते हैं—सत्कार करते हैं या परमात्मा की उपासना करते हैं। ये ५ अर्थ ईश्वरपरक अर्थ में संगत हैं। छुटा प्रेरणा अर्थ भौतिकाग्नि अर्थ में उपयुक्त होगा। भौतिकाग्नि अर्थ में प्रार्थना और पूजा ये दो अर्थ संगत नहीं होंगे शेष चार अर्थ भौतिकाग्नि में भी हैं। जैसे—

१-हम लोग भौतिकाग्नि के गुणों का वर्णन करते हैं यही भौतिकाग्नि की स्तुति है। २-तथा उपकार के लिए भौतिकाग्नि की इच्छा करते हैं। ३-भौतिकाग्नि को यानादि में प्रेरित करते हैं। ४-भौतिकाग्नि के गुणों का अन्वेषण करते हैं। 'अध्येषणा' शब्द की विस्तृत व्याख्या भौतिकाग्नि अर्थ में की जावेगी।

('ईडे' पद के प्रार्थना अर्थ का रहस्य)

प्रश्न—यह बात सत्य है कि ईड धातु का अर्थ प्रार्थना भी है परन्तु 'अग्निमीळे०' इस मन्त्र में केवल परमात्मा की स्तुति है किसी वस्तु की प्रार्थना इस मन्त्र में परमात्मा से नहीं की है अतः 'ईड' धातु का प्रार्थना अर्थ होने पर भी यहां असंगत है।

उत्तर=क्योंकि इस मन्त्र में कोई प्रार्थना नहीं है इसी भय से वेदों के भाष्यकार स्कन्द, वेङ्कटमाधव, सायण आदि तथा श्री अरविन्द जी और उनके शिष्य सिद्धाञ्जन-भाष्यकार श्री कपालि इसी प्रकार पाश्चात्य विद्वान् विलसन आदि ने इस मन्त्र की व्याख्या करते हुए प्रार्थना अर्थ छोड़ दिया। ईडे = Adore (अरविन्द) ईडे = Glorify (विलसन)

परन्तु महर्षि यह समझते हैं कि प्रत्येक स्तुति में प्रार्थना और प्रत्येक प्रार्थना में स्तुति अन्तर्हित रहती है। जैसा शौनक ने बृहद्देवता में लिखा है।

> स्तुवन्तं वेद सर्वो ऽयमर्थयत्येष मामिति।
> स्तौत्यर्थं ब्रुवन्तं च सार्थं मामेव पश्यति ॥९॥
> स्तुवद्भिर्वा ब्रुवद्भिर्वा ऋषिभिस्तत्त्वदर्शिभिः।
> भवत्युभयमेवोक्तमुभयं ह्यर्थतः समम् ॥१०॥
>
> (बृहद्देवता १।९—१० ॥)

अर्थ—स्तुति करने वाले को प्रत्येक व्यक्ति समझता है कि यह कुछ मुझ से मांगना चाहता है इस लिये मेरी स्तुति कर रहा है। इसी प्रकार मांगने वाले को भी सब समझते हैं कि यह इस लिये मुझसे मांग रहा है क्योंकि यह जानता है कि मेरे पास यह है इस पदार्थ से मैं संपन्न हूँ यही स्तुति है। अतः किसी मन्त्र में चाहे केवल स्तुति हो चाहे केवल प्रार्थना पर अर्थतः दोनों बातें मन्त्र में समझनी चाहिये। स्तुति में प्रार्थना और प्रार्थना में स्तुति अन्तर्हित रहती है। अभिप्राय यह है कि फलतः स्तुति हो या प्रार्थना दोनों एक ही बात हैं।

इसका प्रकार यह है कि यदि उपासक स्तुति करता है कि "मैं ज्ञानस्वरूप परमात्मा की स्तुति करता हूं" इसमें यह प्रार्थना स्वतः आजाती है कि "हे परमात्मन् मुझे ज्ञानवान् बनाइए" इसी लिए कहा जाता है कि—

ओं तेजो ऽसि तेजो मयि धेहि वीर्यमसि वीर्यं मयि धेहि बलमसि बलं मयि धेहि ओजो ऽस्योजो मयि धेहि मन्युरसि मन्युं मयि धेहि सहो ऽसि सहो मयि धेहि ॥

(यजु० १९। ९॥)

इत्यादि मन्त्रों में यही धारणा निहित है कि भगवान् के जिस रूप का ध्यान किया जाता है उसमें यही प्रार्थना निहित है कि ऐसा मुझे हे नाथ! बनादो।

(परस्मैपद आत्मनेपद के प्रयोग)

संस्कृत भाषा में जो धातुएं परस्मैपदी और आत्मनेपदी दोनों प्रकार की हैं उनकी व्यवस्था यह है कि यदि वह काम अपने लिए किया जाता है तो आत्मनेपद का रूप बोला जाता है और यदि वह काम दूसरे के लिए किया जाता है तो परस्मैपद का रूप उस धातु का बोला जाता है। जैसे—'अहं पचामि' परस्मैपद का रूप है और 'अहं पचे' आत्मनेपद का रूप है। अहं पचामि का अर्थ है कि मैं भोजन दूसरे के लिए पका रहा हूं अर्थात् रसोइया हूं और 'अहं पचे' का अर्थ है कि मैं अपने खाने के लिए खाना पका रहा हूँ। इस प्रकार 'अहं यजामि' (परस्मैपदी रूप) का अर्थ है कि मैं पुरोहित यजमान के लिए यज्ञ कर रहा हूं और 'अहं यजे' (आत्मनेपदी रूप) का अर्थ है कि मैं अपना दैनिक आदि यज्ञ कर रहा हूं।

(स्तुवे याचे)

'ईडे' पद के भाष्य में महर्षि ने 'स्तुवे' 'याचे' ये दोनों आत्मनेपद के रूप इसलिए दिए हैं क्योंकि परमात्मा की स्तुति और प्रार्थना अपने लिए हो सकती है। दूसरे के लिए स्तुति प्रार्थना दूसरा नहीं कर सकता यदि दूसरे के कर्म का फल दूसरे को मिलने लगे तो कर्मों के भोग में गड़बड़ होजावे। ऐसा सांख्य दर्शन १। १७॥ में लिखा है।

यद्यपि महर्षि के ऋ० भा० ४।३३।१॥ और यजु० भा० ७।३॥ में 'ईळे स्तौमि' यह परस्मैपद का प्रयोग "स्तौमि" भी है पर वहां विद्वान् की प्रशंसा का वर्णन उन मन्त्रों में है परमात्मा की स्तुति नहीं। इसी प्रकार निरुक्त ७।१५॥ में भी 'अग्निमीळे ऽग्निं याचामि' ऐसा परस्मैपद रूप से भाष्य है पर निरुक्त का प्रधान विषय आधिदैवत है आध्यात्मिक नहीं। फिर भी कहीं कहीं सामान्य रूप से दोनों पदों का प्रयोग देखने में आता है।

प्रश्न—महर्षि के ऋग्वेदभाष्य आर्यभाषा पदार्थ में तो केवल "स्तुति करते हैं" इतना ही है "प्रार्थना करते हैं" यह नहीं है।

उत्तर—आर्यभाषाभाष्य में पूरा अर्थ नहीं है वहां तो महर्षि ने अभिप्रायमात्र ही दिखाया है जैसा महर्षि ने स्वयं लिखा है कि—

"भाषा में संस्कृत का अभिप्रायमात्र लिखा है"

(भ्रान्तिनिवारण शताब्दीसंस्करण भाग २ पृष्ठ ८७६)

कुछ लोग महर्षि के भाष्य की व्याख्या इस प्रकार करते हैं कि—

'ईळे' पद का आध्यात्मिक अर्थ में स्तुति अर्थ है और 'इंडे' पद का अध्येषणा अर्थ भौतिकाग्निपरक अर्थ में करना चाहिये।

वे लोग महर्षि के भाष्य को नहीं समझते। महर्षि ने स्वयं लिखा है कि—

अध्येषणाकर्मा अर्थात् परमेश्वर और भौतिक, दूसरा पूजाकर्मा अर्थात् केवल परमेश्वर ही लिया है।

[भ्रान्तिनिवारण शता० भाग २ पृ० ८९७)

महर्षि का आर्यभाषाभाष्य इस प्रकार है—

(महर्षिभाष्यम्)

हम लोग 'ईडे' स्तुति करते हैं। ... ... 'ईडे' बारंबार इच्छा करते हैं।

(ऋ० १।१।१॥ पदार्थान्वयभाषा)

मैं उस अग्नि की स्तुति करता हूँ। उसके गुणों का अन्वेषण अर्थात् खोज करता हूँ। महर्षि का विस्तृतभाष्यभाषार्थ ऋ० १।१।१॥

(अग्नि शब्द की विस्तृत व्याख्या)

अनेक अग्नि शब्द हैं। एक अग्नि शब्द में तीन खण्ड हैं—अ (इण्) ग् (अञ्जू) नि (णीञ्)। दूसरे अग्नि शब्द में भी तीन खण्ड हैं— अ (इण्) ग् (दग्ध) नि (णीञ्)। तीसरे अग्नि शब्द में दो खण्ड हैं—अ (अक्त) नि (णीञ्)। चौथे अग्नि शब्द में भी दो खण्ड हैं—अ (नञ्) ग्नि (क्नूयी)। पांचवें अग्नि शब्द में भी दो खण्ड हैं—अग् (अग्र) नि (णीञ्)।

ये पांच शब्द होते हुए भी मिल कर आकृति एक जैसी होजाती है अतः एक शब्द जैसे प्रतीत होते हैं। इन सब के अर्थ अलग हैं। जैसे अ+ग्+नि इन तीन खण्डों वाले अग्नि शब्द का अर्थ भौतिक अग्नि (आग) है और अग्+नि इस दो खण्ड वाले अग्नि शब्द का अर्थ परमेश्वर है। जैसे अंग्रेजी भाषा में B. Sc, दो भाग रखने पर इसका अर्थ होता वैचुलर आफ साइंस। पर इसी को तीन भागों में रखने पर B. S. C. का अर्थ होता है बाटा शू कम्पनी। Ph. D, दो भागों में रखने पर इसका अर्थ होता है फिलासोफीकल डाक्टर। और इसी को तीन भागों में रखने पर P. H. D. का अर्थ होता है पबलिक हैल्थ डिपार्टमेन्ट। इस बात का विस्तृत वर्णन हम अंग्रेजी अनुवाद में करेंगे। अब दो खण्ड (अग्र+णी) वाले अग्नि शब्द की व्याख्या की जाती है।

१—यह अग्नि शब्द अग्र पूर्वक "णीञ् प्रापणे" धातु से कर्ता और कर्म दोनों व्युत्पत्तियों में सिद्ध होता है। कर्ता अर्थ में—'अग्रम् आत्मानं नयति' इत्यादि। अर्थात् जो अपने को सब से आगे रखे हुए है उससे आगे कोई नहीं अर्थात् सर्वश्रेष्ठ। इसी लिए परमात्मा के वरुण आदि नाम हैं। कर्म अर्थ में—'अग्रं प्रथमं यज्ञेषु सर्वश्रेष्ठकर्मसु प्रणीयते प्रतिपाद्यते' इत्यग्निः। अर्थात् सब श्रेष्ठ कामों में जो सब से प्रथम स्थापित किया जाता है। यह अग्नि शब्द की व्युत्पत्ति दोनों प्रकार की यास्क ने निरुक्त में की है—

अग्निः कस्मात्। अग्रणीर्भवति। अग्रं यज्ञेषु प्रणीयते।
(निरुक्त ७। १४॥)

अर्थात्—अग्नि शब्द किस धातु से और कैसे बनता है इसका उत्तर यह है कि अग्र पूर्वक णीञ् धातु से कर्ता अर्थ में अग्नि बनता है क्योंकि वह सबसे आगे है और अग्नि शब्द कर्म व्युत्पत्ति में भी बनता है क्योंकि सब भले कामों में उसकी स्थापना सर्वप्रथम होती है। उसी का स्मरण सर्वप्रथम किया जाता है जैसा वेदव्यास ने महाभारत के भगवद्गीता भाग में लिखा है—

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥
(गीता १७। २४॥)

अर्थ—क्योंकि सृष्टि का आरम्भ ओ३म् से हुआ है इस लिए वेदवादियों के शास्त्रोक्त यज्ञ दान और तप रूप क्रियायें 'ओ३म्' ऐसा उच्चारण करके सदा प्रारम्भ होती हैं।

२—आनन्दतीर्थ ने अपने ऋग्वेद भाष्य में 'अग्नि' शब्द का अग्र + णी निर्वचन करके ईश्वर अर्थ किया है। संस्कृतप्रमाण देखो पृष्ठ १४२।

३—आत्मानन्द ने ऋग्वेद के अस्यवामीयसूक्त के भाष्य में अग्नि शब्द का अग्र + णी निर्वचन करके ईश्वर अर्थ किया है। संस्कृतप्रमाण के लिए पृष्ठ १४२ देखो।

४—मनुस्मृति में भी लिखा है कि—

इस पुरुष परमात्मा को कुछ लोग अग्नि नाम से कहते हैं। अन्य लोग उसका नाम प्रजापति कहते हैं। कुछ एक उसका इन्द्र नाम कहते हैं तथा बहुत लोग उसको ब्रह्म कहते हैं। संस्कृत प्रमाण पृष्ठ १४२ पर देखो।

५—ब्राह्मणग्रन्थों में भी अग्नि शब्द का अर्थ ब्रह्म किया है। संस्कृतप्रमाण पृष्ठ १४२ पर हैं।

६—कल्पकार ने भी लिखा है कि—

इन्द्र आदि शब्द परमैश्वर्य आदि गुण के सम्बन्ध से अथवा कहो व्याकरणकृत व्युत्पत्ति के कारण परमात्मा के वाचक हैं। विद्वान् लोग उस एक परमात्मा को बहुत प्रकार से कहते हैं विज्ञ लोग बताते हैं कि नाना नाम वाला वह ब्रह्म एक है। संस्कृत-प्रमाण पृष्ठ १४२ पर देखने चाहिए।

७—उपनिषत्कारों ने भी अग्नि शब्द का अर्थ ईश्वर किया है। संस्कृतप्रमाण पृष्ठ १४२ पर उद्धृत हैं।

८—बहुत से अन्य प्रमाणों को क्यों कहें। अग्नि शब्द का अर्थ ईश्वर है इसमें वेद स्वयं प्रमाण है **'इन्द्रं मित्रं'** इत्यादि। इस ऋचा का अर्थ बहुत गूढ है। इस ऋचा की व्याख्या प्रायः सब भाष्यकारों ने अशुद्ध की है और कोई इस ऋचा को समझ न सकता अतः इस ऋचा की व्याख्या विस्तार से की जाती है।

ओ३म्। इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥

(ऋ० १। १६४। ४६॥)

इन्द्रम् । मित्रम् । वरुणम् । अग्निम् । आहुः । अथो इति । दिव्यः । सः । सु ऽपर्णः । गरुत्मान् । एकम् । सत् । विप्राः । बहुधा । वदन्ति । अग्निम् । यमम् । मातरिश्वानम् । आहुः ।

इस मन्त्र में तीन बातों का वर्णन परमात्मा ने किया है अतः इस मन्त्र में तीन क्रिया पद हैं । १–आहुः । २–वदन्ति । ३–आहुः । नीचे लिखे प्रकार इस ऋचा में तीन वाक्य बनते हैं ।

(१) इन्द्रं मित्रं वरुणं अथो दिव्यः स सुपर्णः गरुत्मान् (तं च)— अग्निम् आहुः ।

(२) विप्राः एकं सत् बहुधा वदन्ति ।

(३) अग्निम्—यमम् मातरिश्वानम् आहुः ।

(प्रथम वाक्य का अर्थ)

(इन्द्रम् मित्रम् वरुणम्) इन्द्र मित्र और वरुण को (अथो) तथा (सः) वह (दिव्यः) प्रकाशमय (सुपर्णः) सुन्दर जिसके पालनादि कर्म हैं और (गरुत्मान्) महान् स्वरूप वाला [जो सूर्य है उसको] (अग्निम् आहुः) अग्नि इस नाम से कहते हैं । इन्द्र मित्र वरुण और सूर्य को 'अग्नि' इस नाम से कहते हैं । अर्थात् अग्नि शब्द इन्द्र, मित्र, वरुण, और सूर्य का वाचक है । अग्नि शब्द के इन्द्र मित्र वरुण और सूर्य अर्थ हैं । यह भी उपलक्षणमात्र है । अग्नि शब्द के अन्य भी अनेक अर्थ होते हैं । अनेक अर्थों में अग्नि शब्द आता है । इसी बात को ब्राह्मणादि ग्रन्थों में बताया है कि—

अग्निः सर्वा देवताः (ऐ० ब्रा० ६ । ३ ॥)

अर्थात्—अग्नि शब्द सब देवताओं के अर्थों में आता है । अग्नि शब्द सब देवताओं का वाचक है । इस प्रथम वाक्य का अभिप्राय यह है कि अग्नि शब्द के बहुत अर्थ हैं ।

१—प्रगृह्यसंज्ञा वाले मन्त्र के पदों में पदपाठ करते समय 'इति' यह शब्द लगाया जाता है। "अथो इति" इसी प्रकार रिफित पदों में भी पदपाठ करते समय 'इति' यह शब्द लगाया जाता है जैसे 'प्रातः' का 'प्रातरिति' 'पुनः' का 'पुनरिति' । जिन पदों में अपना र् विसर्ग होता है विभक्ति का नहीं, उन पदों को रिफित पद कहते हैं। पुनः । प्रातः । यहां 'पुरुषः' के समान विभक्ति का विसर्ग नहीं है ।

(द्वितीय वाक्य का अर्थ)

(एकम् सत्) एक अद्वितीय परम ब्रह्म को (विप्राः) मेधावी लोग (बहुधा) नाना नामों से (वदन्ति) पुकारते हैं। अर्थात् परमात्मा के अनेक नाम हैं।

(तृतीय वाक्य का अर्थ)

(अग्निम्) भौतिक अग्नि जो आग है उसको (यमम् मातरिश्वान्) यम मातरिश्वा आदि नामों से (आहुः) कहते हैं। अर्थात् भौतिक अग्नि जो आग नाम का पदार्थ है उसके भी बहुत से नाम हैं।

इस प्रकार इस मन्त्र में तीन बातें बताई गई हैं—

१—भौतिक अग्नि के बहुत नाम हैं। (तृतीय वाक्य में)

२—परमात्मा के बहुत नाम हैं। (द्वितीय वाक्य में)

३—अग्नि शब्द के बहुत अर्थ हैं। (प्रथम वाक्य में)

इस मन्त्र में अग्नि शब्द दो बार आया है।

"इन्द्रं मित्रं वरुणमग्निमाहुः"। "अग्निं यमं मातरिश्वानमाहुः"।

(प्रथम वाक्य में) प्रथम बार 'अग्नि' पद शब्द वाचक है। (तृतीय वाक्य में) दूसरी बार 'अग्नि' पद पदार्थ वाचक है। अर्थात् ये दोनों बातें पृथक् पृथक् हैं। कि १— अग्नि शब्द के बहुत अर्थ हैं। २— अग्नि पदार्थ के बहुत नाम हैं। इसी को विशेष्य और विशेषण कहते हैं। विशेष्य=पदार्थ। विशेषण=शब्द। प्रथम वाक्य में अग्नि पद शब्द वाचक होने से अग्नि पद विशेषण है और तृतीय वाक्य में पदार्थ वाचक होने से अग्नि पद विशेष्य है। महर्षि ने अपने ग्रन्थों और वेद भाष्य में अनेक स्थानों में इस मन्त्र को इस रूप में समझाया है कि—

क. तथा उस में तीन आख्यात पद होने से तीन अन्वय होते हैं

(भ्रान्तिनिवारण श० सं० भा० २ पृष्ठ ८६९)

अभिप्राय यह है कि क्योंकि इस मन्त्र में तीन आख्यात हैं इस लिये तीन अन्वय करके तीन वाक्य बनाने चाहिये। और तीन अर्थ करने चाहिये।

ख. यथा ऽग्न्यादेरिन्द्रादीनि बहूनि नामानि सन्ति तथैकस्य परमात्मनो ऽग्न्यादीनि सहस्रशो नामानि वर्तन्ते।

(महर्षि ऋग्वेदभाष्य भावार्थ १।१६४।४६।।)

अर्थात्—आग के बहुत नाम हैं (यह तृतीय वाक्य का विवरण है) आदि शब्द से इन्द्रादि पदार्थ लिए जावेंगे उन के भी बहुत नाम हैं। इन्द्र मित्र वरुण पदार्थों के अग्नि आदि बहुत नाम हैं (यह प्रथम वाक्य का विवरण है) यद्यपि प्रथम वाक्य " इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् " में इन्द्र मित्र वरुण और सूर्य पदार्थों का अग्नि नाम है यही बताया है। पर इन पदार्थों के 'अग्नि' से अतिरिक्त भी बहुत से नाम है इस बात को बताने के लिये महर्षि ने ऋग्वेद भाष्य १।१६४।४६ में अन्वय इस प्रकार किया है कि—

विप्रा इन्द्रं मित्रं वरुणमग्निमिति बहुधा ऽऽहुः ।

अर्थात्—(अ) विप्र लोग इन्द्र मित्र वरुण को अग्नि इत्यादि बहुत नामों से कहते हैं।

(इ) तथा एक परमात्मा के अग्नि आदि बहुत नाम हैं। यह महर्षि के ऋग्भाष्य भावार्थ में द्वितीय वाक्य का विवरण है।

ग. तथैवात्र मन्त्रे परमेश्वरेणाग्निशब्दो द्विरुच्चारितो विशेष्य विशेषणाभिप्रायात् । इदं सायणाचार्येण नैव बुद्धमतस्तस्य भ्रान्तिरेव जातेति वेद्यम् । निरुक्तकारेणाप्यग्निशब्दो विशेष्य-विशेषणत्वेनैव वर्णितः । तद् यथा "इममेवाग्निम्, महान्त-मेकमात्मानं बहुधा मेधाविनो वदन्तीन्द्रं मित्रं वरुणमित्यादि० निरुक्त अ० ७ खं० १८ ॥"

(ऋग्वेदादिभाष्यभूमिका श० सं० भाग २ पृष्ठ ६६०)

अर्थात्—उसीलिये परमेश्वर ने इस मन्त्र में अग्नि शब्द दो बार उच्चारण किया है एक बार विशेष्य=पदार्थ के दृष्टिकोण से अर्थात् तृतीय वाक्य में मन्त्र के अन्त में। और एक बार विशेषण=शब्द के दृष्टिकोण से अर्थात् प्रथम वाक्य में मन्त्र के आरम्भ में। इस बात को सायणाचार्य नहीं समझ सके अतः उन की भ्रान्ति ही है। निरुक्तकार यास्क ने भी इस मन्त्र की व्याख्या करते हुए निरुक्त ७। १८ ॥ में अग्नि शब्द को विशेष्य=पदार्थवाचक और विशेषण=शब्दवाचक दोनों प्रकार का माना है।

महर्षि का अभिप्राय यह है कि इस इन्द्रं मित्रं मन्त्र की जो व्याख्या मैं कर रहा हूँ यही इस मन्त्र की व्याख्या निरुक्तकार यास्क ने की है। अतः महर्षि ने निरुक्त को जिस रूप में समझा है हम निरुक्त के उस स्थल की व्याख्या भी स्पष्ट रूप से करते हैं। निरुक्त का प्रकरण इस प्रकार है।

इममेवाग्निम् महान्तं चात्मानं बहुधा मेधाविनो वदन्ति । इन्द्रं मित्रं वरुणम्—अग्निम्, दिव्यं च गरुत्मन्तम् ।

(निरुक्त ७ । १८ ॥)

अर्थात्—(इमम् एव अग्निम्) इस भौतिक आग को (मेधाविनः) मेधावी लोग (बहुधा) अनेक नामों से (वदन्ति) कहते हैं। यह वेद मन्त्र के तृतीय वाक्य 'अग्नि यमं मातरिश्वानमाहुः' की निरुक्त में व्याख्या है।

(च) और (महान्तम् आत्मानम्) महान् आत्मा परमात्मा को मेधावी लोग बहुत नामों से पुकारते हैं। यह वेदमन्त्र के द्वितीय वाक्य 'एकं सद् विप्रा बहुधा वदन्ति', की व्याख्या है।

(इन्द्रम् मित्रम् वरुणम्) इन्द्र मित्र वरुण को (च) और (दिव्यं गरुत्मन्तम्) सूर्य को (अग्निम्) अग्नि कहते हैं। अर्थात् इन्द्र मित्र वरुण और सूर्य का अग्नि नाम है। अग्नि शब्द के इन्द्र मित्र वरुण और सूर्य अर्थ हैं। यह वेद मन्त्र के प्रथम वाक्य 'इन्द्रं मित्रं वरुणमग्निमाहु—रथो दिव्यः स सुपर्णो गरुत्मान्' की व्याख्या निरुक्त में है।

निरुक्त के भाष्यकार दुर्गाचार्य आदि निरुक्त के इस प्रकरण को समझने में समर्थ नहीं हुए इस के दो कारण थे। एक तो इन सब ने एक अशुद्ध सिद्धान्त हृदय में बैठा रखा था कि अग्नि आदि जड़ पदार्थ नहीं है प्रत्युत ये भी परमात्मा के समान कोई महान् आत्मा हैं। दूसरा कारण यह था कि इन के पास निरुक्त का शुद्ध पाठ नहीं था। इन के पास जो निरुक्त के हस्तलेख थे उन का पाठ भ्रष्ट हो चुका था। निरुक्त का सही पाठ और निरुक्त के भ्रष्ठ पाठ नीचे दिये जाते हैं—

क. **इममेवाग्निं महान्तं चात्मानम्**—(निरुक्त का शुद्ध पाठ)

ख. **इममेवाग्निं महान्तमेवात्मानम्**—(यह भी शुद्ध पाठ है पर यहां एव शब्द का च अर्थ ही है)

ग. **इममेवाग्निं महान्तमेकमात्मानम्**—(यह दुर्ग और स्कन्द के पास पाठ था)

घ. **इममेवाग्निं महान्तमात्मानमेकमात्मानम्**—(यह सायण के पास पाठ था)

हमारा अनुमान है कि दुर्ग स्कन्द और सायण के पास चकार रहित निरुक्त का पाठ था। सांप्रदायिक लोगों ने अग्नि को महान् आत्मा समझ कर चकार को

अनावश्यक जान कर निकाल दिया। यदि चकार रहित निरुक्त का पाठ स्वीकार किया जावे तो 'इन्द्र मित्रम्' मन्त्र में आये तीन आख्यात पदों की संगति लग ही नहीं सकती। और यदि तीन आख्यात पदों की संगति इस प्रकार न लगाई जावे तो मन्त्र का आध्यात्मिक भी अर्थ नहीं हो सकता। निरुक्त परिशिष्ट १४ अध्याय में इस बात का वर्णन है कि यह मन्त्र आत्मा का भी वर्णन करने वाला है। विस्तृत विवेचन संस्कृत भाग पृष्ठ १५४ से १५५ तक देखो। हमें इस बात का दुःख है कि महर्षि के अनुयायी भी किसी ग्रन्थ की टीका लिखते समय यह देखने का कष्ट नहीं करते कि इस ग्रन्थ के इस स्थल का महर्षि ने क्या अर्थ किया है। यहां हम इतना ही लिखना पर्याप्त समझते हैं कि आर्यविद्वानों ने भी निरुक्त की टीका लिखते समय सबने ही यहां भूल की है।

(दुर्गकृत निरुक्त की तथा इन्द्रं मित्रं० ऋचा की अपव्याख्या)

(इन्द्रं मित्रमिति अस्यवामीया एषा) 'इन्द्रं मित्रम्' यह ऋचा अस्यवामीय सूक्त में आती है। (इन्द्रं मित्रं वरुणम् इत्येतैरभिधानैः अग्निमाहुः सतत्त्वविदः) तत्त्ववेत्ता लोग इन्द्र मित्र वरुण इन नामों से अग्नि को पुकारते हैं। (अथो अपि च) और (यो ऽयमादित्यो दिवि जायते) यह जो सूर्य द्युलोक में उत्पन्न होता है। (सुपर्णः=सुपतनः) गतिमान् (गरुत्मान्-गरणवान्=स्तुतिभिस्तद्वान्) जिसकी स्तुति की जाती है (रसानां वा गरिता आदित्यः) अथवा रसों को खींचने वाला सूर्य (अयमपि स एवाग्निरित्याहुः) यह सूर्य भी अग्नि ही है (किं बहुना) क्या बहुत कहने से (इममेवाग्निम् एकं महान्तमात्मानम्) इस ही अग्नि एक महान् आत्मा को (अनन्यत्वेन पश्यन्तः) एक ही समझते हुए (विप्रा मेधाविनः) विद्वान् (आत्मतत्त्वविदः) आत्मा के तत्त्ववेत्ता लोग (बहुधा वदन्ति) अनेक नामों से पुकारते हैं (अग्निं यमं मातरिश्वानमित्येवम् । अन्यैश्च अभिधानैः) अग्नि यम मातरिश्वा तथा अन्य नामों से भी।

(समीक्षा)

(अग्निः) न्यायमार्गे गमयिता विद्वान्। (ऋ० म० भा० १।१०७।३॥)

वेदों में एकार्थवाचक अनेक शब्द एक ही वाक्य में आते हैं इस से स्पष्ट है कि इन में से एक विशेषण है दूसरा विशेष्य जैसे—

१—सायणाचार्य को भी यज्ञवाचक दोनों शब्दों में से एक शब्द अध्वर को विशेषण मानना पड़ा है।

(अध्वरम्) हिंसारहितम् । न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति। (सायण ऋ० १।१।४)

२—"षूद क्षरणे" धातुः। लेट्। शपः श्लु। ततो धातोर्द्वित्वम्।

१—यथे॒यं पृ॑थि॒वी म॒ही दा॒धारे॒मान् वन॒स्पती॑न्। (ऋ० १०।६०।९[1])
२—अश्वं॒ न वा॒जिनं॑ हि॒षे नमो॑भिः[2] (ऋ० ७।७।१॥)
३—शुचिं॑ घृ॒तं न त॒प्तमघ्न्या॑याः स्पा॒र्हा दे॒वस्य॒ मं॒हने॑व धे॒नोः[3]।
(ऋ० ४।१।६॥)

(एक शब्द के अनेक निर्वचन)

यहां भौतिकाग्नि अर्थ में जो अग्नि शब्द के अनेक निर्वचन दिखाए हैं उन सब का अर्थ एक ही प्रकार की भौतिकाग्नि नहीं प्रत्युत नाना प्रकार की अग्नियां तथा अन्य पदार्थ एक एक निर्वचन के समझने चाहिये। जिन का विस्तृत विवेचन पदार्थप्रदीप में किया जावेगा।

(अग्नि के गुण)

महर्षि ने वेदभाष्य में अग्नि के नीचे लिखे गुण बताए हैं देखो पृष्ठ २५४।

रूप। दाह। प्रकाश। वेग। छेदन। ऊर्ध्वगामित्व=ऊपर को गति वाला होना। भास्करत्व=चमक। ये ही अग्नि के गुण वेद में बताए गए हैं—

स्व॒र्ण घ॒र्मः स्वाहा॒ः स्व॒र्णार्कः॒ स्वाहा॒ स्व॒र्ण शु॒क्रः स्वाहा॒ स्व॒र्ण ज्योति॒ः स्वाहा॒ स्व॒र्ण सूर्य॒ः स्वाहा॑। (यजु० १८।५०॥)

इस मन्त्र में अग्नि के पांच नाम बताए हैं—

१—घर्मः। २—अर्कः। ३—शुक्रः। ४—ज्योतिः। ५—सूर्यः। इस मन्त्र की यह व्याख्या शतपथ में की है—

यद्देवाह॒ स्व॒र्ण घर्मः स्वाहा॒ स्व॒र्णार्कः स्वाहेत्यस्यैवैता॒न्यग्नेर्ना॑मानि। (शत० ब्रा० ९।४।२।२५॥)

१—यहां 'पृथिवी' और 'मही' दोनों शब्द भूमिवाचक हैं। अतः सायण भाष्य के दोनों हस्तलेखों में यह पाठ भी है कि—मही महती पृथिवी (सायण)। अर्थात् 'मही' शब्द का अर्थ 'महती' है।

२—यहां 'वाजी' और 'अश्व' दोनों शब्दों का अर्थ घोड़ा है पर एक को विशेषण सायण को भी बनाना पड़ा है। वाजिनं वगवन्तं वलवन्तं वा (सायण) अर्थात् यहां वाजी का अर्थ बलवान् है।

३—यहां 'अघ्न्या' और 'धेनु' दोनों शब्दों का अर्थ गौ है अतः एक शब्द को सायण ने भी विशेषण बनाया है। अघ्न्याया अहन्तव्याया (सायण) अर्थात् यहां 'अघ्न्या' का अर्थ है जो मारने योग्य नहीं है।

अर्थात्—जो यह कहा है कि 'स्वर्ण घर्मः स्वाहा स्वर्णार्कः' ये सब अग्नि के नाम हैं। इन नामों की व्याख्या इस प्रकार है—

१—घर्मः—'घृ प्रक्षरणदीप्त्योः' धातु से मक् प्रत्यय होने पर घर्म शब्द बनता है। प्रक्षरण=टपकना, दीप्तिः=प्रकाश। जिघर्ति प्रक्षरति स्वेदः शरीराद् अनेनेति घर्मः= जिसके द्वारा शरीर से पसीना निकलता है उस को घर्म कहते हैं अर्थात् आतप= गर्मी। यह दाह गुण अग्नि में है। जिघर्ति दीप्यते प्रकाशं ददाति यः स घर्मः=जो प्रकाश देता है उसको भी घर्म कहते हैं। यह प्रकाशगुण अग्नि में है।

२—अर्कः—"ऋ गतिप्रापणयोः" धातु से क प्रत्यय होने पर अर्कः शब्द बनता है जैसे कृ धातु से कर्कः बनता है। गतिः=ज्ञान गमन प्राप्ति। प्रापण=पहुंचाना। यः ऋच्छति प्रापयति सः अर्कः। यो हि गतिमान् वेगवानित्यर्थः=जो गतिमान् अर्थात् वेगवान् हो अपने वेग से स्थानान्तर पर जो पहुँचाने वाला है उस को अर्कः कहते हैं। यह वेगगुण अग्नि में है।

३—शुक्रः—शुक शब्द में र को ल होकर शुक्ल शब्द बनता है। शुक्ल=श्वेत= भास्कररूप=चमक। यह गुण अग्नि में है। ताण्ड्य महाब्राह्मण में लिखा है कि—

तस्माच्छुक्लं पवित्रं ॐ शुक्रः सोमः स शुक्लत्वाय। (ताण्ड्य० ६।६।६॥)

अर्थात्—दशापवित्र=सोम छानने का छन्ना शुक्ल होता है। सोम भी शुक्र है अर्थात् शुक्ल। शुक शब्द ही शुक्ल हो जाता है।

४—ज्योतिः—'द्युत दीप्तौ' धातु से इसिन् प्रत्यय करने पर और धातु के द को ज करने पर ज्योतिः शब्द बनता है। दीप्तिः=तेज। इसी लिये कहा है कि—

अग्निर्वा अरुषः।　　(तै० ब्रा० ३।६।४।१॥)

तेजो वा अग्निः।　　(तै० ब्रा० ३।३।४३॥)

अर्थात्—अग्नि चमकता हुआ तेज है।

५—सूर्यः—'षू प्रेरणे' धातु से "राजसूयसूर्य० (शब्दानु० १।३।११४॥) सूत्र से क्यप प्रत्यय और रुट् का आगम निपातित है। सुवति प्रेरयतीति सूर्यः= जो गति देता है उस को सूर्य कहते हैं। यह गुण अग्नि में है।

(अग्नि के रूप=कार्य)

अग्नि के आठ रूप बताये गये हैं—

तान्येतान्यष्टौ अग्निरूपाणि ।   (शत० ब्रा० ६ । १ । ३ । १८ ॥)

अर्थात्—अग्नि के आठ रूप हैं । १—रुद्रः । २—शर्वः । ३—पशुपति । ४—उग्रः । ५—अशनि । ६—भवः । ७—महान् देवः । ८—ईशानः । जिन जिन कार्यों को यह अग्नि करता है वे इस के रूप कहाते हैं जैसे—

रौद्रो वै प्रतिहर्ता ।   (गो० ब्रा० ३ । १९ ॥)

अर्थात्—यह अग्नि प्रतिहर्ता=छेदन भेदन कर्ता है । अतः महर्षि ने ठीक लिखा है कि—

भौतिकस्य रूप दाह प्रकाश वेग छेदनादिगुणत्वात् शिल्पविद्यायां मुख्यहेतुत्वाच्च प्रथमं ग्रहणं कृतम-स्तीति वेद्यम् । (ऋ० १ । १ । १ । भाष्य भावार्थः)

अर्थात्—भौतिक अग्नि में रूप दाह प्रकाश वेग छेदन आदि गुण और शिल्प विद्या के मुख्य साधक आदि हेतुओं से प्रथम मन्त्र में भौतिक अर्थ के रूप में भी ग्रहण किया गया है । क्योंकि अग्नि के विना सर्वोत्तमशिल्पविद्या का कार्य नहीं हो सकता है। अतः कहा है कि—

सोऽग्निमब्रवीत् । त्वं वै मे ज्येष्ठः पुत्राणामसि त्वं प्रथमो वृणीष्वेति ।
(जै० उ० १ । ५१ । ५६ ।)

अर्थात्—प्रजापति अग्नि से कहते हैं कि जिन जिन पदार्थों को मैंने पैदा किया है वे सब मेरे पुत्र के समान हैं उन में तू सब से ज्येष्ठ है मुख्य है ।

महर्षि ने अपने भाष्य में जो यह कहा है कि—

आर्यैर्याऽश्वविद्यानाम्ना शीघ्रगमनहेतुः शिल्पविद्या संपादितेति श्रूयते साऽग्निविद्यैवासीत् । (ऋ० १।१।१ भाष्य भावार्थ)

अर्थात्—यह जो सुना जाता है कि आर्यों ने शीघ्र गति वाली अश्वविद्या का आविष्कार किया था वह अग्निविद्या ही थी । उस का वर्णन वेद में है जैसे—

वृषो अग्निः समिध्यते ऽश्वो न देववाहनः ।
तं हविष्मन्त ईळते ॥   (ऋ० ३ । २ । १४ ॥)

अर्थ—जब शिल्पी लोगों के द्वारा (अग्निः) यह भौतिकाग्नि (समिध्यते) प्रज्व-

कलाओं द्वारा यानों में प्रदीप्त किया जाता है तब यह अग्नि (वृषा[1]+उ) बैल के समान और (अश्वः[1] न) घोड़े के समान (देववाहनः) विद्वानों को शीघ्र देशान्तर में पहुँचाने वाला होता है। (तम्) उस अग्नि को (हविष्मन्तः) देने और लाने योग्य पदार्थों से अत्यन्त युक्त[2] मनुष्य (ईडते) तत्तत्कार्यार्थ बार बार चाहते हैं।

अग्नि शब्द का भौतिकाग्नि अर्थ भी है इस सम्बन्ध में ब्राह्मण प्रमाण पृष्ठ २५७ पर देखो।

(यज्ञस्य होतारम्+यज्ञस्य देवम्)

वह भौतिकाग्नि यज्ञ का होता है और यज्ञ का देव है उसको हम बारम्बार चाहते हैं इत्यादि।

(यज्ञस्य) शिल्पविद्यादिदान के (होतारम्) देने वाले अग्नि को। (देवम्) उस के प्रकाशक अग्नि को। यज्ञ शब्द का दान अर्थ है। यह यज्ञ शब्द "यजदेवपूजासंगतिकरणदानेषु" धातु से बनता है। (यज्ञस्य) शिल्प क्रियाओं से उत्पन्न होने योग्य पदार्थों के (होतारम्) देने वाले अग्नि को और (देवम्) उन के प्रकाश करने वाले अग्नि को। यह यज्ञ शब्द—'यन्+जन्' से भी मिल कर बनता है। यन्=शिल्पक्रियां प्राप्नुवन् जातः=उत्पन्नः। अर्थात् शिल्पक्रिया को प्राप्त होता हुआ जो पैदा हुआ। शतपथ ब्राह्मण में यज्ञ शब्द की उत्पत्ति इस प्रकार बताई है कि—

स यन् जायते तस्माद् यज्ञः। यज्ञो ह वै नामैतद् यद् यज्ञः।
(शत० ३।६।४।२३॥)

अर्थात्—इण् धातु से शतृ प्रत्यय होने पर यन् बनता है यन्=प्राप्त होता हुआ जो जातः=पैदा हुआ। 'जनी प्रादुर्भावे' धातु से ड प्रत्यय होकर 'यन् जः' बना है। यन्+जः। यज न् अः=यज्ञः। (यज्ञस्य) विविधक्रियाजातस्य = अनेक प्रकार की शिल्पक्रियाओं से जो उत्पन्न होता है उस पदार्थ समूह के।

(यज्ञस्य) शिल्पविद्यादिक्रियाजन्यबोधसंगतस्य=शिल्पविद्यादिक्रियाभिः=अनेक प्रकार की शिल्पविद्यादि क्रियाओं से अर्थात् उस के अनुभवों से जन्यः=उत्पन्न जो बोध=ज्ञान उस के संगतस्य=तद्रूप संगतिकरण रूप शिल्पविद्यादिमय यज्ञ के। यह यज्ञ शब्द संगतिकरण अर्थ वाले यज धातु से भी बना है।

१—बैल की उपमा बोझा अधिक ढोने के लिए है और घोड़े की उपमा शीघ्र गति के लिए है।

२—व्यापारार्थ जब मनुष्य देशान्तर जाता है तब कुछ पदार्थ वहाँ बेच कर आता है और कुछ लेकर आता है। 'हु दानादनयोः' हु धातु देने और लेने दोनों अर्थों में है इस धातु से हवि शब्द बनता है।

(पुरोहितम्).

पुरोहित है इस को हम वारम्वार इच्छा करते है इत्यादि।

(पुरोहितम्) पुरः=पुरस्तात्=उन पदार्थों के उत्पन्न करने के समय से पूर्व भी दधाति=छेदन धारण और आकर्षण आदि गुणों के धारण करने वाले अग्नि को।

(पुरोहितम्) विमान कला कौशल क्रियाप्रचालनादिगुणम्=विमान—वायुयान, कला—गीत वाद नृत्य आदि, कौशल—शीघ्र कार्य कराना, क्रिया—चक्रादिवत् गति, प्रचालन—यानों का चलाना आदि गुण रूप (एवं शिल्पविद्यामयम्) उपर्युक्त शिल्पविद्यास्वरूप को प्रयोग से पूर्व ही धारण करने वाले अग्नि को। (पुरोहितम्) सब विद्याओं के प्रथम हेतु अग्नि को।

विमान शब्द की व्याख्या विमानशास्त्र में इस प्रकार की है कि—

विमानो वेगसाम्यादण्डजानामिति। (वि० शा० १।१॥)

(अण्डजानाम्) पक्षियों के (वेगसाम्यात्) वेग की समानता से वायुयान का नाम विमान रखा गया है। अर्थात् जो यान पक्षियों की गति को अपनी गति से तुल्य माप दे। जैसे पक्षी आकाश में उड़ता है वैसे जो यान आकाश में उड़े उस को विमान कहते हैं। वेद में भी वायुयान के उड़ने की उपमा पक्षी से दी गई है जैसे—

आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् यो मर्त्यस्य मनसो जवीयान् त्रिवन्धुरो वृषणा वातरंहाः॥

(ऋ० १।११८।१॥)

अर्थ—(वृषणौ) हे बलवान् (अश्विनौ) अश्वियों=शिल्पविद्या जानने वाले स्त्री पुरुषो (वाम्) तुम दोनों का (यः) जो (रथः) रथ (त्रिवन्धुरः[1]) जिस में सारथि के बैठने के तीन स्थान हैं नीचे ऊपर और बीच में। (श्येनपत्वा) बाज पक्षी के समान गति वाला है (वातरंहाः) वायु के समान वेग वाला (मर्त्यस्य मनसो जवीयान्) मनुष्य के मन से भी तेज गति वाला है। (सुमृडीकः) सुख से जिस में यात्रा की जा सके

१—बन्धुर=सारथि के बैठने का स्थान। यथा महाभारते—

अन्ये छत्रं वरूथं च बन्धुरं च तथाऽपरे॥
गन्धर्वा बहुसाहस्रास्तिलशो व्यधमन् रथम्॥

अर्थ—हजारों संख्या वाले गन्धर्वों ने रथ के टुकड़े टुकड़े उड़ा दिये किन्हीं ने छत्र तोड़ दिया किन्हीं ने वरूथ=छत्र के ऊपर के भाग को तोड़ दिया अन्यों ने बन्धुर=सारथि के बैठने के स्थान को नष्ट कर दिया।

है (स्ववान्) धन तथा आत्मीय जन जिस में विद्यमान हैं। वह रथ (अर्वाङ्, हमारी ओर नीचे (आ यातु) आवे।

भरद्वाजनिर्मित विमानशास्त्र के व्याख्याकार विश्वम्भर ने लिखा है कि—

देशाद् देशान्तरं तद्वद् द्वीपाद् द्वीपान्तरं तथा।
लोकाल् लोकान्तरं चापि योऽम्बरे गन्तुमर्हति।
स विमान इति प्रोक्तः खेटशास्त्रविदां वरैः ॥

अर्थ—विमान उस को कहते हैं जो एक देश से दूसरे देश को, एक द्वीप से दूसरे द्वीप को और एक लोक से दूसरे लोक को आकाश मार्ग से लेजाने में समर्थ हो। खेटशास्त्रविद्[1] =खेटशास्त्र = विमान शास्त्र जानने वालों में श्रेष्ठ आचार्यों[2] का मत है।

(ऋत्विजम्)

वह भौतिकाग्नि ऋत्विज् है उस को हम अत्यन्त चाहते हैं इत्यादि।

(ऋत्विजम्) ऋतौ ऋतौ = सब ऋतुओं में तदनुसार यजति = सर्वशिल्पसाधनानि संगमयति तम् = सब शिल्पसाधनों को जो जुटाता है उस अग्नि को। इस लिये अयोध्या को "सर्वर्तुसुखामयोध्याम्" कहा है। अयोध्या में शिल्पसाधनों के द्वारा सब ऋतुओं में सुखपूर्वक लोग रहते थे। शीत में शीत नहीं गर्मी में गर्मी नहीं इत्यादि।

(ऋत्विजम्) ऋत्विक् के समान अग्नि को। जैसे ऋत्विक् यज्ञ के समय सब यज्ञीय साधनों को जुटाता है इसी प्रकार अग्नि भी प्रत्येक ऋतु में सब शिल्पसाधनों को देता है।

(रत्नधातमम्)

वह अग्नि रत्नधातम है उस को हम चाहते हैं इत्यादि।

(रत्नधातमम्) रत्नानि = सुवर्ण आदि रत्नों को दधाति[3] = जो देता है उस को 'रत्नधा' कहते हैं और जो रत्नों को अत्यन्त देता है उस को 'रत्नधातम' कहते हैं ऐसे अग्नि को। तथा अग्निविद्या जानने वाले मनुष्यों को रत्नों से अत्यन्त पुष्ट करता है उस

१—खे = आकाश में अटति = चलता है उस को खेट = विमान कहते हैं।

२—भरद्वाज रचे विमानशास्त्र से पूर्व भी 'विमान चन्द्रिका' 'व्योमयानतन्त्र' 'यन्त्रकल्प' 'यानविन्दु' 'खेटयानप्रदीपिका' 'व्योमयानार्कप्रकाश' ग्रन्थ थे।

३—कविकल्पद्रुम में 'धा' धातु के तीन अर्थ दिये हैं १—धारण, २—पोषण, ३—दान।

अग्नि को। अथ च रत्न शब्द से रत्नविद्या का ग्रहण है उस रत्नविद्या का जो आधार[1] है उस अग्नि को।

(रत्नधातमम्) रत्न = रमण करने के जो पृथिवी आदि स्थान हैं उन को परमेश्वर धारण करता है। (आध्यात्मिक अर्थ में)

यहां पर भौतिकाग्नि परक ऋग्वेद के प्रथम मन्त्र की व्याख्या आर्यभाषा में समाप्त हुई और दोनों अर्थ करने के कारण अलंकारों पर विचार किया जाता है।

(अलङ्कार विवेचन)

महर्षि ने लिखा है कि इस मन्त्र में श्लेषालंकार है अतः आध्यात्मिक और भौतिक दोनों अर्थ इस मन्त्र के हैं।

(श्लेषालंकार का लक्षण)

जिन शब्दों के अर्थ भिन्न भिन्न हैं पर आकृति एक जैसी है वे शब्द समान उच्चारण के कारण जहां परस्पर मिले होते हैं उस को श्लेषालङ्कार कहते हैं। जैसे अग्+नि—अग्निः = परमेश्वर और अ+ग्+नि—अग्निः = भौतिक अग्नि। दोनों अग्नि शब्दों के अर्थ पृथक् पृथक् हैं पर आकृति एक जैसी है अतः "अग्निमीळे पुरोहितम्" मन्त्र में श्लेषालंकार है। अग्नि के विशेषण भी सब श्लिष्ट हैं।

यह श्लेषालंकार ९ प्रकार का है—

१—वर्णश्लेष। २—पदश्लेष। ३—लिङ्गश्लेष। ४—भाषाश्लेष। ५—प्रकृतिश्लेष। ६—प्रत्ययश्लेष। ७—विभक्तिश्लेष। ८—वचनश्लेष। ९—अभङ्गश्लेष।

इस मन्त्र में अभङ्गश्लेष अलङ्कार है। पूर्वोक्त आठ भेदों को सभंगश्लेष कहते हैं क्योंकि उन श्लेषों में पदों को भिन्न भिन्न रूप से विश्लेषण करना पड़ता है। जैसे वर्णश्लेष में—विधि सप्तमी एक वचन में विधौ और विधु सप्तमी एक वचन में भी विधौ बनता है। इ उ का श्लेष है। पर अग्निम् = परमात्मानम्। अग्निम् = भौतिकाग्निम्। यहां दोनों अग्निम् का समान रूप से निर्देश है अतः यहां अभङ्गश्लेष नामक नवम् श्लेष है। इन दोनों 'अग्निम्' में स्वरादि का भी कोई भेद नहीं है।

इस मन्त्र में अग्निम् के भी दो अर्थ हैं और 'अग्निम्' के विशेषणों के भी दो दो अर्थ हैं। जहां विशेषणों के ही दो अर्थ होते हैं पर विशेष्य के दो अर्थ नहीं होते वह

१—शुक्रनीति आदि में यह बात बताई गई है कि इस अग्नि के प्रभाव से रत्नों का निर्माण होता है।

'समासोक्ति' अलंकार होता है। और जहां विशेषण और विशेष्य दोनों श्लिष्ट दीखते हों पर प्रकरण आदि के द्वारा एक ही अर्थ हो सकता हो वहां दूसरा अर्थ अभिलामूल व्यञ्जना से होता है। इस मन्त्र में दोनों अर्थ प्राकरणिक हैं अतः यहां लब्दश्लेष अलंकार है। इस मन्त्र में आए 'अग्निम्' आदि शब्दों के पर्यायवाचक शब्द वह्नि या परमेश्वर रख देने पर अलङ्कार नहीं बन सकता। इन्हीं शब्दों के रहने पर अलंकार रह सकता है अतः यह श्लेषालङ्कार शब्दश्लेषालङ्कार है अर्थालङ्कार नहीं। संस्कृत प्रमाण पृष्ठ २६०, २६१ पर देखो।

यह अभङ्गश्लेष अर्थालङ्कार है शब्दालङ्कार नहीं। ऐसा अलङ्कार सर्वस्वकार और पण्डितराज जगन्नाथ मानते हैं। परन्तु मम्मट इस अभङ्गश्लेष को शब्दालङ्कार मानते हैं।

(अथ ऋषि-दैवत-छन्दः—स्वर-ब्राह्मण-मीमांसा)

महर्षिणा स्ववेदभाष्ये सर्वत्र सूक्तस्य ऋक्संख्या ऋषिदैवतच्छन्दांसि षड्जादयः स्वराः मन्त्रभूमिकारूपं ब्राह्मणं च प्रदर्शितानि । तथा चोक्तमन्यत्र ।

ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वराद्यपि ।
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते ॥

(अथ ऋषिमीमांसा)

अत्राह कात्यायनः सर्वानुक्रमण्याम्—
अग्निं नव मधुच्छन्दा वैश्वामित्रः । (ऋ० सर्वा०)

अस्यायमर्थः—अग्निमिति सूक्तस्य मन्त्रप्रतीकम् । नवेति ऋक्संख्या । अग्निमीळे० इति सूक्ते नव ऋचः सन्तीत्यर्थः । ऋषिश्च वैश्वामित्रो मधुच्छन्दाः । विश्वामित्रस्य गोत्रापत्यं वैश्वामित्रः । 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (शब्दानु० ४।१।११४) इति विश्वामित्रशब्दादपत्यार्थे गोत्रेऽण् । महर्षिस्तु ऋषिः मधुच्छन्दा इत्येवाह न तु वैश्वामित्रः । नवममण्डलस्य प्रथमसूक्तस्य च मधुच्छन्दा ऋषिः । अयं मधुच्छन्दा ऋषिर्द्वादशाधिकशत (११२) ऋचामर्थद्रष्टा । अतएवायं शतर्चि इत्युच्यते । तत्साहचर्यात् प्रथममण्डलस्यार्थद्रष्टारः सर्वे ऋषयः शतर्चिन इत्युच्यन्त इत्युच्यते । अत उक्तम्—

शतर्चिसंज्ञा विज्ञेया ह्याद्यमण्डलदर्शिनः ।
ददर्शादौ मधुच्छन्दा द्व्यधिकं यदृचां शतम् ॥
तत्सहाचर्यादन्येऽपि विज्ञेयास्तु शतर्चिनः ।
अच्छत्राश्छत्रिणैकेन यथा वै छत्रिणोऽभवन् ॥

अत्र द्व्यधिकं यदृचां शतमित्युक्तं तत् प्रथममण्डलाभिप्रायेण । प्रथमे मण्डले आदितो दशसूक्तानां मधुच्छन्दा ऋषिः । तत्र द्व्यधिकं शतमृचः । नवममण्डलस्य प्रथमसूक्तस्यापि मधुच्छन्दा ऋषिस्तत्र च दशऋचः । एवं द्वादशाधिकशतऋचामयं द्रष्टाऽयमृषिरित्युक्तम् । एत ऋषयश्च मन्त्रार्थद्रष्टारो न तु मन्त्रकर्तारो वा मन्त्रद्रष्टारो वा ।

उक्तं च महर्षिणा—

येन येनर्षिणा यस्य यस्य मन्त्रस्यार्थो यथावद् विदितस्तस्य तस्योपरि तत्तदृषेर्नामोल्लेखनं कृतमस्ति । कुतः । यैरीश्वरध्यानानुग्रहाभ्यां महता प्रयत्नेन मन्त्रार्थस्य प्रकाशितत्वात् तत्कृतमहोपकारस्मरणार्थं तन्नामोल्लेखनं प्रतिमन्त्रस्योपरि कर्तुं योग्यमस्त्यतः ।

(ऋग्वेदादिभाष्यभूमिका श० सं० भा० २ पृ० ६८६)

अत्रेदमप्यवबोद्धव्यम्—यैः सर्वप्रथमं यस्य मन्त्रस्य प्रचारोऽध्यापनं तेन कर्म न प्रथमं कृतं त एते मन्त्रार्थद्रष्टार ऋषय उच्यन्ते । इत्यादिकं सत्यार्थप्रकाशे[1] महर्षिणा प्रतिपादितम् ।

तथा चोक्तम् ऋग्विधाने—

ऋग्वेदाद्यस्य सूक्तस्य विधिं वक्ष्याम्यतः परम् ।
यथा ऋषिर्मधुच्छन्दा कर्मैतेनाकरोत् पुरा ॥ (ऋ० १ । ७६ ॥)

मधुच्छन्दा ऋषिः एतेन 'अग्निमीळे०' सूक्तेन कर्म पुरा प्रथममकरोत् न तु मन्त्रं कृतवान् दृष्टवान् वा । पुरा=सर्वप्रथममित्यर्थे । यथा—

"आलोके ते निपतति पुरा[2]" (मेघदूत उत्तरमेघ २२)

अत्र केचिदाहुः—ऋषयो मन्त्रकर्तारः[3] । अपर आहुः करोतिर्धातुर्दर्शनार्थः[4] । ऋषयो मन्त्रद्रष्टारो भवन्ति । महर्षिस्त्वाह मधुच्छन्द आदय ऋषयो न मन्त्रकर्तारो नापि मन्त्रद्रष्टारः । एते हि मन्त्रार्थद्रष्टारः । उक्तं हि निरुक्ते—

साक्षात्कृतधर्माण ऋषयो बभूवुः । (निरु०)

अत्र हि मन्त्रार्थद्रष्टृत्वमभिप्रेतं न तु मन्त्रद्रष्टृत्वम् । 'अर्थं वाचः पुष्पफलमाह' इति हि पूर्वतोऽनुक्रान्तम्[5] । मन्त्रकृत ऋषयः इत्यत्र करोतिधातुः प्रयुक्तार्थो

१—सत्यार्थप्रकाश श० सं० भाग १ पृ० ३१८ ॥

२—पुरा, व्य, पुरति अग्रे गच्छतीति । पुर + बाहुलकात् का । इतिशब्दकल्पद्रुमः । at first, in the first, Place, इत्याप्टे । at first, in the beginning इति मोनियर विलियम ।
आरम्भ गुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् इति भर्तृहरिः नीति० ६० ।

३—नम ऋषिभ्यो मन्त्रकृद्भ्यः । (तै० आ० ४ । ११ ॥)

४—दर्शनमेव कर्तृत्वम् । भट्टभास्करः तै० आ० ४ । ११ ॥

५—'निरुक्त के समझने में प्राचीन आचार्यों की मूल' इत्याचार्यकृते ग्रन्थे विस्तरतः प्रतिपादितम् ।

धातूनामनेकार्थत्वात् । यथा चर्मकारः सुवर्णकार इत्यादयः । नहि चर्मकारैः सुवर्णकारैर्वा चर्मादिकं निर्मीयते । प्रयुज्यते हि तैः केवलम् । करोतिधातुः प्रयोगेऽपि वर्तते यथाऽऽह स्कन्दः—

तास्त्रिविधा ऋचः । परोक्षकृताः प्रत्यक्षकृता आध्यात्मिकयश्च ।
(निरु० ७।२॥)

करोतिः क्रियासामान्यवचनत्वात् विशेषं लक्षयन् प्रयुङ्क्तेर्थे द्रष्टव्यः । कृताः प्रयुक्ताः ।
(स्कन्द निरु० ७।२।)

तन्त्रवार्तिकेऽप्युक्तम्—
मन्त्रकृच्छब्दः प्रयोक्तरि प्रयुक्तः ।

अथ च भवन्ति मन्त्रकर्तारोऽपि ऋषयः । ते तु गृह्यादिमन्त्राणां कर्तारो भवन्ति न वेदमन्त्राणाम् । यथा—
"अयन्त इध्म आत्मा जातवेदः०" इत्यादिमन्त्राणां कर्तार ऋषय आसन् महर्षिरपि 'भूरग्नये प्राणाय स्वाहा' इत्यादिमन्त्राणां कर्ता । तथा चोक्तं तेनैव—

'इति सर्वे मन्त्रास्तैत्तिरीयोपनिषदाशयेनैकीकृताः'[1]
(ऋग्वेदादि० भा० सं० भा० २ पृ० ४२)

यदि वेदमन्त्राणामपि ऋषय एव कर्तारः स्युस्तदा कथमेकस्यैव मन्त्रस्य ऋग्वेदादिभेदेन भिन्ना ऋषयः । यथा—

अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम् । पृञ्चतीर्मधुना पयः ।
(ऋ० १।२३।१६, अथर्व १।४।१।)

अत्र ऋग्वेदस्थस्यास्य मन्त्रस्य मेधातिथिः काण्व ऋषिः । अथर्ववेदस्थस्यास्य मन्त्रस्य सिन्धुद्वीप ऋषिः नह्येकस्य काव्यस्यानेके कवयो भवन्ति । मन्त्रार्थद्रष्टृदृष्ट्या तु संगच्छते । चतुर्विंशत्यृचस्य विशिष्टप्रकरणस्यास्य ऋग्वेदसूक्तस्य मन्त्रार्थद्रष्टा मेधातिथिः काण्वः । चतुर्ऋचस्य प्रकरणान्तरस्थस्याथर्ववेदसूक्तस्य सिन्धुद्वीपो मन्त्रार्थद्रष्टा ।

१—आचार्यकृतायां यज्ञपद्धतिमीमांसायां विस्तरतो व्याख्यातम् ।

ननु मन्त्रार्थद्रष्टा इति नवीनमुच्यते । सर्वत्र कर्ता स्तोमानाम् । स्तोमान् ददर्श । इत्यादिषु मन्त्रकर्तारो मन्त्रद्रष्टारो वा ऋषयः श्रूयन्ते ननु मन्त्रार्थद्रष्टारः ।

शृणु—

१—'साक्षात्कृतधर्माण ऋषयो बभूवुः' (निरुक्त)

अत्र धर्मशब्देनार्थोऽभिप्रेतो न तु मन्त्र इत्युक्तं प्राक् ।

२—य एवाप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च त एवायुर्वेदप्रभृतीनाम् । (न्याय० वात्स्यायन २ । १ । ६८ ॥)

३—ऋषिर्मन्त्रार्थज्ञः । (बौद्धायन धर्मसूत्रभाष्ये गोविन्दस्वामी २।६।३६)

४—ऋषिर्मन्त्राणां व्याख्याता । (उवट यजु० ७ । ४६ ॥)

५—निरुक्ते प्रतिपादितम्—

मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् । को न ऋषिर्भविष्यतीति । तेभ्य एतं तर्कमृषिं प्रायच्छन् मन्त्रार्थचिन्ताभ्यूहमभ्यूळम् । (निरु० १३ । १२ ॥)

अस्यायमर्थः—मनुष्या ऋषिषु उत्क्रामत्सु स्वर्गतेषु देवान् वेदज्ञान् अब्रुवन्-अपृच्छन् अधुना क ऋषिः । ते वेदज्ञास्तेभ्यो मनुष्येभ्यस्तर्कमृषिं प्रायच्छन् ददुः ।

मन्त्रार्थस्य चिन्ता विचारस्तत्र अभ्यूळम् अन्तःपातितम् अभ्यूहं स्फुरणरूपम् । ऋषिस्थानापन्नस्तर्को मन्त्रार्थबोधको न तु मन्त्रकर्ता मन्त्रद्रष्टा वा भवति । तस्माद् ऋषयो मन्त्रार्थद्रष्टार इति सुस्थम् ।

६—'ऋषयो मन्त्रदृष्टयः' इत्यत्र मन्त्रेषु दृष्टिर्दर्शनं साक्षात्कारोऽर्थस्य येषां ते मन्त्रदृष्टय ऋषय इति व्याख्येयम् ।

७—अपि चोक्तं निरुक्ते—

ऋषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता । (निरु० १० । १०, ४६ ॥)

अस्यायमर्थः—दृष्टार्थस्य दृष्टः साक्षात्कृतः अर्थो मन्त्रार्थो येन तस्य मन्त्रार्थसाक्षात्कर्तुः ऋषेः आख्यानसंयुक्ता प्रीतिर्भवति । ते ह्यृषयः कंचिदाख्यानं पुरस्कृत्य तं मन्त्रं व्याख्यान्ति इत्यत्र तेषां प्रीतिः । यथा—'निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु' इति भर्तृहरिकृतश्लोकव्याख्याने कश्चिद् दयानन्दसरस्वतीस्वामिनं आख्यायेत ।

तथैव 'स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु'
(ऋ० ८।४।१९॥)

अत्राह यास्कः—'कुरुङ्गो राजा बभूव' (निरु० ६।२२॥)

अस्यायमर्थः—कुरुङ्गस्य शत्रुकुलगामिनो राज्ञो दिविष्टिषु द्यौः स्वर्ग इष्यते गम्यते इष्यते वा याभिः क्रियाभिः तासु दिविष्टिषु क्रियासु स्वर्गप्राप्तिहेतुषु युद्धेषु सत्सु । तथा चोक्तं वेदे—"ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः" अथर्व (१८।२।१७॥) इति शताश्वं शतेनाश्वैर्युक्तं राधो धनमित्यादि । कुरुङ्गः शत्रुकुलगामी राजा युद्धे धनं लभत इत्यभिप्रायः । "कुलगमनात्" इति यास्कः (६।२।२।) "शत्रुकुलानि हि स नित्यमेव याति विजेतुम्" इति दुर्गः । तत्र वेदशब्दादेव केनचित् स्वपुत्रस्य कुरुङ्ग नाम धृतम् । सः कश्चित् राजा कुरुङ्गनामा बभूवापि इत्येव यास्कस्याभिप्रायः "अत आह कुरुङ्गो राजा बभूवेति" एवं 'आर्ष्टिषेणो होत्रमृषिर्निषीदन्० (ऋ० १०।९८।५॥) इत्यत्र यास्कप्रदर्शिता देवापिशन्तनुकथा ज्ञेया । सर्वत्र दृष्टार्थस्य ऋषेराख्यानयुक्ता प्रीतिरेव कारणम् । "इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्" (महा० आदि० १।२६७॥) इत्यादिकमपि तथैव ज्ञेयम् । तस्माद् ऋषयो मन्त्रार्थद्रष्टार इति सिद्धं भवति ।

ये तु मन्त्रद्रष्टार ऋषयस्ते तु सर्गादौ अग्निवाय्वादित्याङ्गिरोनामानो [illegible] । तथा चोक्तम्—

तेभ्यो[1] ऽभितप्तेभ्यस्त्रयो वेदा अजायन्त । ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्० । (ऐतरेय ब्रा० २५।३३)

एते हि ऋषयो निर्मला जन्मतः शुद्धाः अमैथुनिसृष्टौ सर्गादावुत्पन्ना न ते मातृगर्भाज्जायन्ते । अतः साधारणजन्मप्रकारशून्यत्वात् अजा इत्युच्यन्ते । तथा च तैत्तिरीयारण्यके—

अजान् ह वै पृश्नीन् तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत् त ऋषयोऽभवन् तद् ऋषीणामृषित्वम् । (तैत्तिरीयारण्यक २।९।१)

अस्यायमर्थः—अत्राह सायणाचार्यः "कल्पादौ ब्रह्मणा सृष्टा [illegible]

१—आचार्यकृतायां सन्ध्यापद्धति मीमांसायां व्याख्यातम् ।

हृत्यमध्ये पुनः पुनः जायन्ते तस्मादजाः । ते च पृश्नयः शुक्ला स्वरूपे निर्मलाः सन्तोऽपि पुनस्तप आचरन्" । (सायणः)

'अग्निमीळे०' इति मन्त्रस्य मधुच्छन्दा ऋषि वैश्वामित्रः=विश्वामित्रपुत्रः । नह्यसौ मधुच्छन्दा अजः । अतो नायं मन्त्रद्रष्टा मन्त्रकृद् वा ।

अथ च कश्चित् मन्त्रार्थदर्शनानन्तरमपरनामधेयप्रतिलम्भो बहूनामृषीणाम् । यथा विश्वरथो राजा मन्त्रार्थदर्शनानन्तरं विश्वामित्रनाम लेभे । एवं श्रद्धासूक्तस्य मन्त्रार्थद्रष्ट्र्या नाम श्रद्धा कामायनी । शिवसंकल्पसूक्तस्य[2] द्रष्टुः नाम शिवसंकल्प इति । तदिदं संवाद[3]सूक्तेषु विशेषतः ।

अथ च—यथा मन्त्रार्थद्रष्टारऋषयस्तथैव मन्त्रार्थद्रष्ट्र्य ऋषिका अपि । यथा—रोमशा, ब्रह्मवादिनी, लोपामुद्रा[5], नदी[6], विश्ववाराआत्रेयी[7] शश्वती आङ्गिरसी[8], अपाला आत्रेयी[9], इन्द्रस्नुषा वसुक्रपत्नी[10], घोषा काक्षीवती[11], अदितिर्दाक्षायणी[12], सूर्या सावित्री[13], इन्द्राणी[14], जुहू ब्रह्मजाया[15], गोधा[16], इन्द्राणी[17], श्रद्धा कामायनी[18], देवजामय इन्द्रमातरः[19], यमी वैवस्वती[20], शची पौलोमी[21], सार्पराज्ञी[22], संवादसूक्तेषु च ऋषिकाः । बहवो भावाः स्त्रीभिरेव साक्षात्कर्तुं शक्याः । नहि स्त्रीभावाः पुरुषैर्ज्ञायन्ते यथा प्रसवपीड़ा । क्वचिदुभावपि ऋषी[23] प्रतिपाद्यविषयवैशिष्ट्यात् । कात्यायन सर्वानुक्रमण्यामेता ऋषिका निर्दिष्टा । महर्षिस्तु कचित् क्वचिद् विप्रतिपद्यते ऽर्थवैशिष्ट्यात् ।

ननु नद्यपि ऋषिका भवितुमर्हति । सत्यम् । उक्तं हि पूर्वं यथा मन्त्रार्थदर्शनानन्तरमपरनामधेयप्रतिलम्भः । नद्यत्र नदीनाम्ना जलप्रवाहरूपा सरिद्

१—ऋ० १०।१५१॥ २—यजु० ३४।१—६॥
३—ऋ० १०।१०॥ यमयमी संवादः सूक्तम् । ऋ० १०।६५ पुरुरव उर्वशी संवादः । ऋ० १०। १०८ पणिसरमा संवादः । ४—ऋ० १।१२६।६॥
५—ऋ० १।१७६।१—२॥ ६—ऋ० ३।३३।४, ६, ८, १०॥
७—ऋ० ५।२८॥ ८—ऋ० ८।१।३४॥ ६—ऋ० ८।६१॥
१०—ऋ० १०।२८।१॥ ११—ऋ० १०।३६॥ १२—ऋ० १०।७२॥
१३—ऋ० १०।८५॥ १४—ऋ० १०।८६॥ १५—ऋ० १०।१०६॥
१६—ऋ० १०।१३४॥ षष्ठ मन्त्रस्योत्तरार्धस्य सप्तममन्त्रस्य च॥
१७—ऋ० १०।१४५॥ १८—ऋ० १०।१५१॥ १६—ऋ० १०।१५३॥
२०—ऋ० १०।१५४॥ २१—ऋ०१०।१५६॥ २२—ऋ० १०।१८६॥
२३—ऋ० १०।८६, १०।१०६॥

तु तद्विद्यावेत्री काचिन्महिला ऋषिका ऽभिप्रेता । तस्या 'नदी' नामधेय प्रतिलम्भः । तन्नाम्नैव सा व्यवाह्रियत ।

(अथ दैवत मीमांसा)

अथातो दैवतम् । अत्राह कात्यायनः—

मण्डलादिष्वाग्नेयमैन्द्रात् । (ऋ० सर्वा०)

अस्यायमर्थः—ऋग्वेदस्य सर्वेषु मण्डलेषु प्रथमं सूक्तमग्निदेवताकम् । ऐन्द्रशब्दसंशब्दनात् प्राक् । अनादेशेऽग्निर्देवता मण्डलादिषु । ऐन्द्र शब्दसंशब्दनात् परं तु "अनादेशे त्विन्द्रो देवता" ऋ० स० १२ । ५ ।। इति परिभाषया यत्र देवता नोक्ता तत्र इन्द्रो देवता मन्यते एव । अग्नि देवता प्रकरण समाप्त्यनन्तरं पुनः 'इन्द्रो देवता' इति कथ्यतेऽनुक्रमण्याम् । अन्यत्र यस्य सूक्तस्य मन्त्रस्य वा या देवता प्रोक्ता सैव ज्ञेया यथा नवम मण्डलस्यादिसूक्ते पवमानदेवता ।

बृहद्देवतायामप्युक्तम्—

आग्नेयं प्रथमं सूक्तं मधुच्छन्दस आर्षकम् । (बृह० ३।१२६।।)

अस्यायमर्थः—ऋग्वेदस्य प्रथमं सूक्तम् आग्नेयम् अग्निदेवताकम् । अग्निर्देवताऽस्येति आग्नेयम् । सा ऽस्य देवतेत्यर्थे 'अग्नेर्ढक्' (शब्दानु०४।२।३३) इति ढक् । मधुच्छन्दसश्च आर्षकम् । आर्षकमिति सूक्तविशेषणम् । ऋषेः इदं आर्षम् 'शेषे' (शब्दानु० ४।२।९२।।) इत्यण् । आर्षमेव आर्षकम् । इदं वास्य ऋषेः कर्म यदयं मन्त्रार्थं दृष्टवान् अनेन प्रथमं कर्माकरोत् प्रयुक्तवान् प्रचारितवांश्च ।

अग्निशब्दस्य कः पदार्थ इति विचार्यते—

'अग्निः कस्मादग्रणीर्भवति०' (निरुक्त ७ । १४ ।)

इत्यादिकम् १४१—१८२ पृष्ठेषु विस्तरतो व्याख्यातम् । प्रतिनिर्दिष्टः शब्दो भिद्यतेऽर्थश्चेत्यप्युक्तम् । तत्र प्रथममण्डलस्य प्रथमे सूक्तेऽग्निशब्देन परमेश्वरो भौतिकाग्निश्च महर्षिणा व्याख्यातौ । द्वितीयमण्डलस्य प्रथमे सूक्ते ऽग्निशब्देन विद्युदादयो व्याख्याताः । तृतीयचतुर्थमण्डलयोः प्रथमे सूक्ते ऽग्निशब्देन विद्वान् व्याख्यातः । पञ्चमषष्ठमण्डलयोः प्रथमे सूक्ते अग्निशब्देन पुनर्भौतिको व्याख्यातः । सप्तममण्डलस्य प्रथमे सूक्तेऽग्निशब्देन विद्युद् व्याख्याता ।

अथान्यत्र स्ववेदभाष्ये महर्षिणाऽग्निशब्दस्य नानाऽर्था गृहीताः। तद्यथा—

अग्निः=जठरस्थः। (यजु० ५। ६॥)

अग्निः=सूर्यः। (यजु० ५। ६॥)

अग्निः=युद्धजन्यक्रोधाग्निः। (यजु० ६। १८॥)

अग्निः=सर्वविद्याप्राप्तो विद्वान्। (यजु० ६। १६॥)

अग्निः=न्यायमार्गे गमयिता विद्वान्।
(ऋ० १। १०७। ३॥)

अग्निः=सर्वविद्याया वेत्ता विज्ञापयिता वा विद्वान्।
(ऋ० १। १०५। १४॥)

इत्यादिनानाभिधेयेषु महर्षिणाऽग्निशब्दो व्याख्यातः। निघण्टौ पञ्चमाध्याये ऽग्निरिति पदनामसु पठितम्। तत्रानेकार्था अनवगतसंस्काराश्च शब्दा यास्केन पठिता। तत्राग्निशब्दस्याप्युल्लेखः। वेदे ऽपि—

विदेदग्निर्नभो नाम्ना ऽग्ने अङ्गिर आयुना नाम्नेहि यस्तृतीयस्यां पृथिव्यामसि (यजु० ५। ६॥)

अत्र तृतीयस्यां पृथिव्यां द्युलोकेऽग्निर्वर्णितः स च सूर्यः पृथिवीशब्दो लोकवचनः अयमग्निशब्दोऽगिधातोरपि निष्पन्नः "अगि गतौ" इति। गतेश्च त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्चेति गत्यर्थमादाय 'न्यायमार्गे गमयिता'। ज्ञानार्थमादाय 'सर्वविद्याया वेत्ता' इत्यादि।

यत्तु निरुक्ते प्रतिपादितम्—

यस्तु सूक्तं भजते यस्मै हविर्निरूप्यतेऽयमेव सोऽग्निः।
(निरुक्त ७। १८॥)

इति वचनं तु 'निरुक्तमधिदैवतम्' इति स्वविषयाभिप्रायेण।

(अथ दैवतमीमांसा)

अथ देवताशब्दस्य कः पदार्थः इति विचार्यते। अत्राह महर्षिः—

यस्य यस्य मन्त्रस्य यो योऽर्थोऽस्ति सोऽर्थस्तस्य देवताशब्देनाभि-प्रायविज्ञापनार्थं प्रकाश्यते। एतदर्थं देवताशब्दलेखनं कृतम्।

(ऋग्वेदादि० शता० सं० भा० २ पृष्ठ ६६०।)

कात्यायनोऽप्याह—

या तेनोच्यते सा देवता। (ऋक् सर्वा० २।५॥)

षड्गुरुशिष्यश्च व्याख्यातवान्—

तेन वाक्येन यत् प्रतिपाद्यं वस्तु सा देवता।

अत्र केचिदाहुः मन्त्रेण या देवता स्तूयते सा देवताशब्दभाक्। सा च विग्रहवती तदधिष्ठात्री देवता वा प्रोच्यते। तदसत्। बहुत्र पदार्था अपि स्तूयन्ते यथा 'उलूखलम्' (ऋ०१।२८।५–६॥) 'उलूखलमुसले' (ऋ० १।२८।७।६॥) यूपः' (ऋ० १।३६।१३–१४॥) इत्यादि तथा कालोऽपि स्तूयते यथा उषो रात्री' (ऋ० १।११३।१॥) 'कालचक्रम्' (ऋ०१।१६४।४८) इत्यादि। 'क्वचिद् भावा अपि स्तूयन्ते यथा 'भाववृत्तम्'[1] (ऋ० १०।१९०।१०३) स्तूयन्ते वर्ण्यन्त इत्यर्थः। तस्मान् मन्त्रप्रतिपाद्यविषय एव देवताशब्देनोच्यते

त एते चतुर्णां वेदानां प्रतिमन्त्रं प्रतिपाद्यविषया महर्षिणा शतवर्षकल्पपूर्वं चतुर्वेदविषयसूचीनाम्नि स्वनिर्मिते ग्रन्थे प्रदर्शिताः। दौर्भाग्यात् पूर्वेषां १९३० विक्रमसंवत्सरे यस्मिन् काले महर्षिणा आर्षत्वं लब्धं निर्मिता अधुना मुद्रिता। परोपकारिणीसंग्रहस्था जराजीर्णा महताप्रयत्नेन मया प्रतिच्छायलिपिं कारिता ऽऽसीत्। तदज्ञानात् क्षेमकरणदासत्रिवेदिनोऽथर्ववेदभाष्यं तुलसीरामस्वामिनः सामवेदभाष्यं महामहोपाध्यायार्यमुनेः शिवशंकरकाव्यतीर्थस्य च महर्षिशिष्टं[2] ऋग्वेदभाष्यममूलकं जातम्। महर्षिणा व्याख्यातयोर्वेदयोः पुनः व्याख्यातारस्तु भाष्यकारपदलुलुप्सव एव। चतुर्णां वेदानां प्रतिमन्त्रं विषयान् निर्दिष्य महर्षिश्चतुरो वेदान् व्याख्यात-वानेव। एषु मन्त्रेषु किं वर्णितमिति न मनुष्या ज्ञातुं प्रभवन्ते। उक्तं हि—

१—भावानां पदार्थानां वृत्तिः सृष्ट्यादिप्रवृत्तिः यस्य देवता तद् भाववृत्तीयमिति प्राप्ते छार्षण्। (वेदार्थदीपिका १०।१२६॥)

२—महर्षिणा ऋ० ७।६१।२ मन्त्र पर्यन्तं व्याख्यातम्। ततोऽग्रे महामहोपाध्यायार्यमुनि शिवशंकरकाव्यतीर्थभ्यां ऋग्वेदो व्याख्यातः। सोऽप्यपूर्णः।

'न ह्येषु प्रत्यक्षमस्त्यनृषेः'　　(निरु० १३ । १२ ॥)

अस्यायमर्थः—एषु मन्त्रेषु ऋषेरेव प्रत्यक्षं भवति　ज्ञाते तु तस्मिन् विषये वयमाचार्या अपि मन्त्रान् व्याख्यातुं क्षमाः इत्यलं दुःखप्रदर्शनेन

(अथ छन्दोमीमांसा)

अथ छन्दोविचारः । अत्राह महर्षिः—

एवं यस्य यस्य मन्त्रस्य गायत्र्यादिछन्दोस्ति तत्तद्विज्ञानार्थं छन्दो-लेखनम् ।　　(ऋग्वेदादि० श० सं० भाग २ पृष्ठ ६६० ॥)

कात्यायनश्चाह—

यदक्षरपरिमाणं तच्छन्दः ।　　(ऋक्सर्वा० २ । ६ ॥)

तत्र प्रथमम्—

आदौ गायत्रं प्राग्हैरण्यस्तूपात् ।　　(ऋक्सर्वा० १२ । १४ ॥)

अस्यायमर्थः—ऋग्वेदस्य आदौ प्रारम्भे गायत्रं सूक्तम् । गायत्री एव गायत्रम् छन्दः । (छन्दसः प्रत्ययविधाने नपुंसकात् स्वार्थ उपसंख्यानम्) (महाभाष्य ४।२।५५॥) नपुंसकार्थाभिधायिनः छन्दोवाचिनः शब्दात् अणादिप्रत्ययविधानं कर्तव्यम् । स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते । सूक्तानां गायत्रीछन्दः सामान्येन　प्राक् हैरण्यस्तूपात्=येषां मन्त्राणां हिरण्यस्तूप ऋषिः (ऋ० १।३१॥) ततः प्राक् इत्यप्यनादेशे ज्ञेयम् । आदेशे तु यथा ऋ० १।१० सूक्तविषये ऽनुक्रमण्यामुक्तम्

गायन्ति द्वादशानुष्टुभं तु ।　(ऋक्सर्वा० १ । १ ॥) इति छन्दोऽनुष्टुप्

"अग्निमीळे" इत्यत्र उपर्युक्तपरिभाषया गायत्री छन्दः सा च त्रिपदा गायत्रीति ज्ञेयम् इति तथा चोक्तमनुक्रमण्याम्—

प्रथमं छन्दस्त्रिपदा गायत्री　　(ऋक्सर्वा० ४ । १ ॥)
अनादेशे ऽष्टाक्षरा पादाः　　(ऋक्सर्वा० ३ । ११ ॥)
ऋषिछन्दांसि　गायत्री सा चतुर्विंशत्यक्षरा ।
अष्टाक्षरा वा त्रयः पादा चत्वारो वा षडक्षरा ॥
(ऋ० प्रा० १६ । १५ । १६ ॥)

अत्राष्टाक्षरा त्रयः पादा इति विभाव्यम् ।

यथा लौकिकेषु काव्येषु विषयवैशिष्ट्यात् छन्दोरचना भवति तथा वेदेऽपि विचार्यम् । यथा—

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥
(रघुवंश ८ । ६७ ॥)

अजस्य विलापो वैतालीयच्छन्दसि कविनोपनिबद्धः । करुणारसो वैतालीय-मन्दाक्रान्तादिषु वर्ण्यते न तु तोटकदोधकादिच्छन्दःसु । तथा च प्रपञ्चित कविभिः—

आरम्भे सर्गबन्धस्य कथाविस्तरसंग्रहे ।
शमोपदेशवृत्तान्ते सन्तः शंसन्त्यनुष्टुभम् ॥१॥

श्रृङ्गारालम्बनोदारनायिकारूपवर्णनम् ।
वसन्तादि तदङ्गं च सच्छायमुपजातिभिः ॥२॥

रथोद्धता विभावेषु भव्या चन्द्रोदयादिषु ।
षाड्गुण्यविषया नीतिर्वंशस्थेन विराजते ॥३॥

वसन्ततिलकं भाति संकरे वीररौद्रयोः ।
कुर्यात् सर्गस्य पर्यन्ते मालिनीं द्रुततालवत् ॥४॥

उपपन्नपरिच्छेदकाले शिखरिणी मता ।
औदार्यरुचिरौचित्यविचारे हरिणी वरा ॥५॥

साक्षेपक्रोधधिक्कारे परं पृथिवी भरक्षमा ।
प्रावृट् प्रवास व्यसने मन्द्राक्रान्ता विराजते ॥६॥

शौर्यस्तवे नृपादीनां शार्दूलविक्रीडितं मतम् ।
सावेगपवनादीनां वर्णने स्रग्धरा मता ॥७॥

अथ च छन्दःपादव्यवस्थाऽपि सूक्ष्मेक्षिकया ऽर्थवशेन ध्येया तथा चाह जैमिनिः—

तेषामृक् यत्रार्थवशेन पादव्यवस्था। (मीमांसा २।१।३५॥)

अस्यायमर्थः—तेषां मन्त्राणां यत्र यस्मिन् मन्त्रे अर्थवशेन अर्थानुरोधेन पाद-व्यवस्था पादरचनेत्यर्थः सा ऋक्। ते मन्त्रा ऋच इति ज्ञेयाः। पादशो ऽर्थो ज्ञेयः। अन्वयस्तु भावार्थप्रदर्शकः। यथा—

आ त्वा कण्वा अहूषत
गृणन्ति विप्र ते धियः
देवेभिरग्न आ गहि (ऋ० १।१४।२॥)

अत एवात्र गृणन्ति इति तिङन्तमुदात्तवत्। तथा च—

अग्निः पूर्वेभिर्ऋषिभिः
ईड्यो नूतनैरुत। (ऋ० १।१।२॥)

इत्यस्य भाष्ये नूतनैरिति स्वतन्त्रं पदं महर्षिणा व्याख्यातम्
अर्थवशेन पादव्यवस्थाममन्यानौ शबरकुमारिलौ भ्रान्तावेव

छन्द आदिविषये यत्र यत्र सर्वानुक्रमणीकारान् महर्षेर्भेदः तत्र तत्र सकारणं विवेचयिष्यते।

(अथ षड्जादिस्वरमीमांसा)

अस्मिन् मन्त्रे षड्जःस्वर इति महर्षिणोक्तम्। षड्जस्वरे ऽयं मन्त्रो गेय इति उक्तं हि—

तथा यस्य यस्य मन्त्रस्य येन येन स्वरेण वादित्रवादनपूर्वकं गानं कर्तुं योग्यमस्ति तत्तदर्थं षड्जादिस्वरोल्लेखनं कृतमस्तीति सर्वमेतद् विज्ञेयम्।

(ऋग्वेदादि० श० सं० भा० २ पृ० ६६०)

तत्रैवं व्यवस्था क्रियते—

१–षड्जः २–ऋषभः ३–गान्धारः ४–मध्यमः ५–पञ्चमः ।
६–धैवतः ७–निषादः इति सप्त स्वराः ।

१--गायत्री २--उष्णिक् ३--अनुष्टुप् ४--बृहती ५--पङ्क्ति
६–त्रिष्टुप् ७–जगती इति सप्त छन्दांसि ।

उक्तं च वेदाङ्गछन्दोग्रन्थे—

स्वराः षड्ज ऋषभ गान्धार मध्यम पञ्चम धैवत निषादाः ।
(वेदाङ्गछन्दः)

स्वराः षड्जादयः (पिङ्गल ३ । ६४)

इति सूत्रव्याख्याने हलायुध आह—

षड्जर्षभ गान्धार मध्यम पञ्चम धैवत निषादा स्वरा गायत्र्यादिषु क्रमेण द्रष्टव्याः (हलायुध ३ । ६४ ॥)

अस्यायमर्थः—गायत्री षड्जस्वरा उष्णिक् ऋषभस्वरा अनुष्टुप् गान्धारस्वरा बृहती मध्यमस्वरा पङ्क्तिः पञ्चमस्वरा । त्रिष्टुप् धैवतस्वरा । जगती निषादस्वरा

एवमुत्तरसप्तकेऽपि क्रमेण षड्जादिस्वरा ज्ञेया तथाहि—

अतिजगती षड्जस्वरा । शक्करी ऋषभस्वरा । अतिशक्करी गान्धारस्वरा । अष्टिः मध्यमस्वरा । अत्यष्टिः पञ्चमस्वरा । धृतिः धैवतस्वरा । अतिधृतिः निषाद-स्वरा । तथैव तृतीये सप्तके क्रमेण षड्जादयः स्वरा ज्ञेयाः

१—कृतिः २—प्रकृतिः ३—आकृतिः । ४—विकृतिः ५—संकृतिः । ६—अभिकृतिः ७—उत्कृतिः

महर्षिकृता छन्दःसूच्यपि परोपकारिणीसंग्रहस्था शतवर्षकल्पनिर्मिता नाधुनापि मुद्र्यते । साम्प्रतं महर्षिहस्तलेखेष्वन्विष्टा ऽपि न लब्धा अतः तृतीयसप्तकस्वर-भेदविषये न किंचिद् वक्तुं पार्यते ।

वेङ्कटमाधवः छन्दानुक्रमण्यामाह—

गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ।
त्रिष्टुप् जगत्यौ सप्तेति छन्दांसि कवयो विदुः
ननु चातिजगत्यस्ति शक्वर्यप्यातिशक्वरी
तथैव चाष्टिरत्यष्टिर्धृतिश्चातिधृतिस्तथा–
सर्वाणि दृष्टानि च संहिताया–
न्तथैव चासंश्चतुरुत्तराणि
ततश्च वेदे वचनीयमित्थ–
मिमानि छन्दांसि चतुर्दशेति
चतुर्दशेत्थं कविभिः पुराणैश्छन्दांसि दृष्टानि समीरितानि
इयन्ति दृष्टानि तु संहितायामन्यानि वेदेष्वपरेषु सन्ति ।
चतुराधिकछन्दांसि दर्शितानि चतुर्दश
यानि दाशतयीष्वासन् उत्तराणि सु भेषजे

अत्र वेद इति ऋग्वेदे इत्यर्थः ऋग्वेदे चतुर्दश छन्दासि सन्ति । तृतीय-सप्तकछन्दांसि तु यजुःषु । तेषां नामानि—

कृतिः प्रकृतिराकृतिर्विकृतिः संस्कृतिस्तथा
षष्ठी चाभिकृतिर्नाम सप्तम्युत्कृतिरुच्यते
अशीतिश्चतुरशीतिरष्टाशीतिर्द्विनवतिः
षण्णवतिः शतं पूर्णमुत्तमं तु चतुःशतम्

अस्यायमर्थः—कृतिः अशीत्यक्षरा एवमग्रे चत्वारोऽक्षरा वर्धन्ते । सप्तमं छन्दः चतुःशताक्षरकम्

निदानसूत्रे तृतीयसप्तकछन्दोनामानि—

१—सिन्धुः । २—सलिलम् ३—अम्भः । ४—गगनम् । ५—अर्णवः । ६—आपः ७—समुद्रः कृत्यादिनामस्थाने क्रमशो ज्ञेयानि ।

एषां सर्वेषां प्रथमद्वितीयतृतीयसप्तकछन्दसां षड्जादयः स्वरा क्रमशो भवन्ति

भरतोऽपि सप्तस्वरानाह—

स स्वरो यः श्रुतिस्थाने स्वरन् हृदयरञ्जकः ।
षड्ज ऋषभ गान्धारा मध्यमः पञ्चमस्तथा ॥
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिताः ।

नारदेन च तल्लक्षणान्यप्युक्तानि तथाहि—

षड्जं रौति मयूरोऽपि वृषो नदति चर्षभम् ।
अजा विरौति गान्धारं क्रौञ्ची नर्दति मध्यमम् ॥
पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् ।
अश्वश्च धैवतं रौति निषादं रौति कुञ्जरः ॥

षड्जलक्षणं चाह—

नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन् ।
षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति स्मृतः ॥

अथ षड्जादिस्वरविषये किञ्चित् प्रपच्यते—

शब्दार्थौ कूटस्थौ आकाशवद् व्यापकत्वात् । तथाहि व्योम्नि सर्वं [illegible] स्वराः । तेषु द्वौ अचलौ षड्जः पञ्चमश्च । पञ्चमस्य षड्ज एव प्रकृतिः [illegible] ऋषभगान्धारमध्यमधैवतनिषादानां षड्ज एव प्रकृतिः एषु [illegible] उत्तराङ्गश्च भवतः । पूर्वाङ्गे षड्ज एवाचलः ततः प्रारम्भात् । उत्तराङ्गे [illegible] चलः ततः प्रारम्भात् । पूर्वाङ्गोत्तराङ्गयोर्यस्य स्वरस्य प्रथमं स्थापना [illegible] कूटस्थ इति षड्जोऽचलो जायते अन्ये विवादिनः संवादिन [illegible] शाब्दिका भाषन्ते शब्दो नित्यः परं तत्र षड्जस्याव्यपेक्षया स्वराः न [illegible] दृश्यन्ते । संगीतशास्त्रेषु चेदं विचार्यते

यथा पर्वतवत् शब्दः कूटस्थो व्यवस्थितः तथायमचलश्च [illegible] ऽयते । न चल अचलो नित्य इत्याशयः स्वराणां मध्ये षड्ज[illegible] श्रुतयो ऽनन्ताः । अतो हि यत्र षड्जो गृह्यते तत्रैवाचलो जायते । [illegible] स्वरः । अस्याष्टौ भेदा भवन्ति अस्योच्चारणस्थानं कण्ठः । अस्य ए[illegible]

भरतनाट्यशास्त्रे द्वाविंशतिः श्रुतयो निर्दिष्टाः तथाहि—

चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः
द्वौ द्वौ निषादगान्धारौ त्रिस्त्रिः ऋषभधैवतौ।

अस्यायमर्थः—षड्जमध्यमपञ्चमेषु चतस्रः चतस्रः श्रुतयो भवन्ति निषाद-गान्धारयोः द्वे द्वे श्रुतो भवतः। ऋषभधैवतयोः तिस्रः तिस्रः श्रुतयो भवन्ति तदेतत् सर्वमधोन्यस्तचित्रेण ज्ञेयम्

(सप्तके श्रुतीनां व्यवस्था)

श्रुतिसंख्या	श्रुतिनाम	स्वरनामानि	उदात्तानुदात्त	स्वरितविभागाः
१	तीव्रा		षड्जः	उ. अ.
२	कुमुद्वती			
३	मन्दा			
४	छन्दोवती	स		
	दयावती		ऋषभः	अ.
	रञ्जनी	रे॒		
७	रक्तिका	रे		
८	रौद्री	ग॒	गान्धारः	उ.
९	क्रोधा	ग		
१०	वज्रिका		मध्यमः	उ. अ.
११	प्रसारिणी			
१२	प्रीतिः	म		
१३	मार्जनी	मं		
१४	क्षितिः		पञ्चमः	उ. अ.
१५	रक्ता			
१६	संदीपिनी			
१७	आलापिनी	प		
१८	मदन्ती		धैवत	अ.
१९	रोहिणी	ध॒		
२०	रम्या	ध		
२१	उग्रा	नि॒	नि	उ.
२२	क्षोभिणी	नि		

रे॒	ग॒	मं	ध॒	नि॒		
६	८	१४	१९	२१		
स	रे	ग	म	प	ध	नि
४	७	९	१३	१७	२०	२२

पञ्चश्रुतिक धैवतः (रामामात्यदाक्षिणात्यमते)

षड्जग्रामः पञ्चमः
मध्यम ग्रामः पञ्चमः

तीव्रो मं लोचनानुसारम्
(पञ्चदशत्रिशष्टशताब्दी)

पञ्चम श्रुतिक ऋषभः (रामामात्य दाक्षिणात्यमते)

१	५	८	१०	१४	१८	२१	आधुनिक
स	रे	ग	म	प	ध	नि	शुद्धस्वराः

तथा चोक्तं सङ्गीतरत्नाकरे—

तीव्रा कुमुद्वती मन्द्रा छन्दोवत्यस्तु षड्जा।
दयावती रञ्जनी च रक्तिका ऋषभेस्थिता॥

रौद्री क्रोधा च गान्धारे, वज्रिका ऽथ प्रसारिणी।
प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः।
क्षिती रक्ता च सन्दीपिन्यालापिन्यपि पञ्चमे॥

मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः।
उग्रा च क्षोभिणीति द्वे निषादे वसतः श्रुती॥

श्रुतीनां नामान्तराणि—
नान्दी चालनिका रसा च सुमुखी चित्रा विचित्रा घना।
मातङ्गी सरसा ऽमृता मधुकरी मैत्री शिवा माधवी॥

बाला शार्ङ्गरवी कला कलरवा माला विशाला जया।
मात्रेति श्रुतयः पुराणकविभिः द्वाविंशतिः कीर्तिताः॥

गान्धारादिसप्तस्वराणामुदात्तादिवर्णनम्—
उच्चौ निषादगान्धारौ नीचावृषभधैवतौ।
शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः॥

अस्यायमर्थः—निषादगान्धारौ स्वरौ उदात्तलक्षणेन गीयन्ते। ऋषभधैवतौ अनुदात्तलक्षणेन गातव्यौ षड्जमध्यमपञ्चमाश्च स्वरितलक्षणेन गेयाः।

ऋषिदैवतछन्दःस्वरविषये विस्तरस्तु विश्वप्रदीपे व्याख्यास्यते।

अथ किंचिदवग्रहादिषु विचार्यते—

पदपाठकाले समस्तानां पदानां पदविभागं कृत्वा तत्रावग्रहः प्रदर्श्यते। यथा—

'पुरोहितम्' इति निर्भुजसंहितायाम्।

'पुरः ऽहितम्' इति प्रतृण्णसंहितायाम्।

१—संहितापाठ इत्यर्थः।

२—पदपाठ इत्यर्थः।

ननु (समासे ऽवग्रहो ह्रस्वसमकालः) (वा० प्रा० ४।१॥)

अस्यायमर्थः—समासे ऽवग्रहो भवति स च ह्रस्वसमकालः एकमात्राकालो व्यवधाने भवतीत्यर्थः । तथा सति 'पुरःऽहितम्' इत्यत्र उदात्तादुत्तरस्यानुदात्तस्य कथं स्वरितः प्रचयश्च 'पुरःऽहितम्' इति । अतएव तैत्तिरीयसंहितापदपाठे उदात्तादुत्तरस्य अवग्रहोत्तरस्यानुदात्तस्य न स्वरितः क्रियते । न वा स्वरितादुत्तरस्यानुदात्तस्य प्रचयः। यथा—

प्रजावतीरिति—प्रजाऽवतीः । (तै० १।१।१॥)
श्रेष्ठतमायेति—श्रेष्ठऽतमाय। (तै० १।१।१॥)

अत्रावग्रहे न स्वरितप्रचयौ दृष्टौ।

अत्रोच्यते—

यथा सन्धीयमानानामेकीभवतां स्वरः।
उपदिष्टस्तथा विद्यादक्षराणामवग्रहे॥ (ऋ० प्रा० ३।२४॥)

क्व उपदिष्टः? उच्यते—

उदात्तपूर्वं नियतं विवृत्या व्यञ्जनेन वा ।
स्वर्यते ऽन्तर्हितं न चेदुदात्तस्वरितोदयम् ॥
(ऋ० प्रा० ३।१६॥)

अस्यायमर्थः—उदात्तः पूर्वो यस्मात् तत् उदात्तपूर्वम् उदात्तात्परमित्यर्थः। नियतम् अनुदात्तं विवृत्या प्रकृतिभावेन व्यञ्जनेन वा ऽन्तर्हितमपि स्वर्यते स्वरित भवति यदि तस्माद् अनुदात्तात् पर उदात्तः स्वरितो वा न भवति। अयमेव नियमो मात्राकालव्यवधाने ऽवग्रहे ऽपि । अतः पूर्वमुक्तम्—"तथा विद्यादक्षराणामवग्रहे" इति तस्मात् "पुरःऽहितम्" इत्यत्र स्वरितप्रचयौ ज्ञेयौ ।

ननु रत्नानि दधाति इति रत्नधा अतिशयेन रत्नधा इति रत्नधातमः। इत्यत्र—
बहुप्रकृतावागन्तुना पर्वणा । (वा० प्रा० ५।७॥)

अस्यायमर्थः—यस्मिन् समस्ते पदे ऽनेकानि पदानि तत्र पश्चात्कालिकं यत् पदं तेनावग्रहो भवति। ततः रत्नधा ऽतमः इत्यवग्रहः स्यात् न तु रत्नऽधातमः। इति।

अत्राह कात्यायनः—

(वीतम हूतम-सूतम-गोपातम-रत्नधातम-वसुधातमाः पूर्वेण)

वा० प्रा० ५।३॥

अस्यायमर्थः—वीतमादयः शब्दाः पूर्वेण पदेनावगृह्यन्ते इति नियमः। तस्माद् रत्न ऽधातमः इत्यवग्रहः।

'ईळे' इत्यत्र ईड धातुः। तस्य डकारस्य—

द्वयोश्च स्वरयोर्मध्यमेत्य।

संपद्यते स डकारो ळकारः॥

(ऋ० प्रा० १।५२॥)

अस्यायमर्थः—द्वयोः स्वरयोर्मध्ये स्थितो डकारः ळकारो भवति। विस्तरस्तु पदार्थप्रदीपे द्रष्टव्यः।

(ब्राह्मणमीमांसा)

अथ मन्त्रभूमिकारूपं ब्राह्मणं प्रोच्यते। तत्राह महर्षिः—

तत्राद्ये मन्त्रे ऽग्निशब्देनश्वरेण आत्मभौतिकावर्थावुपदिश्येते।

(ऋ० भा० १।१।१॥)

अस्यायमर्थः—ईश्वरेण प्रथमे मन्त्रे ऽग्निशब्दद्वारा आत्मनो भौतिकस्याग्नेश्चोपदेशः कृतः। उक्तं च—

यत्र यत्र मन्त्रभूमिकायामुपदिश्यते इति क्रियापदं प्रयुज्यते ऽस्य सर्वत्र कर्त्तेश्वर एव बोध्यः।

(ऋ० भा० भावार्थ १।१।१॥)

ब्रह्मणः=मन्त्रस्य इदम् प्रयोजनमिति ब्राह्मणम्।

इति ऋषि देवता छन्दः स्वर ब्राह्मण मीमांसा।

आर्यभाषा

(ऋषि-देवता-छन्दः-स्वर-ब्राह्मण-विचार)

महर्षि ने अपने वेदभाष्य में सर्वत्र प्रत्येक सूक्त की ऋक्संख्या और प्रत्येक मन्त्र का ऋषि देवता छन्द तथा छन्दों के षड्ज आदि स्वर और प्रत्येक मन्त्र के भाष्य के प्रारम्भ में मन्त्रभूमिका—ब्रह्म=मन्त्र की संक्षिप्त विषयनिर्देशिका रूप ब्राह्मण भी दिखाया है। क्योंकि जो व्यक्ति उपर्युक्त सब बातों को बिना जाने मन्त्र का प्रयोग करता है अर्थात् मन्त्र की स्वेच्छया व्याख्या करके उस मन्त्र को किसी बात का समर्थक बताता है वह व्यक्ति मन्त्र कण्टक कहाता है। संस्कृत प्रमाण पृष्ठ २७४ पर देखो।

(ऋषिमीमांसा)

ऋषि आदि को कात्यायन अपनी ऋक्सर्वानुक्रमणी में उल्लेख करता है—

अग्निं नव मधुच्छन्दा वैश्वामित्रः। (ऋ० सर्वा० १)

अर्थात्—अग्निम् शब्द से प्रारम्भ होने वाले ऋग्वेद के प्रथम सूक्त में नौ ऋचाएं हैं और विश्वामित्र गोत्रोत्पन्न मधुच्छन्दा इस सूक्त का ऋषि है। महर्षि ने केवल मधुच्छन्दा ऋषि लिखा है विश्वामित्र गोत्रोत्पन्न का उल्लेख नहीं किया है। बृहद्देवता तथा ऋग्विधान आदि में भी केवल मधुच्छन्दा लिखा है वैश्वामित्र नहीं। यह मधुच्छन्दा ऋषि ऋग्वेद के प्रथम मण्डल के आरम्भ के दश सूक्तों का ऋषि है जिनमें १०२ ऋचाएं हैं। यह मधुच्छन्दा ऋग्वेद के नवम मण्डल के प्रथम सूक्त का भी ऋषि है उस में १० ऋचाएं हैं। इस प्रकार यह मधुच्छन्दा ऋग्वेद के ११२ मन्त्रों का अर्थ द्रष्टा है अतः इस मधुच्छन्दा को शतर्ची=सौ ऋचाओं का अर्थद्रष्टा ऐसा कुछ कहते हैं और इसके साहचर्य से ऋग्वेद के प्रथम मण्डल के अर्थद्रष्टा सब ऋषि छत्रि-न्याय से शतर्ची कहाते हैं।

यद्यपि सब ने सौ सौ ऋचाओं का अर्थ दर्शन नहीं किया पर क्योंकि मधुच्छन्दा ने १०२ ऋचाओं[1] का अर्थदर्शन किया उस के साहचर्य से प्रथम मण्डल के सब ऋषियों को शतर्ची कहते हैं। जैसे विना छाता लिये कुछ व्यक्ति जा रहे हो उनमें एक के पास भी यदि छाता है तो सब को कहा जाता है कि वे छाते वाले जा रहे हैं। संस्कृत प्रमाण पृष्ठ २७४ पर देखो।

१—प्रथममण्डल की १०२ ऋचाओं का अर्थद्रष्टा मधुच्छन्दा है। अन्य १० ऋचाएँ तो नवम मण्डल के प्रथम सूक्त की है जिनका भी अर्थद्रष्टा यह मधुच्छन्दा है।

(मन्त्रकर्ता-मन्त्रद्रष्टा-मन्त्रार्थद्रष्टा=ऋषि)

ऋषियों के प्रसङ्ग में तीन प्रकार के वर्णन वैदिक साहित्य में आते हैं।
क—कहीं ऋषियों को मन्त्रकर्ता लिखा है जैसे—

नम ऋषिभ्यो मन्त्रकृद्भ्यः (तं० आ० ४।११॥)

ख—कहीं ऋषियों को मन्त्रद्रष्टा लिखा है जैसे—

मन्त्रदर्शी । (संहितोपनिषद् ब्राह्मण ३)

ग—कहीं ऋषियों को मन्त्रार्थ द्रष्टा लिखा है जैसे—

य एवाप्ता वेदार्थानां द्रष्टारः । (न्याय० वात्स्यायन २।१।६८॥

(मन्त्रद्रष्टा-ऋषि)

मन्त्र द्रष्टा सृष्टि के आदि में अग्नि वायु आदित्य और अङ्गिरा नाम के केवल चार ऋषि हुए। अग्नि ऋषि के द्वारा ऋग्वेद, वायु ऋषि के द्वारा यजुर्वेद, आदित्य ऋषि के द्वारा सामवेद और अङ्गिरा ऋषि के द्वारा अथर्ववेद प्रकट हुआ जैसा कहा है कि—

तेभ्यो ऽभितप्तेभ्यस्त्रयो वेदा अजायन्त । ऋग्वेद एवाग्नेरजायत । यजुर्वेदो वायोः । सामवेद आदित्यात्[१] । (ऐतरेय० २५।२२॥)

ये ऋषि सृष्टि के आदि में बिना माता पिता के अमैथुनी सृष्टि में पैदा हुए थे। ये जन्म से ही शुद्ध थे फिर भी इन्होंने तप किया तब क्रमशः एक एक ऋषि को एक एक वेद प्रकट हुआ। अग्नि ऋषि को ऋग्वेद ही प्रकट हुआ इत्यादि। तैत्तियारण्यक में इन ऋषियों के सम्बन्ध में लिखा है कि—

अजान् ह वै पृश्नीन् तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत् त ऋषयो ऽभवन् । तद् ऋषीणामृषित्वम् । (तैत्तिरीयारण्यक २।९॥)

अर्थात्—(अजान्) जो माता पिता से नहीं पैदा हैं अमैथुनी सृष्टि में पैदा हुए उन को और जो (पृश्नीन्) पूर्वजन्म के संस्कार जिनके अन्तःकरण में नहीं थे उनको और जो (तपस्यमानान्) तपस्वी शुद्ध चरित्र वाले अब भी थे उनको

१—इस प्रमाण की विस्तृत व्याख्या आचार्यकृत सन्ध्यापद्धतिमीमांसा में है।

(स्वयंभु ब्रह्म) नित्य वेद (अभ्यानर्षत्) प्राप्त हुआ। वे ऋषि कहलाए। यह ऋषि शब्द का अर्थ है कि जिन्हें कुछ प्राप्त हो गया।

ऋषि शब्द 'ऋषो गतौ' धातु से बनता है और यह ऋषि शब्द 'ऋषिर्दर्शने' धातु से भी बनता है। अमैथुनी सृष्टि के इन अग्नि आदि को ऋषि इस लिये कहा गया है कि इनको वेद प्राप्त हो गया। इनका अपना कोई समाधि आदि द्वारा परिश्रम नहीं करना पड़ा। परन्तु जो अगले ऋषि मन्त्रार्थ द्रष्टा हुए उन्होंने समाधि बल से मन्त्रार्थ का दर्शन किया अतः 'ऋषिर्दर्शने' धातु से बना ऋषि शब्द उन के लिये प्रयुक्त हुआ। मन्त्रदृष्टयः का अर्थमन्त्रार्थदर्शन भी है।

(मन्त्रार्थद्रष्टा ऋषि)

महर्षि ने ऋग्वेदादिभाष्यभूमिका और सत्यार्थप्रकाश में लिखा है कि जिन्होंने ईश्वर के ध्यान और ईश्वर के अनुग्रह से ठीक ठीक जिस मन्त्र का अर्थ जाना और सर्व प्रथम जिन्होंने उस मन्त्र का प्रचार अध्यापन किया वे उस उस मन्त्र के अर्थ द्रष्टा ऋषि कहलाये। उनका नाम कृतज्ञता प्रकाशनार्थ प्रत्येक मन्त्र के साथ अब तक लिखा चला आता है। प्रमाण संस्कृत भाग पृष्ठ २७५ पर देखो।

ऋग्विधान में लिखा है कि—

ऋग्वेदाद्यस्य सूक्तस्य विधिं वक्ष्याम्यतः परम्।
यथा ऋषिर्मधुच्छन्दा कर्मैतेनाकरोत् पुरा॥
(ऋग्विधान १। ७६॥)

अर्थात्—ऋग्वेद के प्रथम सूक्त का ऋषि मधुच्छन्दा है इसने सर्व प्रथम इस सूक्त से कर्म किया।

यहां पुरा शब्द सर्व प्रथम अर्थ में है। प्रमाण संस्कृत भाग पृष्ठ २७५ पर देखो।

(मन्त्रकर्ता ऋषि)

कुछ लोग इन मधुच्छन्दा आदि ऋषियों को मन्त्रकर्ता मानतें हैं जैसे—

नमः ऋषिभ्यो मन्त्रकृद्भ्यः (तै० आ० ४। १५॥)

इसको कुछ लोग ऐसा समझते हैं कि यहां कृ धातु का अर्थ दर्शन है अर्थात् ये ऋषि मन्त्रद्रष्टा हैं। परन्तु महर्षि इन मधुच्छन्दा आदि को न मन्त्रकर्ता मानते हैं और न मन्त्रद्रष्टा। ये मधुच्छन्दा आदि मन्त्रार्थद्रष्टा हैं और मन्त्रों को प्रयोग करने वाले हैं। अर्थात् यहां कृ धातु का अर्थ प्रयोगमात्र है। जैसे सुवर्णकार चर्मकार आदि लोग

सुवर्ण या चमड़े को बनाते नहीं है केवल प्रयोग करते हैं। संस्कृत प्रमाण पृष्ठ २७६ पर देखो।

हां ऋषि लोग श्रौत तथा गृह्य मन्त्रों के कर्ता अवश्य हैं वेद मन्त्रों के नहीं जैसे (अयन्त इध्म आत्मा जातवेद:०) इत्यादि गृह्यमन्त्रों के कर्ता ऋषि हुए। महर्षि स्वामी दयानन्द सरस्वतीजी ने भी यज्ञ की पद्धति में भूरग्नये प्राणाय स्वाहा आदि मन्त्र स्वयं बनाये जैसा उन्होंने ऋग्वेदादिभाष्यभूमिका में स्वयं लिखा है संस्कृत प्रमाण पृष्ठ २७६ पर देखो। इस दृष्टि से हम स्वामी दयानन्द सरस्वतीजी को भी मन्त्रकर्ता ऋषि कह सकते हैं।

यदि वेद मन्त्रों के भी ऋषि कर्ता है तो एक ही मन्त्र के अनेक ऋषि कैसे हो सकते हैं। मन्त्रों के अर्थ द्रष्टा ऋषि तो अनेक हो सकते हैं पर किसी एक रचना के कई कवि नहीं हो सकते। उदाहरण संस्कृत भाग पृष्ठ २७६ पर देखो।

ऋषियों को मन्त्रार्थ द्रष्टा कौन कौन मानता है प्रमाण संस्कृत भाग पृष्ठ २७७ पर देखो। इन ऋषियों का यह स्वभाव रहा है कि मन्त्रार्थ का वर्णन करते हुए उदाहरण के रूप में किसी ऐतिहासिक घटना का उल्लेख कर देते हैं। जैसे भर्तृहरि का बड़ा प्रसिद्ध श्लोक है "निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु०" इत्यादि। यह श्लोक महर्षि स्वामी दयानन्द सरस्वतीजी को अतिप्रिय था और उन्होंने अपने जीवन में इसको चरितार्थ करके दिखा दिया। इस स्थिति में उपर्युक्त श्लोक की व्याख्या में यदि कोई व्याख्याता महर्षि स्वामी दयानन्द सरस्वती का उल्लेख करदे तो इसका यह अर्थ नहीं होगा कि महर्षि के बाद भर्तृहरि ने यह श्लोक बनाया और इस श्लोक में महर्षि का वर्णन है। इसी प्रकार वेद मन्त्रों की व्याख्या में यास्क ने जो 'कुरङ्गो राजा' ऋ० ८ । ४ । १९ ॥ की व्याख्या में दिखाया या ऋ० १० । ९८ । ५ ॥ की व्याख्या में जो देवापि शन्तनु की कथा लिख दी उसका अर्थ यह नहीं कि वेद में इन ऐतिहासिक व्यक्तियों का वर्णन है। संस्कृत प्रमाण पृष्ठ २७७, २७८ पर देखो।

(मन्त्रार्थ को साक्षात् करने वाली ऋषिकाएँ)

जिस प्रकार मन्त्रों के अर्थों को साक्षात् करने वाले ऋषि हुए हैं इसी प्रकार ऋषिकाएँ भी हुई हैं। उनके नाम कात्यायन ने अपनी सर्वानुक्रमणी में इस प्रकार लिखे हैं—

१–रोमशा ब्रह्मवादिनी (ऋ० १ । १२६ । ६ ॥)

२–लोपामुद्रा (ऋ० १ । १७९ । १–२ ॥)

३–नदी (ऋ० ३ । ३३ । ४, ६, ८, १० ॥)

४–विश्ववारा आत्रेयी (ऋ० ५ । २८ ॥)
